॥ अथजातकाभरणप्रारंभः ॥

श्रीगणेशायनमः ।। श्रीदंसदाहंत्त्हृदयारविंदेपादारविंदवरदस्यवंदे ।। मंदोऽपियस्यस्मरणेनसद्योगीर्वाणवंद्योपमतांसमेति ।। १ ।। उदारधीमंदरभूधरे
णप्रमथ्यहोरागमसिंधुराजम् ।। श्रीढुंढिराजःकुरुतेकिलार्यामार्यासपर्याममलोक्तिरत्नैः ।। २ ।। ज्ञानराजगुरुपादपंकजंमानसेखलुविचिंत्यभक्तितः
जातकाभरणनामजातकंजातकज्ञसुखदंविधीयते ।। ३ ।। शास्त्रोक्तांयोजन्मपत्रींकरोतिनानाग्रंथालोकनात्तस्यचित्तम् ।। अत्युद्विग्नंस्यात्ततोजातकेस्मि
न्कुर्वेव्यक्तांजातकोक्तिंचसर्वाम् ।। ४ ।। विचित्रपत्रीकरणादराणांश्रमंविनानुक्रमलेखनार्थम् ।। समर्थमेतत्प्रकटार्थमेवाऽस्यर्थंततोनामयथार्थमस्य ।।५।।
सन्मंगलाशीर्वचनान्वितानिपद्यानिचाग्रेसमुदीरयंते ।। तान्येवपत्रीकरणेप्रवीणाश्रेयस्कराणिप्रथमंलिखंतु ।। ६ ।। शुंडामंडलसंप्रसारकरणैर्मौलि
स्थलांदोलनैर्नेत्रोन्मीलनमीलनैरविरलश्रीकर्णतालक्रमैः ।। दानालिध्वनितैर्विलासचरितैरूर्ध्वाननोद्गर्जितैर्जातानंदभरःकरींद्रवदनोवःश्रेयसेकल्पताम्
।। ७ ।। पुनःपुनर्मंगलमूर्तिस्मरणंप्रत्यूहव्यूहनिवारणपरमेवेतिपद्यांतरं ।। नानादानविधानयज्ञनिकरैरुग्रैस्तपोभिश्चिरात्प्राप्तेकल्पतरौप्रकल्पितफलावाप्तिः
कथंचिद्भवेत् ।। तूर्णंयच्चरणांबुजस्मरणतःसंपूर्णकामःपुमान्सोऽयंवोऽभिमतंददातुसततंहेरंबकल्पद्रुमः ।।८।। सन्मानसावासविलासहंसीकर्णावतंसीकृत
पद्मकोशा ।। तोषादशेषाभिमतंविशेषादेषापिभाषाभवतांददातु ।। ९ ।। कल्याणानिदिवामणिःसुललितांकांतिंकलानांनिधिर्लक्ष्मींक्ष्मातनयोबुधश्चबुधतां
जीवश्चिरंजीवितां ।। साम्राज्यंभृगुजोऽर्कजोविजयतांराहुर्बहूत्कर्षतांकेतुर्यच्छतुतस्यवांछितामियंपत्रीयदीयोत्तमा ।। १० ।। ननुपूर्वजन्मोपार्जितानांसद
सत्कर्मणांपरिपाकोऽस्मिन्जन्मनिशुभाशुभफलावाप्तिकालादेवव्यक्तोऽस्तीतिजातकागमोक्तप्रपंचेनकिंप्रयोजनमितिचेत्सत्यम् ।। पूर्वोपार्जितकर्मपरिपा
कःशुभाशुभफलोपलब्धिदर्शनादेवज्ञायते।।परमभीष्टकालेज्ञातुंनशक्यते।।तथाचभाग्यमग्रेखंडितमखंडितंरिष्टंरिष्टभंगोप्यायुर्मानमित्यादिज्ञानार्थंजातका
गमएवात्यर्थंसमर्थस्तदेकशरणत्वात् ।। तथाहि ।। दिनरात्रिविभागेनसूक्ष्मकालावयवसाधनोपायैस्तुर्यध्रवभ्रमादिविचित्रयंत्रैरुपलक्षितातिस्पष्टसमयोपात्त

लग्नादिद्वादशराशिचक्रेस्वोच्चादिगतानांग्रहाणांसदसद्दशानुक्रमेणाभीष्टसमयेपिप्राक्कर्मपरिपाकोऽवगम्यते ॥ रिष्टभंगःप्रकृष्टंतुरिष्टस्यापिविनाशिंवि
शिनष्टितद्वदायुर्दायानयनप्रकारेणवयःप्रमाणस्यचनिर्णयःस्यात् ॥ तस्माद्वेदांगत्वेनाधुनिकाभावत्वेनप्रत्ययसिद्धत्वेनापिजातकस्कंधांगीकरणमुचितमेवे
ति ॥ उपार्जितंयत्सदसद्विमिश्रितंजन्मांतरेकर्मनरैरिदानीं ॥ होरागमस्तस्यविपाकमुच्चैर्दशाक्रमेणप्रकटीकरोति ॥ ११ ॥ साक्षात्भवे
द्भाग्यनिरीक्षणायसुनिर्मलादर्शतलंकिलेदम् ॥ शास्त्रंविपद्वारिनिधिप्रतर्तुंतरिस्तथाऽर्थार्जनचारुमित्रम् ॥ १२ ॥ आधानकालेकमलोद्भवेनवर्णा
वलिर्भालतलांतराले॥याकल्पितापठ्यतिदैववित्तांहोरागमज्ञानविलोचनेन ॥ १३ ॥ होरागमव्योमचरानुसारस्तेषांविचारःसुतरामुदारः ॥ सिद्धां
तएवाकलनंतदास्याऽभ्यासोयदिस्याद्गणितद्वयस्य ॥ १४ ॥ अपारहोरागमपारगामीपार्श्वांचबीजेसुतरांप्रगल्भः ॥ सद्गोलविद्याकुशलःसएवभवे
त्फलादेशविधौसमर्थः ॥ १५ ॥ श्रीजन्मपत्रीशुभदीपकेनव्यक्तंभवेद्भाविफलंसमस्तं ॥ क्षपाप्रदीपेनयथाऽलयस्थंघटादिजातंप्रकटत्वमेति ॥ १६ ॥
साजन्मपत्रीविमलानयस्यतज्जीवितंसंततमंधकंस्यात् ॥ अनल्पमल्पंचततोऽल्पकंवानकल्पतेभाग्यमितीवहेतोः ॥ १७ ॥ जन्मकालतिथिवारतारकाश्चा
पियोगकरणक्षणाभिधाः ॥ मंगलायकिलसंतुपत्रिकायस्यशास्त्रविहिताविरच्यते ॥ १८ ॥ येवक्ष्यमाणाइहराजयोगारश्मिप्रभूताअपिनाभसाश्च ॥
येकारकाःपूर्णफलंहिपूर्णयच्छंतुपत्रीक्रियतेयदीया ॥ १९ ॥ यस्यामलेयंकिलजन्मपत्रीकुतूहलेनक्रियतेयथोक्ता ॥ तस्याऽलयेसत्कमलासलीलंसु
निश्चलातिष्ठतुदीर्घकालम् ॥ २० ॥ कृतंमयानोदकयंत्रसाधनंनृपेक्षणंचापिनशंकुसाधनम् ॥ परोपदिष्टात्समयात्प्रयत्नतःशुभाशुभंजन्मफलंमयोच्यते
॥ २१ ॥ ॥ अथसांहितिकाभिप्रायेणपंचांगफलानिनिरूप्यंते ॥ ॥ तत्रादौसंवत्सरफलानि ॥
सर्ववस्तुपरिसंग्रहेरतःपुत्रसंततिरतीवसन्मतिः ॥ सर्वभोगयुतदीर्घजीवितोजायतेप्रभवसंभवःपुमान् ॥ १ ॥ उत्पन्नभोक्ताप्रियदर्शनश्चबलाधि

शालीचतुरःकलाज्ञः ।।राजाभवेदात्मकुलेसुशीलोविद्वान्मनुष्योविभवाब्दजन्मा ।। २ ।। सदासहर्षोऽतितरामुदारःसत्पुत्रदारोविभवैःसमेतः ।। सद्भाग्य
विद्याविनयोपपन्नोनूनंपुमान्शुक्लसमुद्भवःस्यात् ।।३।। दातासुतानंदयुतोऽतिकांतःसत्येननित्यंसहितोगुणीस्यात् ।। दक्षश्चधूर्त्तःपरकार्यकर्त्ताप्रमोदजन्मा
मनुजोऽभिमानी ।। ४।। दाराभिमानःसुतरांदयालुःकुलानुवृत्तःकिलचारुशीलः ।। देवद्विजार्चाभिरतोविनीतोमर्त्यःप्रजाधीशसमुद्भवःस्यात् ।।५।।
कांतःसुखीभोगयुतश्चमानीप्रियप्रवक्तावहुपुत्रयुक्तः ।। सुगुप्तबुद्धिःखलुदीर्घजीवीनरोंऽगिरावत्सरसंभवःस्यात् ।। ६ ।। श्रीमान्प्रतापीबहुशास्त्रवेत्तासु
त्वप्रियश्चारुमतिर्बलीयान् ।। सत्कीर्त्तियुक्तोनितरामुदारोभवेन्नरःश्रीमुखसंभवोऽसौ ।। ७ ।। प्रशस्तचेताःसुतरांयशस्वीगुणान्वितोदानरतोविनीतः
सदासहर्षोऽभिमतोबहूनांभावाभिधानोद्भवमानवःस्यात् ।।८।। प्रसन्नमूर्तिर्गुणवान्विनीतःशांतश्चदानाभिरतोनितांतम् ।। सुधीश्चिरायुर्दृढदेहशालीजातो
युवाब्देपुरुषःसतोषः ।। ९ ।। सर्वलोकगुणगौरवयुक्तःसुंदरोऽप्यतितरांगुरुभक्तः ।। शिल्पशास्त्रकुशलश्चसुशीलोधातृवत्सरभवोहिनरःस्यात्
।। १० ।। तत्कालसंजातमहाप्रकोपोहर्षाभियुक्तोगुणवान्प्रतापी ।। दक्षःकलाकौशलशीलशालीमर्त्योभवेदीश्वरजातजन्मा ।।११।। व्यापारदक्षः
क्षितिपालमानीदानाभिमानीननुशास्त्रवेत्ता ।। बहुप्रकारैर्बहुधान्यवित्तःस्यान्मानवोवैबहुधान्यजन्मा ।।१२।। रथध्वजच्छत्रतुरंगमाद्यैर्युतश्चशास्त्राभिर
तोऽरिहंता ।। मंत्रीनरेंद्रस्यनरःश्रुतज्ञःप्रमाथिसंवत्सरसंभवःस्यात् ।। १३ ।। अत्युग्रकर्माभिरतोनितांतमरातिचक्राक्रमणेऽतिदक्षः ।। शूरश्चधी
रोऽतितरामुदारःपराक्रमीविक्रमवर्षजातः ।। १४ ।। कार्यप्रलापीकिलनिंद्यशीलःखलानुयातःपरकर्मकर्त्ता ।। भर्त्ताबहूनांमलिनोऽलसश्चजातोवृषा
ब्देमनुजोऽतिलुब्धः ।। १५ ।। चित्रवस्त्रकुसुमैकमानसोमानसोद्भवचयान्वितःसदा ।। चारुशीलविलसत्कलान्वितश्चित्रभानुजजनोहिपूरुषः ।। १६ ।।
अरालकेशःसरलःसुकांतिर्जितारिपक्षोमतिमान्विनीतःप्रसन्नमूर्तिर्विलसद्विभूतिःसुभानुसंवत्सरजोनरःस्यात् ।।१७।। धूर्त्तश्चशूरश्चपलःकलाज्ञःसुनिष्ठु

रोगार्हितकर्मकर्त्ता ।। उत्पन्नभोक्ताद्रविणेनमुक्तःस्यात्तारणाब्दोद्भवमानवोयः ।।१८ ।। स्वधर्मकर्माभिरतोनितांतंसच्छास्त्रपारंगमतामुपेतः ।। कला
कलापेकुशलोविलासीयःपार्थिवाब्देकुलपार्थिवःस्यात् ।। १९ ।। सौख्येतिरिक्तोव्यसनाभिभूतोभीतोनकिंचित्ग्रहणाहर्णीस्यात् ।। जातःपुमानस्थिर
चित्तवृत्तिर्व्ययाभिधानेव्ययकर्मशीलः ।। २० ।। राजगौरवमहोत्सवःशुचिर्मानवःपृथुतनुर्महामतिः वैरिवर्गविजयोद्यतःसदासर्वजिच्छरदियस्यसंभ
वः ।। २१ ।। भूरिभृत्यबहुभोगसंयुतःसुंदरश्चमधुरान्नभुक्सदा ।। धीरतागुणयुतोऽतिधारणःसर्वधारिणिचयस्यसंभवः ।। २२ ।। वक्ताविदेशाटन
तांप्रपन्नःकुटुंबसौख्यापचयोऽतिधूर्त्तः ।। जनेनसाकंगतसख्यवृत्तिर्विरोधिवर्षप्रभवोनरःस्यात् ।। २३ ।। निर्धनःकिलकरालतांगतोदीर्घपूर्वबहुगर्व
संयुतः ।। चारुबुद्धिरहितोऽप्यसौत्वरोमानवोविकृतिवर्षसंभवः ।। २४ ।। कामातुरोधूसरकायकांतिःकठोरदीर्घस्वरफल्गुवाक्यः ।। क्लेशीचलज्जा
विधिवर्जितःस्यान्नरःखराब्दप्रभवोऽतिदीर्घः ।। २५ ।। तडागवापीगृहकूपकर्त्तासदान्नदानाभिरुचिःशुचिःस्यात् ।। विलासिनीनंदनजातहर्षोनरो
भवेन्नंदनवर्षजन्मा ।। २६ ।। संग्रामधीरःसुतरांसुशीलोभूपालमान्योवदतांवरेण्यः ।। दातादयालुःकिलवैरिहंतायस्यप्रसूतिर्विजयाभिधाने ।। २७ ।।
शास्त्रप्रसंगेविदुषांविवादेमान्योवदान्योरिपुगर्वहंता ।। जयाभिलाषीविषयानुरक्तोजातोजयाब्देमनुजोमहौजाः ।। २८ ।। भूषाविशेषैःसहितश्च
योषाविलासशीलोऽमृतवाक्कलाज्ञः ।। सद्गीतनृत्याभिरतश्चभोक्तायोमन्मथाब्देजननंप्रपन्नः ।।२९ ।।क्रूरोद्धतोनिंद्यमतिश्चलुब्धोवक्रास्यबाह्वंघ्रिरघप्रि
यःस्यात् ।। विरुद्धभावोबहुदुष्टचेष्टोयोहायनेदुर्मुखनाम्निजातः ।। ३० ।। तुरंगहेमांबरधान्यरत्नैर्युतोनितांतंसुतदारसौख्यः ।। समस्तवस्तुग्रहणै
कबुद्धिर्योहेमलंबेपुरुषोभिजातः ।। ३१ ।। धूर्त्तोऽतिलुब्धोऽलसतांप्रपन्नःश्लेष्माधिकःसत्वविवर्ज्जितश्च ।। प्रारब्धकार्यैततरांप्रलापीविलंबीसंवत्सरसं
भवःस्यात् ।। ३२ ।। दुराग्रहीसर्वकलाप्रवीणःसुसंग्रहीचंचलधीश्चधूर्त्तः ।। अनल्पजल्पःससुहृद्विकल्पोविकारिसंवत्सरजोनरःस्यात् ।। ३३ ।।

वणिक्क्रियायांकुशलोविलासीनैवानुकूलश्चसुहृज्जनानाम् ॥ अनेकविद्याभ्यसनानुरक्तःसंवत्सरेशार्वरिनाम्निजातः ॥ ३४॥ कामीप्रकामंधनवा
श्चशश्वत्सेवादरोदारत्वतार्थतप्तः ॥ सुगुप्तबुद्धिश्चपलस्वभावःप्लवाभिधानाब्दभवोनरःस्यात् ॥ ३५॥ सौभाग्यविद्याविनयैःसमेतःपुण्यैरगण्यैरपिदी
र्घजीवी ॥ स्यान्मानवःसूनुधनोरुसंपत्यस्यप्रसूतिःशुभकृत्समासु॥ ३६ ॥ सर्वोन्नतश्चारुगुणोदयालुःसत्कर्मकर्त्ताविजयीविशेषात् ॥ कांतोविनीतः
शुभहृक्प्रवीणोयःशोभकृद्वत्सरसंभवःस्यात् ॥३७ ॥ क्रूरेक्षणःक्रूरतरस्वभावःस्त्रीवल्लभःपर्वततुल्यगर्वः ॥ स्यादंतरायःपरकार्यकालेक्रोधीभवेत्क्रो
धिशरत्प्रसूतः ॥ ३८ ॥ सुपुत्रदारःसुतरामुदारोनरःसदाचाररतोऽतिधीरःमिष्टान्नभुक्सर्वगुणाभिरामोविश्वावसौयस्यभवेत्प्रसूतिः ॥ ३९ ॥
धनस्यधान्यस्यचनैवकिंचित्सुसंग्रहोऽत्यंतकठोरवाक्यः ॥ आचारताल्पत्वशठत्वयुक्तःपराभवेयस्यभवेत्प्रसूतिः ॥४०॥ भवेदलंचंचलचित्तवृत्तिर्नस्या
त्प्रवृत्तःखलुसाधुकार्ये ॥ धूर्त्तःसदाचारविचारहीनःप्लवंगजोवैमनुजःकृशांगः ॥ ४१ ॥ रूपेणमध्यःप्रियवाक्दयालुर्जलाभिलाषीत्वनुवेलमेव
॥ स्थूलांघ्रिसन्मौलिरलंबलीयान्किलारिकीलःकिलकेप्रसूतः ॥ ४२ ॥ पंडितोहिधनवान्बहुभोगीदेवतातिथिरुचिःशुचिरुच्चैः ॥ सात्विकः
कृशकलेवरयष्टिःसौम्यवत्सरभवोहिनरःस्यात् ॥ ४३ ॥ इतस्ततःसंचलनानुरक्तोलिपिक्रियायांकुशलोविवेकी ॥ क्रोधीशुचिर्भोगनिवृत्तचेताःप्रा
णीतिसाधारणजःप्रणीतः ॥ ४४ ॥ महेश्वराराधनतत्परःस्यात्क्रोधीविरोधीसंततंबहूनाम् ॥ पराङ्मुखस्तातवचस्यतीवविरोधकृन्नाम्निचयस्यजन्म ॥
४५॥ विद्वान्सुशीलश्चकलाप्रवीणःसुधीश्चमान्योवसुधाधिपानाम् ॥ व्यापारसंप्राप्तमहाप्रतिष्ठःपुमान्भवेद्वैपरिधाविजन्मा ॥ ४६ ॥ दुष्टाभिमानीकलहानुर
क्तोलुब्धःकुटुंबाभिरतश्चदीनः ॥ स्यादल्पधीर्गर्हितकर्म्मकर्त्ताप्रमादिजन्मामनुजःप्रमादी ॥४७॥ स्याद्भूरिदारश्चतुरोऽतिदक्षःशश्वत्सुतानंदभरप्रपूरः
॥ प्राज्ञःकृतज्ञःसुतरांविनीतोप्यानंदजातोमनुजोवदान्यः ॥ ४८ ॥ क्रूरस्वकर्माकलहानुरक्तःसंत्यक्तसत्कर्मविचारसारः ॥ दयाविहीनश्चससाह

सोपिभवेन्नरोराक्षसजातजन्मा ॥ ४९ ॥ सद्बुद्धिशालीजलसस्यसंपद्वृद्ध्यानुवृत्तौकुशलःसुशीलः ॥ स्यादल्पवित्तोबहुपालकश्चजातोनलाब्दे
चपलोमनुष्यः ॥ ५० ॥ पिंगेक्षणोगर्हितकर्मकर्त्तास्यादुद्धतश्चंचलवैभवाढ्यः ॥ त्यागीशठोऽत्यंतकठोरवाक्योजातोनरःपिंगलनामधेये ॥ ५१ ॥
अनल्पजल्पःप्रियतामुपेतस्त्वसाधुबुद्धिर्विधिनावियुक्तः ॥ कलिप्रसंगेकिलकालरूपोयःकालयुक्तप्रभवःकृशांगः ॥ ५२ ॥ उदारचेताविलसत्प्रसा
दोरणांगणप्राप्तयशाःसुवेषः ॥ नरेंद्रमंत्रीबहुपूजितार्थीसिद्धार्थिजातोमनुजःसमर्थः ॥ ५३ ॥ भयंकरःपालयितापशूनांशश्वत्परीवादपरोऽतिधूर्त्तः
॥ जातापकीर्त्तिःखलुचित्तवृत्तिर्नरोतिरौद्रःखलुरौद्रजन्मा ॥ ५४ ॥ स्ववाक्यनिर्वाहमहाभिमानःप्रसन्नताहीनतरोनरःस्यात् ॥ कामीप्रकामंदु
रितप्रवृत्तिर्योदुर्मतिर्दुर्मतिवर्षजातः ॥ ५५ ॥ नित्यंनरेंद्रादरगौरवःस्यात्गजाश्वभूहेमसमन्वितश्च ॥ तौर्यत्रिकप्रीतिरतीवजातश्चेन्मानवोदुंदुभिना
मधेये ॥ ५६ ॥ आरक्ताक्षःक्वचिदपिमहाकामलाद्यामयानांप्रादुर्भावादतिकृशतनुर्जायतेऽत्यंतरोषः ॥ पादद्वंद्वेभवतिकुनरखोहस्तयुग्मेऽथवास्या
च्छस्त्राद्दुःखंव्रजतिरुधिरोद्गारिजन्मामनुष्यः ॥ ५७ ॥ आचारधर्माभिरतोनितांतंमनोभवोत्कर्षतरोनरःस्यात् ॥ अन्याधिकत्वंसहनतोकिंचिद्रक्ता
क्षिजातोक्षिरुजान्वितश्च ॥ ५८ ॥ स्यादंतरायोहिपरस्यकार्येतमोगुणाधिक्यभयंकरश्च ॥ परस्यबुद्धिंप्रहरेत्प्रकामयोहायनेक्रोधननाम्निजातः
॥ ५९ ॥ उपार्जितार्थव्ययकृन्नितांतंसेवारतोनिष्ठुरचित्तवृत्तिः ॥ सत्कर्मतालस्त्वमनःप्रवृत्तिःक्षयाभिधानेजननंहियस्य ॥ ६० ॥ ॥ इतिश्री
दैवज्ञढुंढिराजविरचितेजातकाभरणेसंवत्सरफलानि ॥ अथायनफलानि ॥ ॥ शश्वत्प्रसन्नाननसूनुकांतासंतोषयुक्तोऽतितरांचिरायुः नरःसदाचा
रपरोप्युदारोधीरश्चसौम्यायनजातजन्मा ॥१॥ अखर्वगर्वःकृषिकर्मकर्त्ताचतुष्पदाद्योऽतिकठोरचित्तः ॥ शठोप्यसह्योननुमानवानांयाम्यायनेनाजननं
प्रपन्नः ॥२॥ इत्ययनजातफलम् ॥ ॥अर्थर्त्तुफलम्॥ कंदर्परूपोमतिमान्प्रतापिसंगीतशास्त्रेगणितेप्रवीणः ॥ शास्त्रप्रसूतामलचैलचेतावसंतज

न्मामनुजः प्रसन्नः ॥१॥ ऐश्वर्यविद्याधनधान्ययुक्तोवक्ताप्रलंबामलकेशपाशः ॥ भोगीभवेन्नीरविहारशीलोयोग्रीष्मकालोद्भवतांप्रपन्नः ॥२॥ संग्राम
धीरोमतिमान्प्रतापीतुरंगमप्रेमकरः सुरूपः ॥ कफानिलात्माललनाविलासीवर्षोद्भवेवैपुरुषः सहर्षः ॥३॥ अपूर्णरोषः पुरुषोनिलात्मामानीधनीधर्मरुचिः
शुचिःस्यात् ॥ रणप्रियोवाहानसंयुतश्चऋतौशरन्नाम्निचयस्यजन्म ॥ ४ ॥ नरेंद्रमंत्रीचतुरोप्युदारोनरोभवेच्चारुगुणोपपन्नः ॥ सत्कर्मधर्म्मानु
रतोमनस्वीहिमंतजातःसततंविनीतः ॥ ५ ॥ मिष्टान्नपानानुरतोनितांतंक्षुधान्वितःपुत्रकलत्रसौख्यः ॥ सत्कर्मवेषः पुरुषःसरोषोबलाधिशालीश
शिरर्त्तुजन्मा ॥ इतिऋतुफलम् ॥ ॥ अथमासफलम् ॥ ॥ सत्कर्मविद्याविनयोपपन्नोभोगीनरःस्यान्मधुरान्नभोजी ॥ सत्पात्र
मित्रानुरतश्चमंत्रीचैत्रोद्भवश्चापिविचित्रमंत्रः ॥ १ ॥ सुलक्षणःपुण्यगुणानुशीलःपुमान्बलीयान्द्विजदेवभक्तः ॥ कामीचिरायुजलपानशीलःस्यान्माधवे
बांधवसौख्ययुक्तः ॥ २ ॥ क्षमान्वितश्चंचलचित्तवृत्तिर्विदेशवासाभिरुचिश्चतीव्रः ॥ विचित्रबुद्धिःखलुदीर्घसूत्रोज्येष्ठोद्भवःश्रेष्ठतरोनरःस्यात् ॥३॥
बहुव्ययोऽनलस्वचोविलासःप्रमादशीलोगुरुवत्सलश्च ॥ सदाऽग्निमांद्यःशुभकर्मकृत्स्यादाषाढजोद्गाढतराभिमानः ॥ ४ ॥ पुत्रैश्चपौत्रैश्चकलत्र
मित्रैःसुखीचतातस्यनिदेशकर्त्ता ॥ लोकप्रसिद्धःकफवान्वदान्योगुणान्वितःश्रावणमासजन्मा ॥ ५ ॥ श्रीमान्भवेत्क्षीणकलेवरश्चदाताचकांतासुतजा
तसौख्यः॥ सुखेचदुःखेविकृतोहिमर्त्योभवेन्नरोभाद्रपदाप्तजन्मा ॥ ६ ॥ विद्वान्धनीराजकुलप्रियश्चसत्कार्यकर्त्ताबहुभृत्ययुक्तः ॥ दातागुणज्ञोबहुपुत्र
संपत्स्यादाश्विनेऽश्वादिसमृद्धियुक्तः॥ ७॥ सत्कर्मकर्त्ताबहुवाग्विलासीधनीलसत्कुंचितकेशपाशः ॥ कामंसकामःक्रयविक्रयार्थीसत्कृत्यकृत्कार्त्ति
कजातजन्मा ॥ ८॥ सत्तीर्थयात्रानिरतःसुशीलःकलाकलापकुशलोविलासी ॥ परोपकर्त्ताधृतसाधुमार्गोमार्गोद्भवोवैविभवैःसमेतः ॥९॥परोपकारीपि
तृवित्तहीनःकष्टार्जितार्थव्ययकृद्विधिज्ञः ॥ सुगुप्तमंत्रःकृतशास्त्रयत्नःपौषेविशेषात्पुरुषःकृशांगः ॥ १० ॥ सन्मंत्रविद्वैदिकसाधुयोगीयोगोक्तविद्याभ्य

सनारनुक्तः॥ बुद्धेर्विशेषान्निहतारिसंघोमाघोद्भवःस्यादनघोमनुष्यः ॥११॥ परोपकारीकुशलोदयालुर्बलान्वितःकोमलकायशाली ॥ विलासिनीके
लिविधानशीलोयःफाल्गुनेफल्गुवचोविलासः ॥ १२ ॥ क्षेपकः ॥ विषयहीनमतिःसुचरित्रहृत्कविविधतीर्थकरश्चनिरामयः॥ सकलवल्लभआ
त्महितंकरःखलुमलिम्लुचमासभवोनरः ॥ इतिमासजातफलम् ॥ ॥ अथपक्षजातफलम् ॥ चंचच्चिरायुःसुतरांसुशी
लःश्रीपुत्रवान्कोमलकायकांतिः॥ सदासदानंदविनीतकालश्चेज्जन्मकालस्तुवलक्षपक्षे ॥ १ ॥ प्रतापशीलोविबलश्चलोलःकलिप्रियःस्वीयकुलो
द्भूतश्च॥ मनोभवाधिक्ययुतोनितांतंसितेतरेयस्यनरस्यजन्म ॥ २ ॥ . ॥ इतिपक्षफलम् ॥ ॥ अथदिनरात्रिफलम् ॥
॥ तेजस्वीपितृसादृश्यश्चारुदृष्टिर्नृपप्रियः ॥ बंधुपूज्योधनाढ्यश्चदिवाजातोनरोभवेत् ॥ १ ॥ मंददृक्बहुकामार्तःक्षयरोगीमलीमसः ॥
क्रूरात्माछन्नपापश्चनिशिजातोनरोभवेत् ॥ २ ॥ ॥ इतिदिनरात्रिफलम् ॥ ॥ अथतिथिफलम् ॥ ॥ बहुजनपरिवारश्चारुविद्यो
विवेकीकनकमणिविभूषावेषशालीसुशीलः ॥ अतिसुललितकांतिर्भूमिपालाप्तवित्तःप्रतिपदियदिसूतिर्जायतेयस्यजंतोः ॥ १ ॥ दातादयालुर्गुणवान्सु
संपच्चंचत्सदाचारविचारधन्यः ॥ प्रसन्नमूर्तिर्बहुगीतकीर्तिर्मर्त्योद्वितीयातिथिसंभवःस्यात् ॥ २ ॥ कामाधिकःस्यादनवद्यविद्योबलान्वितोराजकु
लाप्तवित्तः ॥ प्रवासशीलश्चतुरोविलासीमर्त्यस्तृतीयाप्रभवोऽभिमानी ॥ ३ ॥ ऋणप्रवृत्तिर्बहुसाहसःस्याद्रणप्रवीणःकृपणस्वभावः ॥ द्यूतेरतिर्लोल
मनामनुष्योवादीयदिस्याज्जननेचतुर्थी ॥ ४ ॥ संपूर्णगात्रश्चकलत्रपुत्रमित्रान्वितोभूतदयान्वितश्च ॥ नरेंद्रमान्यस्तुनरोवदान्यःप्रसूतिकालेकिलपंच
मीचेत् ॥ ५ ॥ सत्यप्रतिज्ञोधनसूनुसंपद्दीर्घोरुजानुर्मनुजोमहौजाः ॥ प्रकृष्टकीर्तिश्चतुरोवरिष्ठःषष्ठ्यांप्रजातोव्रणकीर्णगात्रः ॥ ६ ॥ ज्ञानीगुण
ज्ञोहिविशालनेत्रःसत्पात्रदेवार्चनचित्तवृत्तिः॥कन्याजनेतापरवित्तहर्तास्यात्सप्तमीजोमनुजोऽरिहंता॥७॥ नानासंपत्सूनुसौख्यःकृपालुःपृथ्वीपालप्राप्तवि

०भ० युक्तः ॥ १५ ॥ सदानुरक्तोऽग्निसुरीक्रियायांधातुक्रियायामपिचोग्रसौम्यः ॥ यस्यप्रसूतौचभवेद्विशाखासखानकस्यापिभवेन्मनुष्यः ॥ १६ ॥
६ सत्कांतिकीर्तिश्चसदोत्सवःस्यात्जेतारिपूणांचकलाप्रवीणः ॥ स्यात्संभवेयस्यकिलानुराधासंपद्विशालाविविधाचतस्य ॥ १७ ॥सत्कीर्तिकांतिर्विभु
तासमेतोवित्तान्वितोऽत्यंतलसत्प्रतापः ॥ श्रेष्ठप्रतिष्ठोवदतांवरिष्ठोज्येष्ठोद्भवःस्यात्पुरुषोविशेषात् ॥ १८ ॥ अथमूलविचारः ॥ मूलंविरुद्धावयवंसमूलं
कुलंहरत्येववदंतिसंतः ॥ चेदन्यथासत्कुरुतेविशेषात्सौभाग्यमायुश्चकुलाभिवृद्धिम् ॥ १९ ॥ ज्येष्ठांत्यघटिकैकाचमूलस्याद्यघटीद्वयम् ॥ अभु
क्तमूलमित्युक्तंतत्रोत्पन्नंशिशोर्मुखम् ॥ २० ॥ अष्टवर्षाणिनालोक्यंतातेनशुभमिच्छता ॥ तद्दोषपरिहारार्थंशांतिकंप्रोच्यतेऽधुना ॥ २१ ॥
रत्नैःशतौषधीमूलैःसप्तमृद्भिःप्रपूरयेत् शतच्छिद्रोघटस्तस्मान्निःसृतेनजलेनहि ॥ २२ ॥ बालकांबापितृस्नानेविप्रैःसंपादितेसति ॥ जपहोमप्रदानेच
कृतेस्यान्मंगलंध्रुवम् ॥ २३ ॥ विरुद्धावयवेमूलेविधिरेवंस्मृतोबुधैः ॥ मुनीनांवचनंसत्यंमंतव्यंक्षेममीप्सुभिः ॥ २४ ॥ मूलस्यपादत्रितयेक्रमे
णपितुर्जनन्याश्चधनस्यरिष्टं ॥ चतुर्थपादःशुभदोनितांतंसार्पेविलोमंपरिकल्पनीयं ॥ २५ ॥ इतिमूलचरणफलम् ॥ कृष्णेतृतीयादशमीवलक्षभूतो
महीजार्किबुधैःसमेतः ॥ चेज्जन्मकालेकिलयस्यमूलमुन्मूलनंतत्कुरुतेकुलस्य ॥ २६ ॥ दिवासायंनिशिप्रातस्तातस्यमातुलस्यच ॥ पशूनांमि
त्रवर्गस्यक्रमान्मूलमनिष्टदम् ॥ २७ ॥ इतिमूलवेलाफलम् ॥ अथपुरुषाकृतौमूलाश्लेषाफलम् ॥ मूर्ध्निपंचमुखेपंचस्कंधयोर्घटिकाष्टकं ॥
गजाश्वभुजयोर्युग्मंहस्तयोर्हृदयेऽष्टकम् ॥ २८ ॥ युग्मं २ नाभौदिशो गुह्येषट् ६ जान्वोःषट् ६ चपादयोः ॥ विन्यस्यपुरुषाकारेमूलस्यफल
मादिशेत् ॥ २९ ॥ छत्रलाभःशिरोदेशेवदनेपितृघातनम् ॥ स्कंधयोर्धूर्वहत्वंचबाहुयुग्मेत्वकर्मकृत् ॥ ३० ॥ हत्याकरःकरद्वंद्वेराज्याप्तिर्हृद
येभवेत् ॥ अल्पायुर्नाभिदेशेचगुह्येचसुखमद्भुतम् ॥ ३१ ॥ जंघायांभ्रमणप्रीतिःपादयोर्जीवितात्पता ॥ घटीफलंकिलप्रोक्तंमूलस्यमुनिपुंगवैः ॥

॥ ३२ ॥ विज्ञेयंविबुधैःसर्वंसार्पेतद्यविपर्ययात् ॥ इतिपुरुषाकृतौ मूलाश्लेषाफलम् ॥ ॥ अथमूलाश्लेषामुहूर्त्तफलम् ॥ राक्षसोयातुधानश्चसोमशु
क्रःफणीश्वरः ॥ पितामातायमःकालोविश्वेदेवामहेश्वरः ॥ ३३ ॥ शर्वाख्यश्चकुबेरश्चशक्रोमैत्रोदिवाकरः ॥ गंधर्वोयमदेवश्चब्रह्माविष्णुर्यमस्तथा
॥ ३४ ॥ ईश्वरोविष्णुरंध्रश्चपवनोमुनयस्तथा ॥ षण्मुखोभृंगिरिटीचगौरीनाम्नीसरस्वती ॥ ३५ ॥ प्रजापतिश्चमूलस्यत्रिंशद्दक्षणनायकाः
विपरीताःपुनर्ज्ञेयाआश्लेषाजातबालके ॥ ३६ ॥ प्रथमेद्वितयेषष्ठेचाऽष्टमेऽष्टादशेतथा ॥ त्रयोविंशेचनवमेकुलक्षयकरःशिशुः ॥ ३७ ॥ इतिमूलाश्लेषामुहूर्त्तफ
फम् ॥ अथमूलवृक्षफलम् ॥ वेदाः ४ सप्त ७ गजाः ८ काष्ठाः १० खेटा ९ बाणा ५ श्चषट् ६ शिवाः ११ ॥ मूलस्तंभत्वचःशाखापत्रपुष्पफलं
शिखा ॥ ३८ ॥ मूलवृक्षविभागेषुमंगलंहिफलेदले ॥ अमंगलफलंविद्याच्छेषभागेषुनिश्चितम् ॥ ३९ ॥ इतिमूलवृक्षफलम् ॥ पादेमुहूर्त्तवेलायांवृक्षे
चपुरुषाकृतौ ॥ अनिष्टमशुभाधिक्येशुभाधिक्येशुभंफलम् ॥ ४० ॥ तातस्यजन्मभेयस्यप्रसूतिर्जायतेयादि ॥ तातंवाभ्रातरंज्येष्ठंरिष्टसाकुरुतेध्रुवम्
॥ ४१ ॥ मूलवच्छांतिकंतत्रविधेयंहिविचक्षणैः ॥ भूमिरत्नानिहेमान्नंदेयंविप्रेषुभक्तितः ॥ ४२ ॥ सुखेनयुक्तोधनवाहनाढ्योहिंस्रोबलाढ्यःस्थिरक
मकर्ता ॥ प्रतापितारातिजनोमनुष्योमूलेकृतीस्याज्जननंप्रपन्नः ॥ ४३ ॥ भूयोभूयस्तोयपानानुरक्तोभोक्ताचंचद्वाग्विलासःसुशीलः ॥ नूनंसंपज्जायतेत
स्यगाढापूर्वाषाढाजन्मभंयस्यपुंसः ॥ ४४ ॥ दातादयावान्विजयीविनीतःसत्कर्मकर्त्ताविभुतासमेतः ॥ कांतासुताप्तसुखोनितांतंवेश्मसुवेषःपुरुषोऽभिमा
नी ॥ ४५ ॥ अतिसुललितकांतिः संमतःसज्जनानांननुभवतिविनीतश्चारुकीर्त्तिःसुरूपः ॥ द्विजवरसुरभक्तिर्व्यक्तवाक्मानवःस्यादभिजितियदिसूतिर्भू
पतिःसःस्ववंशे ॥ ४६ ॥ शास्त्रानुरक्तोबहुपुत्रमित्रःसत्पात्रभक्तिर्विजितारिपक्षः ॥ प्राणीपुराणश्रवणप्रवीणश्चेज्जन्मकालेश्रवणंहियस्य ॥ ४७ ॥
आचारजातादरचारुशीलोधनाधिशालीबलवान्कृपालुः ॥ यस्यप्रसूतौचभवेद्धनिष्ठामहाप्रतिष्ठासहितोनरःस्यात् ॥ ४८ ॥ शीतभीरुरतिसाहसी

सदानिष्ठुरोहिचतुरोनरोभवेत् ॥ वैरिणामतिशयेनदारुणोवारुणोडुयदियस्यसंभवे ॥ ४९ ॥ जितेंद्रियःसर्वकलासुदक्षोजितारिपक्षः खलुतस्ययनि
त्यम् ॥ भवेन्मनीषासुतरामपूर्वापूर्वायदाभाद्रपदाप्रसूतौ ॥ ५० ॥ कुलस्यमध्येऽधिकभूषणंचनात्युच्चदेहःशुभकर्म्मकर्त्ता ॥ यस्योत्तराभाद्रपदाच
जन्यांधन्यांलभेन्मांचभवेद्वदान्यः ॥ ५१ ॥ चारुशीलविभवोजितेंद्रियःसद्धनानुभवनैकमानसः ॥ मानवोननुभवेन्महामतीरेवतीभवतियस्यजन्मभ
म् ॥ ५२ ॥ इतिनक्षत्रजातफलानि ॥ ॥ अथबृहज्जातकोक्तनवांशफलम् ॥ ॥ विनीतोधर्म्मशीलश्चसत्यवादीदृढव्रतः॥ विद्याव्यसनशी
लश्चजायतेप्रथमांशके ॥ १ ॥ उत्पन्नविभवोभोक्तासंग्रामेषुपराजितः ॥ गंधर्वप्रमदासक्तोजायतेद्वितीयांशके ॥ २ ॥ स्त्रीजितश्चानपत्यश्चमा
यायुक्तोऽल्पवीर्यवान् ॥ वीरोविद्याविचारज्ञोजायतेतृतीयांशके ॥ ३ ॥ बहुस्त्रीसुभगःपूज्योजलसेवीधनान्वितः ॥ नृपसेव्यथवाऽमात्यश्चतुर्थां
शेप्रजायते ॥ ४ ॥ बहुमित्रजनामात्योबंधुपुत्रसुखान्वितः ॥ महत्प्रतिष्ठामाप्नोतिसंजातःपंचमांशके ॥ ५ ॥ जितवैरिगणोवीरोदृढसौहृदका
रकः ॥ जायतेमंडलाधीशोनरःषष्ठांशकोद्भवः ॥ ६ ॥ अव्याहताज्ञःसर्वत्रपृथ्वीनाथःकलायुतः ॥ सेनापतित्वमाप्नोतिसंजातःसप्तमांशके ॥
॥ ७ ॥ उदारधीःक्षितिख्यातोधनधान्यव्ययोदितः ॥ कोपीदुर्जनतप्तांगोनरोजातोऽष्टमांशके ॥ ८ ॥ इतिबृहज्जातकोक्तनवांशकफलानि
अथक्रमप्राप्तानिपुरापितृव्यैर्लिखितानि ॥ शश्वत्कांतापुत्रमित्रादिसौख्यंस्वातंत्र्यंस्यात्सर्वकार्यप्रसंगे ॥ चंचद्देहोत्पादनेमानसंचेद्विष्कंभेवैसंभवोयस्य
जंतोः ॥ १ ॥ वक्ताचंचद्रूपसंपत्तियुक्तोदातात्यंतंस्यात्प्रसन्नाननश्च ॥ जातानंदःसाद्विनोदप्रसंगाद्धर्मप्रीतिःप्रीतिजन्मामनुष्यः ॥ २ ॥ अर्था
त्यर्थसाहसैरन्वितश्चनानास्थानोद्यानयानप्रवृत्तिः॥यस्यायुष्मान्संभवेसंभवेद्धैस्यादायुष्मान्मानवोमानयुक्तः॥३॥ ज्ञानीधर्मीसत्यपरायणःस्यादाचारशी
लोबलवान्विवेकी ॥सुश्लाघ्यसौभाग्यविराजमानःसौभाग्यजन्माहिमहाभिमानी॥४॥सत्वरोऽतिचतुरःसदुत्तरश्चारुगौरवयुतश्चसन्मतिः॥ नित्यशोभन

विधानतत्परःशोभनोभवतिशोभनोद्भवः ॥ ५ ॥ सदामदोयोगलरुक्सरोषोविशालवक्त्रांघ्रिरतीवधूर्तः ॥कलिप्रियोदीर्घहनुर्मनुष्यःपाखंडिकःस्या
दतिगंडजातः ॥ ६ ॥ हृष्टःसदासर्वकलाप्रवीणःससाहसोत्साहसमन्वितश्च ॥ परोपकारीसुतरांसुकर्माभवेत्सुकर्मापरिसूतिकाले ॥ ७ ॥
प्राज्ञोवदान्यःसततंप्रहृष्टःश्रेष्ठःसभायांचपलःसुशीलः ॥ नयेनयुक्तोनियमेनधृत्याधृत्याह्वयेयस्यनरस्यजन्म ॥ ८ ॥ नरोहरिद्रामयसंयुतश्चसत्क
र्मविद्याविनयैर्विरक्तः ॥ यस्यप्रसूतिर्यदिशूलयोगेशूलव्यथातस्यभवेत्कदाचित् ॥ ९ ॥ धूर्तःसुहृत्कार्यपराङ्मुखश्चक्लेशीविशेषात्परुषस्वभावः ॥
चेत्संभवेयस्यभवेच्चगंडःप्रचंडकोपःपुरुषःप्रदिष्टः ॥ १० ॥ सुसंग्रहीप्रीतिरतीवदक्षोधनान्वितःस्यात्क्रयविक्रयाभ्याम् प्रसूतिकालेयदियस्यवृद्धिर्भाग्या
भिवृद्धिर्नियमेनतस्य ॥ ११ ॥ निश्चलाहिकमलासदाऽलयेसंभवेच्चवदनेसरस्वती ॥ चारुकीर्तिरपिचेत्ध्रुवंतदाचेत्ध्रुवोभवतियस्यसंभवे ॥१२॥ क्रूरो
ल्पदृष्टिःकृपयाविहीनोमहाहनुःस्यादपवादवादी ॥ असत्यताप्रीतिरतीवमर्त्योव्याघातजातःखलुघातकर्त्ता ॥ १३ ॥ सुस्निग्धगात्रःकृतशास्त्रयत्नः
सुरत्नभूषावसनानुरक्तः ॥ प्रसूतिकालेयदिहर्षणश्चेत्समानवोवैरिपुकर्षणःस्यात् ॥ १४ ॥ सुधीःसुबंधुर्गुणवान्महौजाःसत्यान्वितोरत्नपरीक्षकःस्यात्
चेत्संभवेयस्यचवज्रयोगःसवज्रयुक्तोत्तमभूषणाढ्यः ॥ १५ ॥ उदारचेताश्चतुरःसुशीलःशास्त्रादरःसारविराजमानः ॥ प्रसूतिकालेयदियस्यसि
द्धिर्भाग्याभिवृद्धिःसततंहितस्य ॥१६॥ उदारबुद्धिःपितृमातृवाक्येगदार्तमूर्तिश्चकठोरचित्तः ॥ परस्यकार्येव्यतिपाततुल्योनरःखलुस्यात्व्यतिपातजन्मा
॥ १७ ॥ उत्पन्नभोक्ताविनयोपपन्नोद्रव्याल्पतासद्व्ययतासमेतः ॥ सुकर्मसौजन्यतयावरीयान्भवेद्वरीयान्प्रभवोहियस्य ॥ १८ ॥ असत्यसा
क्षीप्रतिभूर्बहूनांव्यक्तात्मकर्माक्षमयाविहीनः ॥ दक्षोल्पभक्षोविजितारिपक्षस्त्वघप्रियोवैपरिघोद्भवःस्यात् ॥ १९ ॥ सन्मंत्रशास्त्राभिरतोनितांतंजि
तेंद्रियश्चारुशरीरयष्टिः ॥ योगःशिवोजन्मनियस्यजंतोःसदाशिवंतस्यशिवप्रसादात् ॥ २० ॥ जितेंद्रियःसत्यपरोऽतिगौरःसर्वेषुकार्येष्वतिकोवि

दश्च ॥ भवेत्प्रसूतौयदिसिद्धियोगःसिद्ध्यंतिकार्याणिकृतानितस्य ॥ २१ ॥ नूनंविनीतश्चतुरःसहासःस्वकार्यदक्षोजितशत्रुपक्षः ॥ सन्मंत्रविद्या
विधिनैवसर्वंसंसाधयेत्साध्यभवोहिदक्षः ॥ २२ ॥ शुभप्रचारःशुभवाग्विलासःशुभस्यकर्ताशुभलक्षणश्च ॥ शुभोपदेशंकुरुतेनराणांयस्यप्रसूतौशु
भनामयोगः ॥ २३ जितेंद्रियःसत्यवचामहौजावाग्वादसंग्रामजयाभ्युपेतः ॥ सन्मानशुक्लांबरधारणेच्छुःशुक्लोद्भवोवैभवसंयुतःस्यात् ॥ २४ ॥
विद्याभ्यासेप्रीतिरत्यंतचेतानित्यंसत्याचारजातादरश्च ॥ शांतोदांतोजायतेचारुकर्माब्रह्मायोगःसंभवेयस्यपुंसः ॥ २५ ॥ प्राज्ञोबलीयान्विपुलामलश्री
युक्तःकफात्माहिभवेन्महौजाः ॥निजान्वयेवैमनुजोनरेंद्रस्त्वेंद्रोद्भवश्चारुतरप्रभावः ॥ २६ ॥ चंचलश्चकुटिलःखलमैत्रःशास्त्रभक्तिरहितोहतचित्तः
॥ साध्वसेमनसितस्यनोधृतिर्वैधृतिर्भवतियस्यजन्मनि ॥ २७ ॥ इतियोगफलानि ॥ ॥ ॥ अथकरणफलम् ॥ ॥
॥ कामीदयालुर्बलवान्सुशीलोविचक्षणःशीघ्रगतिःसभाग्यः ॥ बवाभिधानेजननंहियस्यनानाविधातस्यभवेत्सुसंपत् ॥ १ ॥ शूरताऽ
तिविलसद्बलवत्तासंद्युताभवतिचारुविलासः ॥ काव्यकृद्वितरणप्रणयश्चेद्बालवेऽमलमतिश्चकलाज्ञः ॥ २ ॥ कामीप्रगल्भोऽभिमतोबहूनांनूनंस्वतं
त्रोबहुमित्रसौख्यः ॥ बलान्वितःकोमलवाग्विलासःश्रेष्ठःकुलेकौलवजातजन्मा ॥ ३ ॥ चारुकोमलकलेवरशालीकेलिलालसमनाश्चकलाज्ञः ॥
वाग्विलासकुशलोऽतिसुशीलस्तैतिलेविमलधीश्चलदृक्स्यात् ॥ ४ ॥ परोपकारेविहितादरश्चविचारसारश्चतुरोजितारिः ॥ शूरोऽतिधीरःसुतरामु
दारोगरेनरश्चारुकलेवरश्च ॥ ५ ॥ कलाप्रवीणःसुतरांसहासःप्राज्ञोहिसन्मानसमन्वितश्च ॥ प्रसूतिकालेवणिजंहियस्यवाणिज्यतोऽर्थागमनंहितस्य
॥ ६ ॥ चारुवक्त्रचपलोबलशालीहेलयाऽसिदरितारिकुलश्च ॥ जायतेखलमतिर्बहुनिद्रायस्यजन्मसमयेखलुभद्रा ॥ ७ ॥ अतिसुललितबुद्धि
मैत्रविद्याविधानेगुणगणसमवेतःसर्वदासावधानः ॥ ननुजनकृतसख्यःसर्वसौख्याभियुक्तोभवतिशकुनजन्माशाकुनज्ञानशीलः ॥ ८ ॥ नरःसदाचारप

राङ्मुखः स्यादसंग्रहः क्षीणशरीरयष्टिः ॥ चतुष्पदे यस्य भवेत्प्रसूतिश्चतुष्पदात्सत्वयुतो मनुष्यः ॥ ९ ॥ दुःशीलवक्रचलनो बलवान्खलात्मा कोपानलाहतमतिः कलिकृत्कुलार्यैः ॥ द्रोहात्कुलक्षयभवेदातिदीर्घकालं जातोहि नागकरणे रणरंगधीरः ॥ १० ॥ धर्मेऽप्यधर्मे समतामतेः स्यादंगेऽप्यनंगे विबलत्वमुच्चैः ॥ मैत्र्याममैत्र्यां स्थिरता न किंचित्किंस्तुघ्न जातस्य हि मानवस्य ॥ ११ ॥ इति करणफलम् ॥

अथ गंडांतफलम् ॥ पौष्णादिगंडांतभवो हि मर्त्यः क्रमेण पित्रोरशुभोऽग्रजस्य ॥ जातस्य सर्वं त्रिविधे प्रजातः सर्वाभिघातं कुरुते वदंति ॥ इति गंडांतफलम् ॥

॥ अथ गणफलम् ॥ ॥ सुस्वरश्च सरलोक्तिमतिः स्यादल्पभोजनकरो हि नरश्च ॥ जायते सुरगणेऽन्यगुणज्ञः सूज्ञवर्णितगुणो द्रविणाढ्यः ॥ १ ॥ देवद्विजार्चाभिरतोभिमानी धनी दयालुर्बलवान्कलाज्ञः ॥ प्राज्ञः सुकांतिः सुखदो वहूनां मर्त्यो भवेन्मर्त्यगणे प्रसूतः ॥ २ ॥ अनल्पजल्पश्च कठोरचित्तः स्यात्साहसी क्रोधपरोद्धतश्च ॥ दुःशीलवृत्तः कलिकृद्बलीयान्रक्षोगणोत्पन्ननरो विरोधी ॥ ३ ॥ इति गणफ० ॥

अथ लग्नफ० ॥ चंडाभिमानी गुणवान्सकोपः सुहृद्विरोधी च सखा परेषाम् ॥ पराक्रमप्राप्तयशो विशेषो मेषोदये यः पुरुषोऽतिरोषः ॥ १ ॥ गुणाग्रणीः स्यात्द्रविणेन पूर्णो भक्तो गुरूणां हि रणप्रियश्च ॥ धीरश्च शूरः प्रियवाक्प्रशांतः स्यात्पूरुषो यस्य वृषे विलग्ने ॥ २ ॥ भोगी वदान्यो बहुपुत्रमित्रः सुगूढमंत्रः सधनः सुशीलः ॥ तस्य स्थितिः स्यान्नृपसन्निधाने लग्ने भवेन्नामिथुनाभिधाने ॥ ३ ॥ मिष्टान्नभुक्साधुरतो विनीतो विलोमबुद्धिर्जलकेलिशीलः प्रकृष्टसारोऽतितरामुदारो लग्ने कुलीरे हि नरो भवेत्सः ॥ ४ ॥ कृशोदरश्चारुपराक्रमश्च भोगी भवेदल्पसुतोऽल्पभक्षः ॥ संजातबुद्धिर्मनुजोऽभिमानी पंचानने संजनने विलग्ने ॥ ५ ॥ कामक्रीडासद्गुणज्ञानसत्वकौशल्याद्यैः संयुतः सुप्रसन्नः ॥ लग्नं कन्या यस्य जन्यां सधन्यां कन्यां क्षीराब्धेरवाप्नोति नित्यं ॥ ६ ॥ गुणाधिकत्वं द्रविणोपलब्धिर्वाणिज्यकर्मण्यतिनैपुणत्वम् ॥ पद्मालयातानिलयेन लोला लग्नं तुला चेत्सकुलावतंसः ॥ ७ ॥ शूरो नरोऽत्यंतविचारसारोऽनवद्यविद्याधिकतासमेतः ॥ प्रसूतिकाले किल लग्नशाली भवेदलिस्तस्य कलिः सदैव ॥ ८ ॥ प्राज्ञ

भ०

श्वराज्ञःपरिसेवनज्ञःसत्यप्रतिज्ञःसुतरांमनोज्ञः ॥ सूज्ञःकलाज्ञश्चधनुर्विधिज्ञश्चेन्नुर्धनुर्यस्यजनुस्तनुःस्यात् ॥ ९ ॥ कठिनमूर्तिरतीवशठःपुमान्निजमनोगतकृद्बहुसंततिः ॥ सुचतुरोऽपिचलुब्धतरोवरोयदिनरोमकरोदयसंभवः ॥ १० ॥ लोलस्वांतोऽत्यंतसंजातकामश्चंचद्देहःस्नेहकृन्मित्रवर्गे ॥ सस्यैरंभःसंभवैर्युक्सदंभश्चेत्स्यात्कुंभेसंभवोयस्यलग्ने ॥ ११ ॥ दक्षोऽल्पभक्षोऽल्पमनोभवश्चसद्रत्नहेमाचपलोऽतिधूर्त्तः ॥ स्यान्नाचनानारचनाविधानेमीनाभिधानेजननेविलग्ने ॥ १२ ॥ भवेदलंलग्नबलंयथोक्तंविलग्नकालेप्रबलेप्रसूतौ ॥ तस्मिन्बलोनेयादिवाविलग्नेयुक्तेक्षितेक्रूरखगैस्तथाल्पम्॥१३॥ नन्वेवमुदाहृतानांसंवत्सरादिफलानांसमयानियमाभावात्निराधारकत्वेनफलादेशःकथंसम्यक्घटतीतिव्यर्थमेवाकिमर्थमुक्तमितिचेन्न॥ समयनियमोऽप्यस्ति ॥ तथाहि ॥ उक्तानिसंवत्सरपूर्वकाणांफलानितत्प्राप्तिरितिप्रकल्प्या ॥ सांवत्सरंसावनवर्षपस्यपाकेयनर्तुप्रभवंवरांशोः ॥ १४ ॥ मासोद्भवंमासपतेस्तथैदोर्गणोडुपक्षप्रभवंचयत्स्यात् ॥ तिथिप्रभूतंकरणोद्भवंचचंद्रांतरेऽर्कस्यदशाविभागे ॥ १५ ॥ वारोद्भवंवारविभोर्विचिंत्यंयोगोत्थमिंदूर्कबलान्वितस्य ॥ लग्नोद्भवंलग्नपतेर्दशायांदृग्भावयुक्राशिजमेवमूह्यम् ॥ १६ ॥ इतिलग्नफलम् ॥ अथसूर्यनक्षत्रफलम् ॥ डिंभाख्यचक्रेरविभाच्चभानांयत्रन्यसेन्मूर्ध्निमुखेत्रयंच ॥ द्वेस्कंधयोर्द्वेभुजयोर्द्वयंचपाणिद्वयेवक्षसिपंचभानि ॥ १ ॥ नाभौचलिंगेचतथैकमेकंजान्वोर्द्वयंपादयुगेभषट्कम ॥ पुंसांसदावैपरिकल्पनीयंमुनिप्रवर्यैःफलमुक्तमत्र ॥ २ ॥ सद्रत्नचामीकरचारुवस्त्रविचित्रवालव्यजनातपत्रैः ॥ विराजमानोमनुजोनितांतंमौलिस्थलेभंनलिनीप्रभोश्चेत् ॥ ३॥ मिष्टाशनानांशयनासनानांभोक्ताचवक्तासततंप्रसन्नः ॥ स्मिताननोनावदनानुयातंभानोर्भवेद्वंजननेहियस्य ॥ ४ वृषांसकोवंशविभूषणश्चमहोत्सवार्थप्रथितःप्रतापी ॥ नरोऽतिशूरोऽतितरामुदारोदिवाकरोडुस्थितमंसकेचेत् ॥ ५ ॥ त्यक्तस्वदेशःपुरुषोविशेषाद्रवोद्भतःशौर्ययुतोनितांतम् ॥ विदेशवासात्तमहाप्रतिष्ठोमार्त्तडभंबाहुगतंप्रसूतौ ॥ ६ ॥ वदान्यतासद्गुणवर्जितश्चपण्यादिरत्नादिपरीक्षकश्च ॥ सत्या

नृताभ्यांसहितोहिमर्त्योदिवामणेर्भयदिपाणिसंस्थम् ॥ ७ ॥ भूपालतुल्यः स्वकुलेसुशीलोबालोविशालोत्तमकीर्त्तिशाली ॥ शास्त्रेप्रवीणः परिसू
तिकालेवक्षस्थलेचेन्नलिनीशभंस्यात् ॥ ८ ॥ क्षमासमेतोरणकर्मभीरुः कलाकलापाकलनैकशीलः ॥ धर्मप्रवृत्तिः सुतरामुदारोनाभीसरोजेऽम्बुजबं
धुतारा ॥ ९ ॥ कंदर्पधूर्योर्जितसाधुकर्मासद्गीतनृत्याभिरुचिः कलाज्ञः ॥ चेज्जन्मकालेनलिनीशभंस्याद्गुह्यस्थलेसोऽतुलकीर्त्तियुक्तः ॥ १० ॥ नाना
देशानेकधासंप्रचारः कार्योत्साहश्चंचलः क्षामगात्रः ॥ धूर्तोमर्त्यः सत्यहीनश्चनूनंजानुस्थानेभानुभंजन्मनिस्यात् ॥ ११ ॥ कृषिक्रियायांनिरतोऽ
लधर्मः शत्रूज्झितः सेवनकर्मकर्त्ता ॥ तारायदिस्यादरविंदबंधोः पादारविंदेचनरस्यसूतौ ॥ १२ ॥ इतिसूर्यनक्षत्रफलम् ॥ ॥ अथाऽवयवस्वरूपम्
॥ ह्रस्वामीनवृषाजघटामिथुनधनुकर्किमृगमुखाश्चसमाः ॥ वृश्चिककन्यामृगपतिवणिजादीर्घाः समाख्याताः ॥१॥ एभिर्लग्नादिगण्यैः शीर्षप्रभृतिनृश
रीराणि ॥ सदृशानिविज्ञायंतेस्थितगगनचरैश्चैवतुल्यानि ॥ २ ॥ इदंलग्नतः सकाशात्कालपुरुषाकारचक्रंद्रष्टव्यम् ॥ ॥ अथ
द्वादशभावानांफलानि ॥ ॥ भिन्नंद्वादशधाविधायविलसच्चक्रंचतत्रन्यसेल्लग्नाद्द्वादशराशयोऽतिविशदावामांगमार्गक्रमात् ॥ अंत्यास्तत्रनभ
श्चराः स्फुटतराराशौचयत्रस्थितास्तेभ्यः साधुफलंत्वसाधुसुधियावाच्यंहिहोरागमात् ॥ १ ॥ रूपंतथावर्णविनिर्णयश्चचिन्हानिजातिर्वयसः प्रमाणम् ॥
सुखानिदुःखान्यपिसाहसंचलग्नेविलोक्यंखलुसर्वमेतत् ॥ २ ॥ विलोकितेसर्वखगैर्विलग्नेलीलाविलासैः सहितोबलीयान् ॥ कुलेनृपालोविपुलायुरेदभ
येनमुक्तोऽरिकुलस्यहंता ॥ ३ ॥ सौम्यास्त्रयोलग्नगतायदिस्युः कुर्वंतिजातंनृपतिंविनीतम् ॥ पापास्त्रयोदुःखदरिद्रशोकैर्युतानितांतंबहुभक्षकंच
॥ ४ ॥ लग्नात्द्यूनषडष्टकेऽपिचशुभाः पापैर्नयुक्तेक्षितामंत्रीदंडपतिः क्षितेरधिपतिः स्त्रीणांबहूनांपतिः ॥ दीर्घायुर्गदवर्जितोगतभयः सौंदर्यसख्यान्वितः
सच्छीलोयवनेश्वरैर्निगदितोमर्त्यः प्रसन्नः सदा ॥५॥ अथार्कादिग्रहाणांहिगुणवर्गविनिर्णयः ॥ आकारोऽपिशरीरस्यप्रोच्यतेमुनिसंमतः ॥ ६ ॥ शूरोगभी

रश्चतुरःसुरूपःश्यामारुणश्चाल्पककुंतलश्च ॥ सुवृत्तगात्रोमधुपिंगनेत्रोमित्रोहिपित्तास्थ्यधिकोनतुंगः ॥ ७ ॥ सद्वाग्विलासोऽमलधीःसुकायोरक्ताधिकः
कुंचितकृष्णकेशः ॥ कफानिलात्मांबुजपत्रनेत्रोनक्षत्रनाथःसुभगोऽतिगौरः ॥ ८ ॥ मज्जासारोरक्तगौरोऽप्युदारोहिंस्रःशूरःपैत्तिकस्तामसश्च ॥
चंडःपिंगाक्षोयुवाऽखर्वगर्वःखर्वश्चोर्वीसूनुरग्निप्रभःस्यात् ॥ ९ ॥ श्यामःशिरालश्चकलाविधिज्ञःकुतूहलीकोमलवाक्त्रिदोषी ॥ रजोधिकोमध्यमरूपधृक्स्या
दाताम्रनेत्रोद्विजराजपुत्रः ॥ १० ॥ ह्रस्वाकारश्चारुचामीकराभःसम्यक्सारःसुस्वरोदारबुद्धिः ॥ दक्षःपिंगाक्षःकफीचातिमांसःप्राज्ञःसूज्ञैःकीर्तितोजी
वसंज्ञः ॥ ११ ॥ सजलजलदनीलश्लेष्मलश्चानिलात्माकुवलयदलनेत्रोवक्रनीलालकश्च ॥ सुसरलभुजशालीराजसश्चाऽतिकामीमदयुतगजगामी
भार्गवःशुक्रसारः ॥ १२ ॥ श्यामलोऽतिमलिनश्चशिरालःसालसश्चजटिलःकृशदीर्घः ॥ स्थूलदंतनखपिंगटनेत्रोयुक्शनिश्चखलतानिलकोपैः
॥ १३ ॥ लग्नस्यनंदांशपतेर्हिमूर्त्यामूर्तिःसमानाबलशालिनोवा ॥ स्यादिंदुनंदांशपतेस्तुवर्णःपरंविचार्याःकुलजातिदेशाः ॥ १४ ॥ सत्वंभवेद्युः
शशिसूर्यजीवास्तमोयमारौचरजोज्ञशुक्रौ ॥ त्रिंशल्लवेयस्यगतोदिनेशोवाच्योगुणस्तस्यखगस्यनूनम् ॥ १५ ॥ शिरोक्षिणीकर्णनसाकपोलौहनु
मुखंचप्रथमेद्रेकाणे ॥ कंठांसदोर्दंडककुक्षिवक्षःक्रोडंचनाभिस्त्रिलवेद्वितीये ॥ १६ ॥ वस्तिस्ततोलिंगगुदेतथांडावूरूचजानूचरणौतृतीये ॥ क्रमे
णलग्नात्परपूर्वषट्कैवामंतथादक्षिणमंगमत्र ॥ १७ ॥ मत्स्यंतिलंलक्ष्मबलानुसारंकुर्वंतिसौम्यात्रणमत्रपापाः ॥ स्वांशस्वभागस्थिरगाश्चलक्ष्मयुक्तेक्षि
ताःसौम्यनभश्चरेंद्रैः ॥ १८ ॥ रवेर्व्रणःकाष्ठचतुष्पदोत्थःशृंग्यंबुचारिप्रभवःशशांकात् ॥ कुजाद्विषाग्न्यस्त्रकृतश्चचांद्रेर्भौमःशनेश्चापिमरुद्दृषद्भ्याम्
॥ १९ ॥ कुर्यात्व्रणंक्रूरखगोरिपुस्थोयुक्तःशुभैर्लक्ष्मतिलंचदृष्टः ॥ ग्रहत्रयंयत्रबुधान्वितंस्यात्तत्रव्रणोंगेखलुराशितुल्यः ॥ २० ॥ मेषेशशांकः
कलशेशनिश्चेद्धानुर्धनुस्थश्चभृगुर्मृगस्थः ॥ तातस्यवित्तंनकदापिभुंक्तेस्वबाहुवीर्येणनरोवरेण्यः ॥ २१ ॥ चतुर्षुकेंद्रेषुभवंतिपापावित्तस्थिताश्चापिचपाप

खेटाः ॥ नरोदरिद्रोगतितरांनिरुक्तोभयंकरश्चात्मकुलोद्भवानाम् ॥ २२ ॥ सुतास्थितोवायदिमूर्त्तिवर्त्तीबृहस्पतौराज्यगतःशशांकः ॥ नरस्तपस्वीविजि
तेंद्रियश्चस्याद्राजसोबुद्धिविराजमानः ॥ २३ ॥ कन्यायांचतुलाधरेसुरगुरुर्मेषेवृषेवाभृगुः सौम्योवृश्चिकराशिगःशुभखगैर्दृष्टःकुलश्रेष्ठताम् ॥ नूनं
यातिनरोविचारचतुरोऽप्यौदार्यजातादरोनित्यानंदभरोगुणैर्वरतरोनिष्ठापरोवित्तवान् ॥ २४ ॥ षष्ठेससौरौभवतोबुधारौनरोभवेच्चौर्यपरोनितांतम् ॥
स्वकर्मसामर्थ्यविशेषविशेषात्परांघ्रिपाणीन्कुगुणोह्निनत्ति ॥ २५ ॥ प्रसूतिकालेकिलयस्यजंतोःकर्केऽर्कजश्चेन्मकरेमहीजः ॥ चौर्यप्रसंगोद्भवचंड
दंडाच्छाखादिखंडानिभवंतिनूनम् ॥ २६ ॥ कुंभेचमीनेमिथुनाभिधानेशरासनेस्युर्यदिपापखेटाः ॥ कुचेष्टितःस्यात्पुरुषोनितांतंवज्रेणनूनंनिधनंहि
तस्य ॥ २७ ॥ यस्यप्रसूतौखलुनैधनस्थःसौम्यग्रहःसौम्यनिरीक्षितश्च ॥ तीर्थान्यनेकानिभवंतितस्यनरस्यसम्यक्मतिसंयुतस्य ॥ २८ ॥ बुधात्रि
भागेनयुतेविलग्नेकेंद्रस्थचंद्रेणनिरीक्षितेच ॥ शिष्टान्वयेयद्यपिजातजन्मास्यान्नीचकर्मामनुजःप्रकामम् ॥ २९ ॥ भानौद्वितीयेभवनेशनिश्चेन्निशी
थिनीशोगगनाश्रितश्च ॥ भूनंदनेवैमदनेतदानींस्यान्मानवोहीनकलेवरःसः॥ ३० ॥ पापांतरालेचभवेत्कलावान्तथाऽर्कसूनुर्मदनालयस्थः ॥ कलेव
रंस्याद्विकलंजनस्यश्वासक्षयप्लीहकगुल्मरोगैः ॥ ३१ ॥ शशीदिनेशस्ययदानवांशेभवेद्दिनेशःशशिनोनवांशे ॥ एकत्रसंस्थौयदितौभवेतां
लक्ष्मीविहीनोमनुजःसनूनम् ॥ ३२ ॥ व्ययेऽरिभावेनिधनेधनेचनिशाकरारार्कशनैश्चराःस्युः बलान्वितास्तेत्वनिलाधिकत्वात्तेजोविहीनेनयनेप्रकुर्युः
॥ ३३ ॥ पापास्त्रिपुत्रायगताभवंतिविलोकितानैवशुभैर्नभोगैः ॥ कुर्वंतितेकर्णविनाशनंचजामित्रयाताःखलुकर्मघातम् ॥ ३४ ॥ धनव्यय
स्थानगतश्चशुक्रोवक्रोऽथवाकर्णरुजंकरोति ॥ नक्षत्रनाथोयदितत्रसंस्थोदृग्दोषकारीकथितोमुनींद्रैः ॥ ३५ ॥ एतेहियोगाःकथितामुनींद्रैःसां
द्रंबलंयस्यनभश्चरस्य ॥ कल्प्यंफलंतस्यचपाककालेसुनिर्मलायस्यमतिस्तुतेन ॥ ३६ ॥ इतिजातकाभरणेतनुभावः ॥

भ० २

॥अथधनभाव ः॥ ॥ स्वर्णादिधातुक्रयविक्रयश्चरत्नादिकोशोऽपिचसंग्रहश्च ॥ एतत्समस्तंपरिचिंतनीयंधनाभिधानेभवनेसुधीभिः ॥ १ ॥भा
नुभूतनयभानुतनूजैश्चेद्धनस्यभवनंयुतदृष्टं ॥ जायतेहिमनुजोधनहीनःकिंपुनःकृशशशांक्षितयुक्तम् ॥ २ ॥ धनालयस्थौकिलमंगलेंदूदृग्दोषदौसंदवि
लोकनेन ॥ शनिर्धनस्थानगतःकरोतिधनाभिवृद्धिंचबुधेनदृष्टः ॥ ३ ॥ धनेदिनेशोऽतिधनानिनूनंकरोतिमंदेननचेक्षितश्च ॥ शुभाभिधानाधनभावसं
स्थानानाधनाभ्यागमनानिकुर्युः ॥ ४ ॥ गीर्वाणवंद्योद्रविणोपयातःसौम्येक्षितश्चेद्द्रविणंकरोति ॥ सोमेनदृष्टोधनभावसंस्थःसोमस्यसूनुर्धनहानिदःस्या
त् ॥५॥ धनस्थितोज्ञेनविलोकितश्चकृशःशशांकोपिधनादिकानाम् ॥ पूर्वार्जितानांकुरुतेविनाशंनवीनवित्तप्रतिबंधनंच ॥ ६ ॥ वित्तस्थितोदैत्य
गुरुःकरोतिवित्तागमंसोमसुतेनदृष्टः ॥ सएवसौम्यग्रहयुक्तदृष्टःप्रकृष्टवित्ताधिकरोनराणाम् ॥ ७ ॥ इतिधनभावः ॥ ॥ ॥ अथ
सहजभावः ॥ सहोदराणामथकिंकराणांपराक्रमाणामुपजीविनांच ॥ विचारणाजातकशास्त्रविद्भिस्तृतीयभावेनियमेनकार्या ॥ १ ॥ पापा
लयंचेत्सहजंसमस्तैःपापैःसमेतंप्रविलोकितंच ॥ भवेदभावःसहजोपलब्धेस्तद्वैपरीत्येनतदाप्तिरेव ॥ २ ॥ क्षेपकः॥ अग्रेजातंरविर्हंतिपृष्ठेजातंश
नैश्चरः ॥ अग्रजंपृष्ठजंहंतिसहजस्थोधरासुतः ॥ ३ ॥ नवांशकायेसहजालयस्थाःकलानिधिक्षोणिसुतप्रदृष्टाः ॥ तावन्मिताःस्युःसहजाभगिन्य
स्त्वन्येक्षितावैपरिकल्पनीयाः ॥ ४ ॥ कुजेनदृष्टेरविजेऽनुजस्थेनश्यंतिजाताःसहजास्सुतस्य ॥ दृष्टेचतस्मिन्गुरुभार्गवाभ्यांशश्वच्छुभंस्यादनुजे
पुनूनम् ॥ ५ ॥ सौम्येनभूमीतनयेनदृष्टःकरोतिनाशंरविजोनुजानाम् ॥ शशांकवर्गेसहजेकुजेनदृष्टेचरोगाःसहजाभवेयुः ॥ ६ ॥ दिवामणौपु
ण्यगृहेस्वगेहेसंदेहएवाऽनुजजीवितस्य ॥ एकःकदाचिच्चिरजीवितश्चभ्राताभवेद्भूपतिनासमेतः ॥ ७ ॥ चंद्रमायदिपापानांत्रितयेनप्रदृश्यते ॥ मातृ
नाशोभवेत्तस्ययदिनोवीक्षितःशुभैः ॥ ८ ॥ इतिसहजभावः ॥ ॥ अथसुहृद्भावः ॥ ॥ सुहृद्गृहग्रामचतुष्पदानांक्षेत्रोद्यमालोकनकंचतुर्थे ॥

दृष्टेः शुभानांशुभयोगतोवाभवेत्प्रभूतिर्नियमेनतेषाम् ॥ १ ॥ लग्नेचैवयदाजीवोधनेसौरिश्चसंस्थितः ॥ सप्तमेभवनेपापःपरिवारक्षयंकरः ॥ २ ॥ पापै
स्त्रिभिश्चंद्रमसिप्रदृष्टेस्यान्माननाशः शुभदृष्टिहीने ॥ व्ययास्तलग्नेष्वशुभाः स्थिताश्चेत्कुर्वंतितेवैपरिवारनाशम् ॥ ३ ॥ शनिर्धनेसंजननेयदिस्याल्लग्नेविलग्नः
सुरराजमंत्री ॥ सिंहीसुतः सप्तमभावयातोजातस्यजंतोर्जननीनजीवेत् ॥ ४ ॥ इतिसुहृद्भावः ॥ ॥ अथसुतभावः ॥ ॥ बुद्धिप्रबंधात्मजमंत्रविद्या
विनेयगर्भस्थितिनीतिसंस्थः ॥ सुताभिधानेभवनेनराणांहोरागमज्ञैः परिचिंतनीयम् ॥ १ ॥ लग्नेद्वितीयेयदिवातृतीयेविलग्ननाथेप्रथमः सुतः स्यात् ॥ तुर्ये
स्थितेऽस्मिंश्चसुतोद्वितीयः पुत्रीसुतोवेतिपुरः प्रकल्प्यम् ॥ २ ॥ सुताभिधानंभवनंशुभानांयोगेनदृष्ट्यासहितंविलोक्य ॥ संतानयोगंप्रवदेन्मनीषीविपर्य
यत्वेहिविपर्ययः स्यात् ॥ संतानभावोनिजनाथदृष्टः संतानलब्धिंशुभदृष्टियुक्तः ॥ करोतिपुंसामशुभैः प्रदृष्टः स्वस्वाम्यदृष्टोविपरीतमेव ॥ ४ ॥ लग्ने
वित्तेतृतीयेवालग्नेशोऽपत्यमग्रिमम् ॥ तुर्येजन्माद्वितीयस्यपुरः पुत्र्यादिजन्मच ॥ ५ ॥ द्विदेहसंस्थाभृगुभौमचंद्राः संतानमादौजनयंतिनूनम् ॥ एतेपुन
र्धीन्विगतानकुर्युः पश्चात्तथादौगदितंमहद्भिः ॥ ६ ॥ संतानभावेगगनेचराणांयावन्मितानामिहदृष्टिरस्ति ॥ स्यात्संततिस्तत्प्रमितानृसंज्ञैर्नराश्चकन्याप्र
मदाभिधानैः ॥ ७ ॥ संतानभावांकसमानसंख्यास्यात्संततिर्वेतिवदंतिकेचित् ॥ नीचोच्चमित्रादिगृहस्थितानांदृष्ट्याशुभंवाऽशुभमर्भकानाम् ॥ ८ ॥
नवांशतुल्याप्रभवाऽत्रसंख्यादृष्ट्याशुभानांद्विगुणावगम्या ॥ क्लिष्टाचपापग्रहदृष्टियोगान्मिश्राचमिश्रग्रहदृष्टितोऽत्र ॥ ९ ॥ सुताभिधानेभवनेयदिस्यात्खल
स्यराशिः खलखेटयुक्तः ॥ सौम्यग्रहालोकनवर्जितश्चसंतानहीनोमनुजस्तदानीम् ॥ १० ॥ कविः कलत्रेदशमेमृगांकः पातालयाताश्चखलाभवं
ति ॥ प्रसूतिकालेयदिमानवंतेसंतानहीनंजनयंतिनूनम् ॥ ११ ॥ सुतेसितांशेचसितेनदृष्टेबहून्यपत्यानिविधोरपीदम् ॥ दासीभवान्यात्मजभावनाथेया
वन्मितेंशेशिशुसंमितिः स्यात् ॥ १२ ॥ शुक्रेंदुवर्गेणयुतेसुताख्येयुक्तेक्षितेवाभृगुचंद्रमोभ्याम् ॥ भवंतिकन्याः समराशिवर्गेपुत्राश्चतस्मिन्विषमाभिधाने

१३ ॥ मंदस्यराशिःसुतभावसंस्थोमंदेनयुक्तःशशिनेक्षितश्च ॥ दत्तात्मजाप्तिःशशिवत्बुधेऽपिक्रीतःसुतस्तस्यनरस्यवाच्यः ॥ १४ ॥ संताना
धिपतेःपंचषष्ठारिःफास्थितेखले ॥ पुत्राभावोभवेत्तस्ययदिजातोनजीवति ॥ १५ ॥ मंदस्यवर्गेसुतभावसंस्थेनिशाकरस्थेऽपिचवीक्षितेस्मिन् ॥ दिवा
करेणोशनसानरस्यपुनर्भवासंभवसूनुलब्धिः ॥ १६ ॥ शनेर्गणःसद्मनिपुत्रभावेबुधेक्षितेनोरविभूमिजाभ्याम् ॥ पुत्रोभवेत्क्षेत्रभवोऽथबोधेगणेऽपिगे
हेरविजेनदृष्टे ॥ १७ ॥ नवांशकाःपंचमभावसंस्थायावन्मितैःपापखगैःप्रदृष्टाः ॥ नश्यंतिगर्भाःखलुतत्प्रमाणाचेद्वीक्षणंनोशुभखेचराणाम् ॥
१८ ॥ भूनंदनोनंदनभावयातोजातंचजातंतनयंनिहंति ॥ दृष्टेयदाचित्रशिखंडिजेनभृगोःसुतेनप्रथमोपपन्नम् ॥ १९ ॥ इतिसुतभावः ॥
॥ अथशत्रुभावः ॥ ॥ वैरिव्रातःक्रूरकर्मामयानांचित्ताशंकामातुलानांविचारः ॥ होरापारावारपारंप्रयातैरेतत्सर्वंशत्रुभावेविचिंत्यम् ॥ १ ॥
दृष्टिर्युतिर्वाखलखेचराणामरातिभावेऽरिविनाशनंस्यात् ॥ शुभग्रहाणांयुतिदृष्टितोऽत्रशत्रूद्गमोऽप्यामयसंभवःस्यात् ॥ २ ॥ इतिशत्रुभावः ॥ ॥ अ
थजायाभावः ॥ रणांगणंचापिवणिक्क्रियाश्चजायाविचारागमनप्रमाणम् ॥ शास्त्रप्रवीणैर्हिविचारणीयंकलत्रभावेकिलसर्वमेतत् ॥ १ ॥ मूर्तेःकलत्र
स्यनवांशकोवाद्विषट्कभागस्त्रिलवःशुभानाम् ॥ अनेनयोगेनहिमानवानांस्यादंगनानामचिरादवाप्तिः ॥ २ ॥ सौम्यैर्युतंसौम्यमसौम्यदृष्टंजायागेहं
देहिनामंगनाप्तिम् ॥ कुर्यान्नूनंवैपरीत्यादभावोमिश्रत्वेनप्राप्तिकालेप्रलापः ॥ ३ ॥ लग्नात्व्ययेवारिपुमंदिरेवादिवाकरेंदूभवतस्तदानीम् ॥ स्यान्मानवस्या
त्मजएकएकभार्याऽपिचैकेतिवदंतिसंतः ॥ ४ ॥ गंडांतकालेऽपिकलत्रभावेभृगोःसुतेलग्नगतेऽर्कजाते ॥ वंध्यापतिःस्यान्मनुजस्तदानींशुभेक्षितंनोभ
वनंखलेन ॥ ५ ॥ व्ययालयेवामदनालयेवाखलेषुबुद्ध्यालयगेहिमांशौ ॥ कलत्रहीनोमनुजस्तनूजैर्विवर्जितःस्यादितिवेदितव्यम् ॥ ६ ॥ प्रसूतिका
लेचकलत्रभावेयमस्यभूमीतनयस्यवर्गे ॥ ताभ्यांप्रदृष्टेव्यभिचारिणीस्याद्भर्तापितस्याव्यभिचारकर्ता ॥ ७ ॥ शुक्रेंदुपुत्रौचकलत्रसंस्थौकलत्रहीनंकुरु

तानंरतौ ।। शुभेक्षितौतौवयसाविरामिकामंचरामांलभतेमनुष्यः ॥ ८ ॥ शुक्रेंदुजीवशशिजैःसकलैस्त्रिभिश्चद्वाभ्यांकलत्रभवनेचतथैककेन ॥ ए
षांगृहेविषमभेऽथविलोकितेवासंतितत्रयोभवनवर्गखगस्यभावाः ॥ ९ ॥ कलत्रभावेचनवांशतुल्यानरस्यनार्योग्रहवीक्षणाद्वा ॥ एकैवभौमार्कनवांशके
चजामित्रभावस्थबुधार्कयोर्वा॥ १० ॥शुक्रस्यवर्गेणयुतेकलत्रेबह्वंगनातिर्भृगुवीक्षणेन ।। शुक्रेक्षितेसौम्यगणैगनानांबाहुल्यमेवाशुभवीक्षणान्न ।।११।।
महीसुतेसप्तमभावयातेकांतावियुक्तःपुरुषस्तदास्यात् ॥ मंदेनदृष्टेम्रियतेऽपिलब्ध्वाशुभग्रहालोकनवर्जितेऽस्मिन् ॥ १२ ॥ पत्नीस्थानेयदाराहुःपाप
युग्मेनवीक्षितः ॥ पत्नीयोगस्तदानस्याद्भूताऽपिम्रियतेऽचिरात् ।।१३।। षष्ठेचभवनेभौमःसप्तमेराहुसंभवः ।। अष्टमेचयदासौरिस्तस्यभार्यानजीवति ।।१४॥
इतिसप्तमभावः।। ॥अथसंक्षेपतोऽष्टमभावः।। ।। नद्युत्तारास्त्रंतवैषम्यदुर्गशस्त्रंचायुःसंकटेचेतिसर्वम् ॥ रंध्रस्थानेसर्वदाकल्पनीयंप्राचीनानामाज्ञया
जातकज्ञैः ।।१ ।। तुर्यस्थानेयदाभानुःशशिनाचाविलोकितः ।। यदिनोवीक्षितःसौम्यैर्मरणंतत्रनिर्दिशेत् ।। २ ।। होराविद्भिश्चाऽष्टमस्थानयाते
नानाभेदैर्यत्फलंतत्प्रदिष्टम् ।। रिष्टाध्यायेचाऽपिनिर्याणकेवायत्नान्नूनंप्रोच्यनेतच्चसर्वम् ।। ३ ।। रिष्टाध्यायेनिर्याणेवाऽग्रेसविशेषंनिरूपयिष्यामः ।।
इतिसंक्षेपतोऽष्टमभावः ।। ।। अथभाग्यभावः ।। ।। धर्मक्रियायांहिभवेत्प्रवृत्तिर्भाग्योपपत्तिर्विमलंचशीलम् ।। तीर्थप्रयाणंप्रणयःपुराणैःपुण्यालये
सर्वमिदंप्रदिष्टम् ।।१।। विहायसर्वैगणकैर्विचिंत्यंभाग्यालयंकेवलमत्रयत्नात् ।। आयुश्चमाताचपिताचवंशोभाग्यान्वितेनैवभवंतिधन्याः ।। २ ।। मूर्तैश्चा
पिनिशापतेश्चनवमंभाग्यालयंकीर्तितंतत्तत्स्वामियुतेक्षितंप्रकुरुतेभाग्यंस्वदेशोद्भवम् ।। चेदन्यैर्विषयांतरेऽत्रशुभदाःस्वोच्चादिगाःसर्वदाकुर्युर्भाग्यमसाधवोऽ
तिविबलादुःखोपलब्धिपरां ।। ३ ।। भाग्येश्वरोभाग्यमतोऽस्तिकिंवासुस्थानगःसारविराजमानः ।। भाग्याश्रितःकोऽस्तिविचार्यसर्वमनल्पमल्पंपरिक
ल्पनीयम् ।। ४ ।। तनुत्रिसूनूपगतोग्रहश्चेद्योवाधिवीर्योनवमंप्रपद्येत् ।। यस्यप्रसूतौसतुभाग्यशालीविलासशीलोबहुलार्थयुक्तः ।।५ ।। चेद्भाग्य

गामिखचरःस्वगेहेसौम्येक्षितोयस्यनरस्यसूतौ ॥ भाग्याधिशालीस्वकुलावतंसोहंसोयथामानसराजमानः ॥ ६ ॥ पुर्णेंदुयुक्तोरविभूमिपुत्रौभाग्यस्थि
तौसत्वसमन्वितौच ॥ वंशानुमानात्सचिवंनृपंवाकुर्वंतितेसौम्यदृशांविशेषात् ॥ ७ ॥ स्वोच्चोपगोभाग्यगृहेनभोगोनरस्ययोगंकुरुतेसुलक्ष्म्या ॥ सौ
म्येक्षितोऽसौयदिसौम्यपालंदंतावलोत्कृष्टविलासशालिः ॥ ८ ॥ इतिभाग्यभावः ॥ ॥ अथदशमभावः ॥ व्यापारमुद्रानृपमानराज्यंप्रयोजनंचाऽ
पिपितुस्तथैव ॥ महत्पदाप्तिःखलुसर्वमेतत्राज्याभिधानेभवनेविचार्यम् ॥ १ ॥ समुदितमृषिवर्यैर्मानवानांप्रयत्नादिहहिदशमभावेसर्वकर्मप्रकामम्
॥ गगनगपरिदृष्ट्याराशिखेटस्वभावैःसकलमपिविचिंत्यंसत्वयोगात्सुधीभिः ॥ २ ॥ तनोःसकाशाद्दशमेशशांकेवृत्तिर्भवेत्तस्यनरस्यनित्यम् ॥ ना
नाकलाकौशलवाग्विलासैःसर्वोद्यमैःसाहसकर्मभिश्च ॥ ३ ॥ तनोःशशांकाद्दशमेबलीयान्स्याज्जीवनंतस्यखगस्यवृत्त्या ॥ बलान्विताद्वर्गपतेस्तु
यद्वावृत्तिर्भवेत्तस्यखगस्यपाके ॥ ४ ॥ दिवामणिःकर्मणिचंद्रतन्वोर्द्रव्याण्यनेकोद्यमवृत्तियोगात् ॥ सत्वाधिकत्वंनरनायकत्वंपुष्टत्वमंगेमनसःप्रसा
दः ॥ ५ ॥ लग्नेंदुतःकर्मणिचेन्महीजःस्यात्साहसःक्रौर्यनिषादवृत्तिः ॥ नूनंनराणांविषयाभिसक्तिर्दूरेनिवासःसहसाकदाचित् ॥ ६ ॥ लग्नेंदु
भ्यांकर्मगोरौहिणेयःकुर्याद्द्रव्यंनायकत्वंबहूनाम् ॥ शिल्पेऽभ्यासःसाहसंसर्वकार्येविद्वद्वृत्त्याजीवितंमानवानाम् ॥ ७ ॥ विलग्नतःशीतमयूखतोवामा
नेमघोनःसचिवोयथास्यात् ॥ नानाधनाभ्यागमनानिपुंसांविचित्रवृत्त्यानृपगौरवंच ॥ ८ ॥ होरायाश्चनिशाकराद्भृगुसुतोमेषूरणेसंस्थितोनानाशास्त्र
कलाकलापविलसद्वृत्त्यादिशेज्जीवनम् ॥ दानेसाधुमतिंतथाविनयतांकामंधनाभ्यागमंमानंमानवनायकादविरलंशीलंविशालंयदा ॥९॥ होरायाश्चसुधा
कराद्रविसुतःसूतौखमध्यास्थितोवृत्तिंहीनतरांनरस्यकुरुतेकार्श्यंशरीरेसदा ॥ खेदंवादभयंचधान्यधनयोर्हानित्वमुच्चैर्मनश्चित्तोद्वेगसमुद्भवंनचपलंशीलं
चनोनिर्मलम्॥१०॥ सूर्यादिभिर्व्योमचरैर्विलग्नादिंदोःस्वपाकेक्रमशःप्रकल्प्या॥ अर्थोपलब्धिर्जनकाज्जनन्याःशत्रोर्हितादभ्रातृकलत्रभृत्यात्॥११॥

रवींदुलग्नास्पदसंस्थितांशपतेस्तुवृत्यापरिकल्पयेत्ताम् ॥ सदौषधोर्णादितृणैःसुवर्णैर्दिवामणिर्वृत्तिविधिंविदध्यात् ॥ १२ ॥ नक्षत्रनाथोऽत्रकलत्र
तश्चजलाशयोत्पन्नकृषिक्रियादेः ॥ कुजोग्निसत्साहसधातुशस्त्रैःसोमात्मजःकाव्यकलाकलापैः ॥ १३ ॥ जीवोद्विजात्माकरदेवधर्मैःशुक्रोमाहि
ष्यादिकरौप्यरत्नैः ॥ शनैश्वरोनीचतरप्रकारैःकुर्यान्नराणांखलुकर्मवृत्तिम् ॥ १४ ॥ कर्मस्वामीग्रहोयस्यनवांशेपरिवर्त्तते ॥ तत्तुल्यकर्मणावृत्तिं
निर्दिशंतिमनीषिणः ॥ १५ ॥ मित्रारिगेहोपगतैर्नभोगैस्ततस्तथाऽर्थःपरिकल्पनीयः ॥ तुंगेपतंगेस्वगृहेत्रिकोणेस्यादर्थसिद्धिर्निजबाहुवीर्यात् ॥१६॥
लग्नार्थलाभोपगतैःसवीर्यैःशुभैर्भवेद्धनसौख्यमुच्चैः ॥ इतीरितंपूर्वमुनिप्रवर्यैर्बलानुमानात्परिचिंतनीयम् ॥ १७ ॥ इतिदशमभावः ॥ ॥ अथ
लाभभावः ॥ गजाश्वहेमांबररत्नजातमांदोलिकामंगलमंडनानि ॥ लाभःकिलैषामखिलंविचार्यमेतत्तुलाभस्यगृहेग्रहज्ञैः ॥ १ ॥ सूर्येण
युक्तेचविलोकितेवालाभालयेतस्यगणोऽत्रचेत्स्यात् ॥ भूपालतश्चौरकुलात्कलेर्वाचतुष्पदादेर्बहुधाधनाप्तिः ॥ २ ॥ चंद्रेणयुक्तंचविलोकितंवाला
भालयेचंद्रगणाश्रितंचेत् ॥ जलाशयस्त्रीगजवाजिवृद्धिःपूर्णैर्भवेत्क्षीणतरेविलोमम् ॥ ३ ॥ लाभालयंमंगलयुक्तदृष्टंप्रकृष्टभूषामणिहेमलब्धिः ॥ विचि
त्रयात्राबहुसाहसीस्यान्नानाकलाकौशलबुद्धियोगैः ॥ ४ ॥ लाभेसौम्यगणाश्रितेसतियुतेसौम्येनसंवीक्षितेनानाकाव्यकलाकलापविधिनाशिल्पेनलि
प्यासुखम् ॥ युक्तिद्रव्यमयोभवेद्धनचयःसत्साहसैरुद्यमैःसख्यंचापिवणिक्जनैर्बहुतरंक्षौबैर्नृणांकीर्तितम् ॥ ५ ॥ यज्ञक्रियासाधुजनानुयातोराजा
श्रितोत्कृष्टकृपोनरःस्यात् ॥ द्रव्येणहेमप्रचुरेणयुक्तोलाभेगुरोर्वर्गयुगीक्षणंचेत् ॥ ६ ॥ लाभालयंभार्गववर्गयातंयुतेक्षितंवायदिभार्गवेण ॥ वेश्याज
नैर्वापिगमागमैर्वासद्रौप्यमुक्ताप्रचुरास्वलब्धिः ॥७ ॥ लाभवेश्मनिशनीक्षितियुक्तेतद्गणेनसहितेसतिपुंसाम् ॥ नीललोहमहिषीगजलाभोग्रामवृंदपुर
गौरवमिश्रः ॥ ८ ॥ युक्तेक्षितेलाभगृहेसुखाख्येवर्गेशुभानांसमवस्थितेच ॥ लाभोनराणांबहुधाऽथवाऽस्मिन्सर्वग्रहैर्युक्तनिरीक्ष्यमाणे ॥९॥ इतिला

भभावः ॥ ॥ अथव्ययभावः ॥ ॥ हानिर्दीनंव्ययश्चाऽपिदंडोनिर्बंधएवच ॥ सर्वमेतद्व्ययस्थानेचिंतनीयंप्रयत्नतः ॥ १ ॥ व्ययालय
क्षीणकरःकलावान्सूर्योऽथवाद्वावपितत्रसंस्थौ ॥ द्रव्यंहरेद्भूमिपतिस्तुतस्यव्ययालयेवाकुजदृष्टियुक्ते ॥ २ ॥ पूर्णेंदुसौम्येज्यसिताव्ययस्थाःकुर्वं
तिसंस्थांधनसंचयस्य ॥ प्रांत्यस्थितेसूर्यसुतेकुजेनयुक्तेक्षितेवित्तविनाशनंस्यात् ॥ ३ ॥ ॥ इतिव्ययभावः ॥ ॥
अथभावफलोपयुक्तत्वेनरिष्टाध्यायोनिरूप्यते ॥ ॥ लग्नेंद्वोश्चकलत्रपुत्रभवनेस्वस्वामिसौम्यग्रहैर्युक्तेवाऽथविलोकितेखलुतदातत्प्राप्तिरावश्यकी ॥ ल
ग्नेचेत्सवितास्थितोरविसुतोजायाश्रितोमृत्युकृत्जायायाश्चमहीसुतःसुतगतःकुर्यात्सुतानांक्षातिं॥ १ ॥ असौम्यमध्यस्थितभार्गवश्चेत्पातालरंध्रेखलखे
टयुक्ते ॥ सौम्यैरदृष्टेभृगुजेचपत्नीनाशोभवेत्पाशहुताशनाद्यैः ॥ २ ॥ दिवाकरेंदूव्ययवैरियातौजायापतीएकविलोचनौस्तः॥कलत्रधर्मात्मजगौसितार्कौपु
मान्भवेत्क्षीणकलत्रएव ॥ ३ ॥ भसंधियातेचसितेस्मरस्थेतनौप्रयत्नेनतुभानुसूनौ ॥ वंध्यापतिःस्यान्मनुजस्तदानींसुतालयंनोशुभदृष्टियुक्तम् ॥ ४ ॥ क्रू
राश्चहोराःस्मरारिःफयाताःसुतालयेहीनबलःकलावान् ॥ एवंप्रसूतौकिलयस्ययोगोभवेत्सभार्यातनयैर्विहीनः ॥ ५ ॥ सितेऽस्तयातेशनिभौमवर्गे
भौमार्कदृष्टेपरदारगामी ॥ मंदारचंद्रायदिसंयुताःस्युःपौंश्चल्यसक्तौरमणौनरौस्तः ॥ ६ ॥ द्यूनेर्कजारौसभृगौशशांकादपुत्रभार्यंकुरुतोनरंतौ ॥
स्यातांनृनारीखगयोःस्मरस्थौसौम्येक्षितौतौशुभदौनृनार्योः ॥ ७ ॥ परस्परांशोपगतौरवींदूरोषामयंतौकुरुतोनराणाम् ॥ एकैकगेहोपगतौतुतौवा
तमेवरोगंकुरुतोनितांतम् ॥ ८ ॥ मंदावनीसूनुरवींदवश्चेद्रंध्रारिवित्तव्ययभावसंस्थाः ॥ आंध्यंभवेत्सारसमन्वितस्यखेटस्यदोषात्पुरुषस्यनूनम् ॥ ९ ॥
मृगालिगोकर्कटकास्त्रिकोणेप्रसूतिकालेखलखेटयुक्ताः ॥ निरीक्षितावाजनयंतिजातंकुष्ठेनयुक्तंप्रवदंतिसंतः ॥ १० ॥ मंदार्कचंद्रास्त्रिसुताय
धर्मेसौम्यैर्नयुक्तानचवीक्षिताचेत् ॥ कर्णप्रणाशंजनयंतिनूनंस्मरस्थितास्तेदशनाभिघातम् ॥ ११ ॥ ग्रस्तेविधौलग्नगताश्चपापास्त्रिकोणगाजन्मपिशा

चकस्य ॥ ग्रस्तेविधौलग्नगतेतथैवनेत्रोपघातः खलुकल्पनीयः ॥ १२ ॥ लग्नस्थितेदेवगुरौहितेऽस्तेशनौचवाताधिकतानितांतम् ॥ जीवेविलग्नेऽवनिनंदनेऽस्तेमदोद्धतः स्यात्पुरुषोविशेषात् ॥ १३ ॥ स्मरेत्रिकोणेधरणीतनूजेशनौतनौवापवनप्रकोपः ॥ क्षीणेंदुमंदौव्ययभावयातौतदापिवाताधिकतानराणाम् ॥१४॥ वंशच्छेदकरः शशांकभृगुजक्रूरैः खकामांबुगैः शीलीकेंद्रगतार्किणाबुधयुतत्र्यंशेसमालोकिते ॥ अंत्येदैत्यगुरौदिनेश्वरयुतस्यांशेचदासीयुतोनीचः कामगयोः खरांशुशशिनोः सौरेणसंदृष्टयोः ॥ १५ ॥ वयोराशिस्वनक्षत्रमेकीकृत्यपृथक्पृथक् ॥ द्विचतुस्त्रिगुणंकृत्वासताऽष्टरसभाजितम् ॥ १६ ॥ आद्यंतयोर्भवेद्दुःखीमध्येशून्यंधनक्षयः ॥ स्थानत्रयेप्यशेषंतुमृत्युःसांकेषुवैजयी ॥ १७ ॥ इत्यरिष्टाध्यायः ॥

॥ अथरविभावः ॥ लग्नेऽर्केऽल्पकचः क्रियालसतनुः क्रोधीप्रचंडोन्नतोयामीलोचनरूक्सुकर्कशतनुः शूरोऽक्षमीनिर्घृणः ॥ फुल्लाक्षः शशिभेक्रियेस्थितिहरः सिंहेनिशांधः पुमान्दारिद्र्योपहतोविनष्टतनयः सस्थस्तुलासंज्ञके ॥ १ ॥ धनसुतोत्तमवाहनवर्जितोहतमतिः सजनोज्झितसौहृदः ॥ परगृहोपगतोहिनरोभवेद्दिनमणेर्द्रविणेयदिसंस्थितिः ॥ २ ॥ प्रियंवदः स्याद्धनवाहनाढ्यः सुकर्णचित्तोनुचरान्वितश्च ॥ मितानुजः स्यान्मनुजोबलीयान्दिनाधिराजेसहजेऽधिसंस्थे ॥ ३ ॥ सौख्येनयानेनधनेनहीनंतातस्यचित्तोपहतिप्रवृत्तम् ॥ चलन्निवासंकुरुतेपुमांसंपातालशालीनलिनीविलासी ॥ ४ ॥ स्वल्पात्मजंशैलदुर्गेशभक्तंसौख्यायुक्तंसत्क्रियार्थैर्विमुक्तम् ॥ भ्रांतस्वांतंमानवंहिप्रकुर्यात्सूनुस्थानेभानुमान्वर्त्तमानः ॥५॥ शश्वत्सौख्येनान्वितः शत्रुहंतासत्वोपेतश्चारुयानोमहौजाः ॥ पृथ्वीभर्तुःस्यादमात्योहिमर्त्यः शत्रुक्षेत्रेमित्रसंस्थोयदिस्यात् ॥ ६ ॥ श्रियाविमुक्तोहतकायकांतिर्भयामयाभ्यांसहितः कुशीलः ॥ नृपप्रकोपार्त्तिकृशोमनुष्यः सीमंतिनीसद्मनिपद्मिनीशे ॥ ७ ॥ नेत्राल्पत्वंशत्रुवर्गाभिवृद्धिर्बुद्धिभ्रंशः पूरुषस्यातिरोषः ॥ अर्थाल्पत्वंकार्श्यमंगेविशेषादायुःस्थानेपद्मिनीप्राणनाथे ॥ ८ ॥ धर्मकर्मनिरतश्चसन्मतिः पुत्रमित्रजसुखान्वितः सदा ॥ मातृवर्गविषमोभवेन्नरस्त्रित्रिकोणभवनेदिवाम

णौ ॥ ९ ॥ सद्बुद्धिवाहनधनागमनानिनूनंभूपप्रसादसुतसौख्यसमन्वितानि ॥ साधूपकारकरणंमणिभूषणानिमेषूरणेदिनपतिः कुरुतेनराणाम्॥ १० गीतप्रीतिंचारुकर्मप्रवृत्तिंचंचत्कीर्तिंवित्तपूर्तिंनितांतम् ॥ भूपात्प्राप्तिंनित्यमेवप्रकुर्यात्प्रातिस्थानेभानुमान्मानवानाम् ॥ ११ ॥ तेजोविहीनेनयनेभवेत्तांताते नसाकंगतचित्तवृत्तिः ॥ विरुद्धबुद्धिर्व्ययभावयातेकांतेनालिन्याःफलमुक्तमार्यैः ॥१२॥ इतिरविभावः ॥ ॥ अथचंद्रभावः ॥ ॥दाक्षिण्यरूपधनभोगगुणैर्वरेण्यश्चंद्रेकुलीरवृषभाजगतेविलग्ने ॥ उन्मत्तनीचबधिरोविकलोऽथमूकः शेषेषुनाभवतिहीनतनौविशेषात् ॥ १ ॥ सुखात्मजद्रव्ययुतोविनीतोभवेन्नरःपूर्णविधौद्वितीये ॥ क्षीणेस्खलद्वाक्विधनोऽल्पबुद्धिर्न्यूनाधिकत्वेफलतारतम्यम् ॥ २ ॥ हिंस्रःसवर्गःकृपणोऽल्पबुद्धिर्भवेन्नरोबंधुजनाश्रयश्च ॥ दयाभयाभ्यांपरिवर्जितश्चद्विजाधिराजेसहजेप्रसूतौ ॥ ३ ॥ जलाश्रयोत्पन्नधनोपलब्धिंकृष्यंगनावाहनसूनुसौख्यम् ॥ प्रसूतिकालेकुरुतेकलावान्पातालसंस्थोद्विजदेवभक्तिम् ॥ ४ ॥ जितेंद्रियः सत्यवचाःप्रसन्नोधनात्मजावाप्तसमस्तसौख्यः ॥ सुसंग्रहीस्यान्मनुजःसुशीलःप्रसूतिकालेतनयालयेऽब्जे ॥ ५ ॥ मंदाग्निःस्यान्निर्दयःक्रौर्ययुक्तोनाल्यालस्योनिष्ठुरोदुष्टचित्तः ॥ रोषावेशात्यंतसंजातशत्रुःशत्रुक्षेत्रेरात्रिनाथेनरःस्यात् ॥६॥ महाभिमानीमदनातुरश्चनरोभवेत्क्षीणकलेवरश्च ॥ धनेनहीनोविनयेनचंद्रेचंद्राननस्थानविराजमाने ॥ ७ ॥ नानारोगः क्षीणदेहोऽतिनिःस्वश्चोरारातिक्षोणिपालाभितप्तः॥ चित्तोद्वेगैर्व्याकुलोमानवःस्यादायुः स्थानेवर्त्तमानेहिमांशौ ॥ ८ ॥ कलत्रपुत्रद्रविणोपपन्नःपुराणवार्त्ताश्रवणानुरक्तः॥ सुकर्मसत्तीर्थपरोनरःस्यात्यदाकलावान्नवमालयस्थः ॥ ९ ॥ क्षोणीपालादर्थलब्धिश्चशालाकीर्तिर्मूर्तिःसत्वसंतोषयुक्ता ॥ चंचल्लक्ष्मीःशीलसंशालिनीस्यान्मानस्थानेयामिनीनायकश्चेत् ॥१०॥ सन्माननानाविधवाहनातिः कीर्तिश्चसद्भोगगुणोपलब्धिः ॥ प्रसन्नतालाभविराजमानेताराधिराजेमनुजस्यनूनम् ॥ ११ ॥ हीनत्वंवैचारुशीलेनमित्रैर्वैकल्यंस्यान्नेत्रयोःशत्रुवृद्धिः ॥ रोषावेशः पूरुषाणांविशेषात्पीयूषांशौद्वादशेवेश्मनीह ॥ १२ ॥ इतिचंद्र

भावः ॥ ॥ अथभौमभावः ॥ ॥ अतिमतिभ्रमताचकलेवरंक्षतयुतंबहुसाहसमुग्रताम् ॥ तनुभृतांकुरुतेतनुसंस्थितोऽवनिसुतोगमनागमना
नि च ॥१॥ अधनतांकुजनाश्रयतांतथाविमतितांकृपयाऽतिहिहीनताम्॥ तनुभृतांविदधातिविरोधितांधननिकेतनगोऽवनिनंदनः ॥ २ ॥ भूपप्रसा
दोत्तमसौख्यमुच्चैरुदारताचारुपराक्रमश्च॥ धनानिचभ्रातृसुखोज्झितत्वंभवेन्नराणांसहजेमहीजे ॥ ३ ॥ दुःखंसुहृद्वाहनतःप्रवासःकलेवरेरुक्बलता
बलत्वम्॥ प्रसूतिकालेकिलमंगलाख्येरसातलस्थेफलमुक्तमार्यैः ॥ ४॥ कफानिलाद्व्याकुलताकलत्रान्मित्राच्चपुत्रादपिसौख्यहानिः ॥ मतिर्विलो
लाविपुलात्मजेऽस्मिनप्रसूतिकालेतनयालयस्थे॥ ५ ॥ प्राबल्यंस्याज्जाठरोऽग्नेर्विशेषाद्रोषावेशःशत्रुवर्गोपशांतिः ॥ सद्भिःसंगोऽनंगवृद्धिर्नराणांगो
त्रापुत्रेशत्रुसंस्थेप्रसूतौ ॥६॥ नानानर्थोव्यर्थचिंतोपसर्गैर्वैरिव्रातैर्मानवंहीनदेहम् ॥ दारागारात्यंतदुःखप्रतप्तंदारागारेऽगारकोऽयंकरोति ॥ ७ ॥
वैकल्यंस्यान्नित्रयोर्दुर्भगत्वंरक्तात्पीडानीचकर्मप्रवृत्तिः ॥ बुध्येरांध्यंसज्जनानांचनिंदारंध्रस्थानेमेदिनीनंदनेऽस्मिन् ॥ ८ ॥ हिंसाविधानेमनसःप्रवृत्तिर्
भूमीपतेर्गौरवतोऽर्थलब्धिम् ॥ क्षीणंचपुण्यंद्रविणंनराणांपुण्यास्थितःक्षोणिसुतःकरोति ॥ ९ ॥ विश्वंभरापतिसमत्वमतीवतोषंसत्साहसंपरजनोपकृ
तौप्रयत्नम् ॥ चंचाद्विभूषणमणिद्विविधागमाश्चमेषूरणेधरणिजः कुरुतेनराणाम्॥ १०॥ ताम्रप्रवालविलसत्कलधौतरक्तवस्त्रागमंसुललितानिचवाहना
नि ॥ भूपप्रसादसुकुतूहलमंगलानिदद्यादवातिभवनेहिसदावनेयः ॥ ११ ॥ स्वमित्रवैरंनयनातिबाधांक्रोधाभिभूतंविमलत्वमंगे ॥ धनव्ययंबंधनमल्पते
जोव्ययेधराजोविदधातिनूनम् ॥ १२ ॥ इतिभौमभावः ॥ अथबुधभावः ॥ ॥ शांतोविनीतःसुतरामुदारोनरःसदाचारपरोऽतिधीरः
॥विद्वान्कलाज्ञोविपुलात्मजश्चशीतांशुसूनौजननेतनुस्थे ॥ १ ॥ विमलशीलयुतोगुरुवत्सलःकुशलताकलितार्थमहत्सुखः ॥ विपुलकांतिसमुन्नतिसं
युतोधननिकेतनगेशशिनंदने ॥२॥ साहसेनिजजनैःपरियुक्तश्चित्तशुद्धिरहितोहतसौख्यः ॥ मानवःकुशलितेप्सितकर्त्ताशीतभानुतनयेऽनुजसंस्थे ॥

३ ॥ सद्वाहनैर्धान्यधनैः समेतः संगीतनृत्याभिरुचिर्मनुष्यः ॥ विद्याविभूषागमनाधिशालीपातालगेशीतलभानुसूनौ ॥ ४ ॥ पुत्रसौख्यसहितंबहुमित्रंमं
त्रवादकुशलंच सुशीलम् ॥ मानवंकिलकरोतिसलीलंशीतदीधितिसुतः सुतसंस्थः ॥ ५ ॥ वादप्रीतिःसामयोनिष्ठुरात्मानानारातिव्रातसंतप्तचित्तः ॥ नि
त्यालस्यव्याकुलःस्यान्मनुष्यःशत्रुक्षेत्रेरात्रिनाथात्मजेऽस्मिन् ॥ ६ ॥ चारुशीलविभवैरलंकृतः सत्यवाक्यनिरतोनरोभवेत् ॥ कामिनीकनकसूनुसंयुतः
कामिनीभवनगामिनींदुजे ॥ ७ ॥ भूपप्रसादात्तसमस्तसंपन्नरोविरोधीसुतरांसुगर्वः सर्वप्रयत्नान्यकृतापहर्त्तारंध्रेभवेच्चंद्रसुतःप्रसूतौ ॥ ८ ॥ उपकृतिकृतिवि
द्याचारुजातादरःस्यादनुचरधनसूनुप्राप्तहर्षोविशेषात् ॥ वितरणकरणोद्यन्मानसोमानवश्चेदमृतकिरणजन्मापुण्यधामागमोऽयम् ॥ ९ ॥ ज्ञानप्रज्ञाश्रेष्ठक
र्मामनुष्योनानासंपत्संयुतोराजमान्यः ॥ चंचल्लीलावाग्विलासाधिशालीमानस्थानेबोधनेवर्त्तमाने ॥ १० ॥ भोगाशक्तोऽत्यंतवित्तोविनीतोनित्यानंदश्चारुशी
लोबलिष्ठः ॥ नानाविद्याभ्यासकृन्मानवःस्याल्लाभस्थानेनंदनेशीतभानोः ॥ ११ ॥ दयाविहीनःसुजनोज्झितश्चस्वकार्यदक्षोविजितात्मपक्षः ॥ धूर्त्तो
नितांतंमलिनोनरःस्याद्व्ययोपपन्नेद्विजराजसूनौ ॥ १२ ॥ इतिबुधभावः ॥ अथगुरुभावः ॥ विद्यासमेतोऽभिमतोहिराज्ञांप्राज्ञःकृतज्ञोनि
तरामुदारः ॥ नरोभवेच्चारुकलेवरश्चतनुस्थितेचित्रशिखंडिसूनौ ॥ १ ॥ सद्रूपविद्यागुणकीर्तियुक्तःसंत्यक्तवैरोपिनरोगरीयान् ॥ त्यागीसुशीलोद्र
विणेनपूर्णोगीर्वाणवंद्येद्रविणोपयाते ॥ २ ॥ सौजन्यहीनःकृपणःकृतघ्नःकांतासुतप्रीतिविवर्जितश्च ॥ नरोऽग्निमांद्योबलतासमेतःपराक्रमेशक्रपुरोहिते
ऽस्मिन् ॥ ३ ॥ सन्माननानाधनवाहनाद्यैःसंजातहर्षःपुरुषःसदैव ॥ नृपानुकंपासमुपात्तसंपद्भोलिभृन्मंत्रिणिभूतलस्थे ॥ ४ ॥ सन्मित्रपुत्रोत्तम
मंत्रशास्त्रमुख्यानिनानाधनवाहनानि ॥ दद्याद्गुरुःकोमलवाग्विलासंप्रसूतिकालेतनयालयस्थः ॥ ५ ॥ सद्गीतविद्याहतचित्तवृत्तिःकीर्तिप्रि
योऽरातिजनप्रहर्ता ॥ प्रारब्धकार्यालसकृन्नरःस्यात्सुरेंद्रमंत्रीयदिशत्रुसंस्थः ॥ ६ ॥ शास्त्राभ्यासासक्तचित्तोविनीतःकांतावित्तात्यंतसंजातसौ

ख्यः ॥ मंत्रीमर्त्यःकाव्यकर्त्ताप्रसूतौजायाभावेदेवदेवाधिदेवे ॥ ७ ॥ प्रेष्योमनुष्योमलिनोऽतिदीनोविवेकहीनोविनयोज्झितश्च ॥ नित्याल
सःक्षीणकलेवरःस्यादायुर्विशेषेवचसामधीशे ॥ ८ ॥ नरपतेःसचिवःसुकृतीकृतीसकलशास्त्रकलाकलनादरः ॥ व्रतकरोहिनरोद्विजतत्परःसुर
पुरोधसिवितपसिस्थिते ॥ ९ ॥ सद्राजचिन्होत्तमवाहनानिमित्रात्मजश्रीरमणीसुखानि ॥ यशोभिवृद्धिंबहुधाविधत्तेराज्येसुरेज्योविजयंनराणाम् ॥ १० ॥
सामर्थ्यमर्थागमनानिनूनंसद्वस्त्ररत्नोत्तमवाहनानि ॥ भूपप्रसादंकुरुतेनराणांगीर्वाणवंद्योयदिलाभसंस्थः ॥ ११ ॥ नानाचिंतोद्वेगसंजातकोपंपापा
त्मानंसालसंत्यक्तलज्जम् ॥ बुध्याहीनंमानवंमानहीनंवागीशोऽयंद्वादशस्थःकरोति ॥ १२ ॥ इतिगुरुभावः ॥ ॥ ॥ अथ
शुक्रभावः ॥ ॥ बहुकलाकुशलोविमलोक्तिकृत्सुवदनामदनानुभवःपुमान् ॥ अवनिनायकमानधनान्वितोभृगुसुतेतनुभावगतेसति ॥ १ ॥ स
दन्नपानाभिरतंनितांतंसद्वस्त्रभूषाधनवाहनाढ्यम् ॥ विचित्रविद्यंमनुजंप्रकुर्याद्गुणोपपन्नोभृगुनंदनोऽयम् ॥ २ ॥ कृशांगयष्टिःकृपणोदुरात्माद्रव्येणहीं
नोमदनानुततः ॥ सतामनिष्टोबहुदुष्टचेष्टोभृगोस्तनूजेसहजेनरःस्यात् ॥ ३ ॥ मित्रक्षेत्रग्रामसद्वाहनानांनानासौख्यंवंदनंदेवतानाम् ॥ नित्यानंदंमा
नवानांप्रकुर्याद्दैत्याचार्यस्तुर्यभावस्थितोऽयम् ॥ ४ ॥ सकलकाव्यकलाभिरलंकृतस्तनयवाहनधान्यसमन्वितः ॥ नरपतेर्गुरुगौरवभाङ्नरोभृगुसुते
सुतसद्मनिसंस्थिते ॥ ५ ॥ अभिमतोनभवेत्प्रमदाजनेननुमनोभवहीनतरोनरः ॥ विबलताकलितःकिलसंभवेभृगुसुतेऽरिगतेऽरिभयान्वितः ॥ ६ ॥
बहुकलाकुशलोजलकेलिकृद्रतिविलासविधानविचक्षणः ॥ अतितरांनटिनीकृतसौहृदःसुनयनाभवनेभृगुनंदने ॥ ७ ॥ प्रसन्नमूर्त्तिर्नृपलब्धमानः
शठोऽतिनिःशंकतरःसगर्वः ॥ स्त्रीपुत्रचिंतासहितःकदाचिन्नरोऽष्टमस्थानगतेसिताख्ये ॥ ८ ॥ अतिथिगुरुसुरार्चातीर्थयात्रार्पितार्थःप्रतिदिनधन
यानासंततंसंजातहर्षः ॥ मुनिजनसमवेषःपूरुषस्त्यक्तरोषोभवतिनवमभावेसंभवेभार्गवेऽस्मिन् ॥ ९ ॥ सौभाग्यसन्मानविराजमानःस्नानार्चनध्यानसनाथ

नाढ्यः ॥ कांतासुतप्रीतिरतीवनित्यंभृगोः सुतेराज्यगतेनरःस्यात् ॥ १० ॥ सद्गीतनृत्यादरतांनितांतंनित्यंचाचिंतागमनानिनूनम् ॥ सत्कर्मधर्मागम
चित्तवृत्तिर्भृगोःसुतोलाभगतोयदिस्यात् ॥ ११ ॥ संत्यक्तसत्कर्मगतिर्विरोधीमनोभवाराधनमानसश्च ॥ दयालुतासत्यविवर्जितःस्यात्काव्येप्र
सूतौव्ययभावयाते ॥ १२ ॥ इतिशुक्रभावः ॥ ॥ अथमंदभावः ॥ ॥ प्रसूतिकालेनलिनीशसूनुःस्वोच्चत्रिकोणर्क्षगतोविलग्ने ॥ कुर्यान्नरं
देशपुराधिनाथंशेषेष्वभद्रंसरुजंदरिद्रम् ॥ १ ॥ अन्यालयस्थोव्यसनाभिभूतोजनोज्झितःस्यान्मनुजश्चपश्चात् ॥ देशांतरेवाहनराजमानोधनाभिधानेभ
वनेऽर्कसूनौ ॥ २ ॥ राजमानशुभवाहनयुक्तोग्रामपोबहुपराक्रमशाली ॥ पालकोभवतिभूरिजनानांमानवोहिरविजेसहजस्थे ॥ ३ ॥ पित्ताऽनिलक्षीण
बलंकुशीलमालस्ययुक्तंकलिदुर्बलांगम् ॥ मालिन्यभाजंमनुजंविदध्याद्रसातलस्थोनलिनीशजन्मा ॥ ४ ॥ सदागदक्षीणतरंशरीरंधनेनहीनत्वमनं
गहानिम् ॥ प्रसूतिकालेनलिनीशपुत्रःपुत्रस्थितःपुत्रभयंकरोति ॥ ५ ॥ विनिर्जितारातिगणोगुणज्ञःसुज्ञाभ्यनुज्ञापरिपालकःस्यात्॥पुष्टांगयष्टिःप्रबलो
दराग्निर्नरोऽर्कपुत्रेसतिशत्रुसंस्थे ॥ ६ ॥ आमयेनबलहीनतांगतोहीनवृत्तिजनचित्तसंस्थितिः कामिनीभवनधान्यदुःखितःकामिनीभवनगेशनैश्चरे ॥
॥ ७ ॥ कृशतनुर्नदद्रुविचर्चिकाप्रभवतोभयतोषविवर्जितः ॥ अलसंतासहितोहिनरोभवेन्निधनवेश्मनिभानुसुतेस्थिते ॥ ८ ॥ धर्मकर्मसहितोविक
लांगोदुर्मतिर्हिमनुजोऽतिमनोज्ञः ॥ संभवस्यसमयेयदिकोणस्थित्रिकोणभवनेयादिसंस्थे ॥ ९ ॥ राज्ञःप्रधानमतिनीतियुतंविनीतंसद्ग्रामवृंदपुरभेदन
काधिकारम् ॥ कुर्यान्नरंसुचतुरंद्रविणेनपूर्णमेषूरणोहितरणेस्तनुजःकरोति ॥ १० ॥ कृष्णाश्वानामिंद्रनीलोर्णिकानांनानाचंचद्वस्तुदंतावलानाम् ॥
प्राप्तिंकुर्यान्मानवानांबलीयान्प्राप्तिस्थानेवर्त्तमानेऽर्कसूनौ ॥ ११ ॥ दयाविहीनोविधनोव्ययार्त्तःसदाऽलसोनीचजनानुयातः ॥ नरोंऽगभंगोज्झितसर्व
सौख्योव्ययस्थितेभानुसुतेप्रसूतौ ॥ १२ ॥ तन्वादिस्थशनेःप्रोक्तंयच्चभावोद्भवंफलम् ॥ राहोस्तदेवविज्ञेयंमुनीनामपिसंमतम् ॥ १३ ॥ स्वोच्चस्थितः

पूर्णफलंहिधत्तेस्वर्क्षेहितर्क्षेहिफलार्धमेव ।। फलांघ्रिमात्रंरिपुमंदिरस्थश्चास्तंप्रयातःखचरोनकिंचित् ।। १४ ।। अथराहुफलम लग्नेतमोदुष्टमति स्वभावंनरंचकुर्यात्स्वजनानुवंचकम् ।। शीर्षव्यथाकामरसेनसंयुतंकरोतिवादेविजयंसरोगम् ।।१।। धनगतोरविचंद्रविमर्दनेमुखरतांकितभावमथोभवे त् ।। धनविनाशकरोहिदारिद्रतांखलुतदालभतेमनुजोऽटनम् ।। २ ।। दुश्चिक्येऽरिभवोद्भवंवितनुतेलोकेयशस्वीनरःश्रेयोवाविभवंतदाहिलभतेसौख्यंवि लासादिकम् ।। भ्रातॄणांनिधनंपशोश्चमरणंदारिद्रभावैर्युतंनित्यंसौख्यगणैःपराक्रमयुतंकुर्याच्चराहुःसदा ।।३।। सुखगतेरविचंद्रविमर्दनेसुखविनाशनतां मनुजोलभेत ।। स्वजनतांसुतमित्रसुखंनरोनलभतेचसदाभ्रमणंनृणाम् ।। ४ ।। सुखगतोनहिमित्रविवर्धतामुदरशूलविलासविपीडनम् ।। खलुतदाल भतेमनुजोभ्रमंसुतगतेरविचंद्रविमर्दने ।। ५ ।। शत्रुक्षयंद्रव्यसमागमंचपशूषुपीडाकटिपीडनंच ।। समागमैर्म्लेंछजनैर्महाबलंप्राप्नोतिजंतुर्यदिषष्ठगेत मे ।। ६ ।। जायाविरोधंखलुवाप्रणाशंप्रचंडरूपामथकोपयुक्ताम् ।। विवादशीलामथरोगयुक्तांप्राप्नोतिजंतुर्मदनेतमेच ।। ७ ।। अनिष्टनाशंखलुगुह्य पीडांप्रमेहरोगंवृषणस्यवृद्धिं ।। प्राप्नोतिजंतुर्विकलारिलाभंसिंहीसुतेवाखलुमृत्युगेहे ।। ८ ।। धर्मार्थनाशःकिलधर्मगेतमेसुखाल्पतावैभ्रमणंनरस्य ।। दा रिद्रताबंधुसुखाल्पताचभवेच्चलोकेकिलदेहपीडा ।। ९ ।। पितुर्नोसुखंकर्मगोयस्यराहुःस्वयंदुर्भगःशत्रुनाशंकरोति ।। रुजोवाहनेवातपीडांचजंतोर्यदा सौख्यगोमीनगःकष्टभाजम् ।। १० लाभेगतेयदितमेसकलार्थलाभंसौख्याधिकंनृपगणाद्विविधंचमानम् ।। वस्त्रादिकांचनचतुष्पदसौख्यभावंप्राप्नोति सौख्यविजयंचमनोरथंच ।। ११ ।। नेत्रेचरोगंकिलपादघातंप्रपंचभावंकिलवात्सलत्वम् ।।दुष्टैरतिंमध्यमसेवनंचकरोतियानंव्ययगेतमेवा ।। १२ ।। इतिराहुफलम् अथकेतुफलम् यदालग्नगश्चेच्छिखीसूत्रकर्त्तासरोगादिभोगोभयंव्यग्रताच ।। कलत्रादिचिंतामहोद्वेगताचशरीरेप्रबाधाव्यथा मारुतस्य ।। १ ।। धनेचेच्छिखीधान्यनाशोधनंचकुटुंबादिरोधोनृपाद्द्रव्यचिंता ।। सुखेरोगतासंततंस्यात्तथाचयदास्वेगृहेसौम्यगेहेऽतिसौख्यम् ।।

॥ २ ॥ शिखीविक्रमेशत्रुनाशंचवादंधनंभोगमैश्वर्यतेजोऽधिकंच ॥ भवेत्बंधुनाशःसदाबाहुपीडासुखंस्वोच्चगेहेभवोद्वेगताच ॥ ३ ॥ चतुर्थेचमातुः
सुखंनोकदाचित्सुहृद्वर्गतःपितृतोनाशमेति ॥ शिखीबंधुहीनःसुखंस्वोच्चगेहेचिरंनैतिसर्वैःसदाव्यग्रताच ॥ ४ ॥ यदापंचमेयस्यकेतुश्वजातःस्वयंस्वो
दरेघातपातादिकष्टम् ॥ स्वबंधुप्रियासंततिःस्वल्पपुत्रःसदासंभवेद्वीर्ययुक्तोनरश्च ॥ ५ ॥ शिखीयस्यषष्ठेस्थितोवैरिनाशोभवेन्मातुलात्पक्षतोमानभंगः ॥
चतुष्पात्सुखंद्रव्यलाभोनितांतंनरोगस्यदेहेसदाव्याधिनाशः ॥ ६ ॥ शिखीसप्तमेमार्गतश्चित्तवृत्तिंसदावित्तनाशोऽथवावारिभूतः ॥ भवेत्कीटगेसर्वं
दालाभकारीकलत्रादिपीडाव्ययोव्यग्रताच ॥ ७ ॥ गुदेपीडनंवाहनैर्द्रव्यलाभंयदाकीटगेकन्यकेयुग्मगेवा ॥ भवेच्छिद्रगेराहुच्छायादयास्यादजे
गोलिगेजायतेचातिलाभः ॥ ८ ॥ यदाधर्मगःकेतवःक्लेशनाशःसुतार्थीभवेन्म्लेंच्छतोभाग्यवृद्धिः ॥ सहेतुव्यथांबाहुरोगंव्यधत्तेतपोदानतोहास्य
वृद्धिंकरोति ॥ ९ ॥ पितुर्नोसुखंकर्मगोयस्यकेतुःस्वयंदुर्भगःशत्रुनाशंकरोति ॥ रुजोवाहनेवातपीडाचजंतोर्यदाकन्यगःसौख्यगःकष्टभाजम्
॥ १० ॥ सुभाषीसुविद्याधिकोदर्शनीयःसुभोगःसुतेजाःसुवस्त्रोपियस्य ॥ गुदेपीड्यतेसंततेर्दुर्भगत्वंशिखीलाभगःसर्वलाभंकरोति ॥ ११ ॥ शि
खीरिःफगःपादनेत्रेचपीडांस्वयंराजतुल्योव्ययंवैकरोति ॥ रिपोर्नाशनंमानसेनैवशर्मरुजापीड्यतेबस्तिगुह्यस्थरोगम् ॥ १२ ॥ इतिकेतुफलम् ॥
॥ अथमेषादिगृहेरवेर्दृष्टिफलम् ॥ ॥ दानधर्मबहुभृत्यसंयुतःकोमलामलतनुर्गृहप्रियः ॥ आवनेयभवनेविरोचनेशीतदीधितिनिरीक्षितेसति ॥१॥
क्रूरोनरःसंगरकर्मधीरश्चारक्तनेत्रांघिरलंबलीयान् ॥ भवेदवश्यंकुजगेहसंस्थेदिवामणौक्षोणिसुतेनदृष्टे ॥ २ ॥ सुखेनसत्वेनधनेनहीनःप्रेष्यःप्र
वासीमलिनःसदैव ॥ भवेदवश्यंपरवान्मनुष्यःसहस्ररश्मौकुजभेज्ञदृष्टे ॥३॥ दातादयालुर्बहुलार्थयुक्तोनृपालमंत्रीकुलधुर्यवर्यः ॥ स्यान्मानवोभू
तनयालयस्थेपत्यौनलिन्याःकिलजीवदृष्टे ॥ ४ ॥ हीनांगनाप्रीतिरतीवदीनोधनेनहीनोमनुजःकुमित्रः ॥ त्वग्दोषयुक्तःक्षितिपुत्रगेहेमित्रेऽधिसंस्थेभृ

गुपुत्रदृष्टे ॥ ५ ॥ उत्साहहीनोमलिनोऽतिदीनोदुःखाभिभूतोविमतिर्नरःस्यात् ॥ कांतेनलिन्याःक्षितिजालयस्थेप्रसूतिकालेरविजेनदृष्टे ॥ ६ ॥
वारांगनाप्रीतिकरोनितांतंस्याद्दूरिभार्यःसलिलोपजीवी ॥ दिनाधिराजेभृगुजालयस्थेकलानिधिप्रेक्षणतांप्रयाते ॥ ७ ॥ संग्रामधीरोऽतितरांमहौजाः
सुसाहसप्राप्तधनोरुकीर्त्तिः ॥ क्षीणोनरःस्याद्भृगुमंदिरस्थेसहस्ररश्मौकुसुतेनदृष्टे ॥ ८ ॥ संगीतसत्काव्यकलाकलापेलेखक्रियायांकुशलोनरः
स्यात् ॥ प्रसन्नमूर्त्तिर्भृगुवेश्मयातेप्रद्योतनेसोमसुतेनदृष्टे ॥ ९ ॥ वंशानुमानान्नृपतिप्रधानःसद्रत्नभूषाद्रविणान्वितोवा ॥ भीरुर्नरःशुक्रगृहंप्रपन्नेदृष्टेरवौ
देवपुरोहितेन ॥ १० ॥ सुलोचनःकांतवपुःप्रधानोमित्रैरमित्रैःसहितःसचिंतः ॥ भवेन्नरोदैत्यगुरोर्गृहेऽर्केसंवीक्षितेदैत्यपुरोहितेन ॥ ११ ॥ दीनोऽर्थ
हीनोऽलसतांप्रपन्नोभार्यामनोवृत्तिविभिन्नवृत्तः ॥ असाधुवृत्तामययुङ्नरःस्याच्छुक्रालयेऽर्केऽर्कसुतेनदृष्टे ॥ १२ ॥ मित्रैरमित्रैःपरिपीडितश्चविदेश
यातोऽपिधनेनहीनः ॥ निरंतरोद्वेगकरोनरःस्यात्सौम्यालयेऽर्केहरिणांकदृष्टे ॥ १३ ॥ रिपुभयकलहाद्यैःसंयुतोऽत्यंतदीनोरणजयविधिहीनोऽत्यंतसं
जातलज्जः ॥ भवतिननुमनुष्यःसालसश्चापिहंसोबुधभवननिवासेलोहितांगेनदृष्टे ॥ १४ ॥ भूपप्रसादोन्नतिमात्मजानांसहंतिनोशत्रुजनाश्चमित्राः ॥
प्रसूतिकालेनलिनीवनेशेबुधर्क्षसंस्थेचबुधेनदृष्टे ॥ १५ ॥ सुगुप्तमंत्रोऽतितरांस्वतंत्रःकलत्रपुत्रादिजनेसगर्वः ॥ भवेन्नरःशीतकरात्मजर्क्षेदिवाकरेदे
वगुरुप्रदृष्टे ॥ १६ ॥ विदेशवासीचपलोविलासीविषाग्निशस्त्रांकितमूर्त्तिवर्त्ती ॥ पृथ्वीपतेर्दौत्यकरोनरःस्यादर्केबुधर्क्षेभृगुपुत्रदृष्टे ॥ १७ ॥ धूर्त्तोऽ
तिभृत्योगतचित्तबुद्धिर्निजैःसदोद्विग्नमनामनुष्यः ॥ दिवाकरेशीतकरात्मजर्क्षेनिरीक्षितेभास्करिणाप्रसूतौ ॥ १८ ॥ पुण्यैश्चपानीयभवैर्महार्थोपृ
थ्वीपतिर्वासचिवश्चरौद्रः ॥ भवेन्नरोजन्मनिचंडरश्मौकर्काटकस्थेशिशिरांशुदृष्टे ॥ १९ ॥ स्वबंधुवर्गैर्गतचित्तबुद्धिःशोफादिरोगैश्चभगंदरैर्वा ॥
पीडानराणांहिकुलीरसंस्थेदिवामणौक्षोणिसुतेनदृष्टे ॥ २० ॥ विद्यायशोमानविराजमानोभूपानुकंपाप्तमनोभिलाषः ॥ निरस्तशत्रुश्चबुधेनदृष्टेकर्का

टकस्थेद्युमणौनरःस्यात् ॥ २१ ॥ कुलाधिकश्चामलकीर्त्तिशालीभूपालसंप्राप्तमहत्पदार्थः ॥ भवेन्नरःशीतकरर्क्षयातेदिवामणौवाक्पतिवीक्षमाणे
॥ २२ ॥स्त्रीसंश्रयाद्दृस्त्रधनोपलब्धिःपरस्यकृत्येत्द्दयेविषादः ॥ निशाकरागारकृताधिकारेदिवाकरेशुक्रनिरीक्ष्यमाणे ॥ २३ ॥ धूर्त्तोगभीरः
क्षितिपालमान्योधनोपलब्धार्थयुतःप्रसिद्धः ॥ मित्रेनिजक्षेत्रयुतेप्रसूतौनक्षत्रनाथेननिरीक्ष्यमाणे ॥ २४ ॥ कफानिलार्त्तःपिशुनोऽन्यकार्येस्यादंतराय
श्चपलस्वभावः ॥ क्लेशीनरःशीतकरर्क्षसंस्थेदिवामणौमंदनिरीक्ष्यमाणे ॥ २५ ॥ नानांगनाप्रीतिरतीवधूर्त्तःकफात्मकःक्रूरतरश्चशूरः ॥ महोद्य
मःस्यान्मनुजःप्रधानःसिंहस्थितेऽर्केकुसुतेनदृष्टे ॥ २६ ॥ धूर्त्तोनृपानुव्रजनःसुसत्वोविद्वत्प्रियोलेखनतत्परश्च ॥ भवेन्नरःकेसरिणिप्रयातेदिवामणौ
सौम्यनिरीक्ष्यमाणे ॥ २७ ॥ देवालयारामतडागवापीनिर्माणकर्त्तास्वजनप्रियश्च ॥ भवेन्नरोदेवपुरोहितेननिरीक्षितेऽर्केमृगराजसंस्थे ॥ २८ ॥ त्व
ग्दोषरोषाऽयशोभिभूतोगतोत्सवःस्वीयजनोज्झितश्च ॥ स्यान्मानवःसत्वदयाविहीनःपंचाननेऽर्केभृगुजेनदृष्टे ॥ २९ ॥ शठोनरःकार्यविघातकर्त्तासं
तापयेदात्मजनांश्चनूनम् ॥ नरोमृगेंद्रोपगतेदिनेशेदिनेशपुत्रेणनिरीक्ष्यमाणे ॥ ३० ॥ कायकांतिसुतसौख्यसमेतोवाग्विलासकुशलःकुलशाली ॥
स्यान्नरःसुरपुरोहितभस्थलेभास्करेहिमकरेणहिदृष्टे ॥ ३१ ॥ संग्रामसंतप्तयशोविशेषोवक्ताविमुक्तानुजनानुसंगः ॥ स्थिराश्रयोजीवगृहस्थितेऽर्के
भौमेनदृष्टेपुरुषःप्रचंडः॥ ३२ ॥धातुक्रियाकाव्यकलाकथाज्ञःसद्वाक्यमंत्रादिविधिप्रवीणः ॥ सतांमतःस्यात्पुरुषोदिनेशेसौम्येक्षितेजीवगृहोपयाते॥ ३३॥
नृपालमैत्रीकुलभूमिपालःकलाविधिज्ञोधनधान्ययुक्तः ॥ विद्वान्पुमान्भानुमतीज्यगेहेसंदृष्टदेहेऽमरपूजितेन ॥ ३४॥ सुगंधमाल्यांबरचारुयोषाभूषाविशे
षानुभवाप्तसौख्यः ॥ भवेन्नरोदेवपुरोहितर्क्षेप्रद्योतनेदानववंद्यदृष्टे ॥ ३५ ॥ परान्नभुङ्नीचतरःप्रवृत्तश्चतुष्पदप्रीतिधरोनरःस्यात् ॥सूर्येसुराचार्यगृहेप्रयातेनि
रीक्षितेभानुसुतेनमूतौ ॥ ३६ ॥ नारीप्रसंगेनगतार्थसौख्योमायापटुश्चंचलचित्तवृत्तिः ॥ भवेन्मनुष्यःशनिवेश्मनिस्थेसहस्ररश्मौहिमरश्मिदृष्टे ॥ ३७ ॥

परकलहगतार्थोऽन्याधिवैरिप्रतप्तस्त्वतिविकलशरीरोऽत्यंतचिंतासमेतः ॥ भवतिननुमनुष्यः संभवेतिग्मरश्मौगतवतिसुतगेहेदृष्टदेहेकुजेन ॥३८॥ क्लीबस्व
भावः परचित्तहारीसाधूज्झितः शूरतरोनरः स्यात् ॥ दिवाकरेशीतकरात्मजेनदृष्टेप्रसूतौशनिमंदिरस्थे ॥३९॥ सत्कर्मकर्त्तामतिमान्बहूनांसमाश्रयश्चारुय
शोमनस्वी ॥ स्यान्मानवोभानुसुतालयस्थेभानौचवाचस्पतिनाप्रदृष्टे ॥ ४० ॥ शंखप्रवालामलरत्नवित्तंवरांगनाभ्योऽपिधनोपलब्धिम् ॥ करोतिभानुर्ननुमान
वानांशन्यालयस्थोभृगुजेनदृष्टः ॥ ४१ ॥ प्रौढप्रतापाद्विजितारिपक्षः क्षोणीपतिप्रीतिमहत्प्रतिष्ठः ॥ प्रसन्नमूर्त्तिः प्रभवेन्मनुष्यः शन्यालयेऽर्केशनिनाप्रदृष्टे
॥४२॥ इतिमेषादिगृहेरवौदृष्टिफलम् ॥ अथचंद्रंप्रतिग्रहदृष्टयः ॥ उग्रस्वभावोऽपिमृदुर्नतानांधीरोधराधीश्वरगौरवाढ्यः॥ नरोभवेत्संगरभीरुरे
वमेषेशशांकेनलिनीशदृष्टे ॥१॥ विषाग्निवातास्त्रभयंकदाचित्स्यान्मूत्रकृच्छ्रेमहदाश्रयश्च॥ दंताक्षिपीडानिबिडाजडांशौमेषस्थितेभूमिसुतेनदृष्टे ॥ २ ॥
विलसदमलकीर्तिः सर्वविद्याप्रवीणोद्राविणगुणगणाढ्यः संमतः सज्जनानाम् ॥ भवतिननुमनुष्योमेषराशौशशांकेशशधरसुतदृष्टेश्रेष्ठसंपत्प्रतिष्ठः ॥३॥ नृ
पप्रधानः पृतनापतिर्वाकुलानुमानाद्बहुसंपदाढ्यः ॥भवेन्नरः कैरविणीवनेशेमेषस्थितेगीष्पतिनाप्रदृष्टे ॥४॥ योषाविभूषाधनसूनुसौख्योभोक्तासुवक्तापरिभु
क्तरोषः ॥स्यात्पूरुषोमेषगतेऽमृतांशौनिरीक्ष्यमाणेभृगुणागुणज्ञः ॥ ५ ॥ गदयुतंहतचित्तसमुन्नतिंविगतवित्तमसत्यमसत्सुतम् ॥ क्रियगतोऽर्कसुतेननिरी
क्षितोहिमकरोहिनरंकुरुतेखलम् ॥ ६॥ कृषिक्रियायांनिरतोविधिज्ञः स्यान्मांत्रिकोवाहनधान्ययुक्तः ॥ नरोनितांतंचतुरः स्वकार्येदृष्टेदिनेशेनवृषेशशांके
॥ ७ ॥ कामातुरश्चित्तहरोंगनानांस्यात्साधुमित्रः सुतरांपवित्रः ॥ प्रसन्नमूर्त्तिश्चनरोवृषस्थेशीतद्युतौभूमिसुतेनदृष्टे ॥ ८ ॥ प्राज्ञंविधिज्ञंकृपयासमेतं
हर्षान्वितंभूतहितेरतंच ॥ गुणाभिराममनुजंप्रकुर्यात्वृषेशशांकः शशिजेनदृष्टः॥ ९ ॥ जायात्मजानंदयुतंसुकीर्तिधर्मक्रियायांनिरतंचपित्रोः ॥ भ
क्तोप्रसक्तंमनुजंप्रकुर्यात्वृषास्थितेंदुर्गुरुणाप्रदृष्टः ॥१०॥भूषणांबरगृहाशनशय्यागंधमाल्यचतुरंघ्रिसुखानि॥ आतनोतिसततंमनुजानांचंद्रमावृषगतोभृ

गुदृष्टः ॥ ११ ॥ कलानिधिः पूर्वदलेवृषस्यशनीक्षितश्चेन्निधनंजनन्याः ॥ करोतिसत्यंमुनिभिर्यदुक्तंतथापरार्धेखलुतातघातम् ॥ १२ ॥ प्राज्ञंसु शीलंद्रविणेनहीनंक्लेशाभिभूतंसततंकरोति ॥ नरंचसर्वोत्सवदंप्रसूतौद्वंद्वेस्थितोभानुमताचदृष्टः ॥ १३ ॥ उदारदारंचतुरंचशूरंप्राज्ञंचसूज्ञंधनवाहना द्यैः ॥ युक्तंप्रकुर्यान्मिथुनस्थितेंदुर्निरीक्षितोजन्मनिभूसुतेन ॥१४॥ धीरंसदाचारमुदारसारंनरंनरेंद्राप्तधनंकरोति ॥ निशाधिनाथोमिथुनाधिसंस्थो निशीथिनीनाथसुतेनदृष्टः ॥१५॥ विद्याविवेकान्वितमर्थवंतंख्यातंविनीतंसुतरांसुपुण्यम्॥करोतिमर्त्यंमिथुनेधिसंस्थोनिशीथिनीशोगुरुणाप्रदृष्टः॥ १६॥ वस्त्रप्रसूनान्नवरांगनाभ्यःसद्वाहनेभ्यश्चविभूषणेभ्यः ॥ करोतिसौख्यंहिमुधामयूखोद्वंद्वस्थितोजन्मनिशुक्रदृष्टः ॥१७॥ धनांगनावाहननंदनाद्यैर्विश्लेषमा यातिविगर्हितत्वम् ॥ नरोहिनीहारकरेनृयुग्मेनिरीक्षितेभानुसुतेनसूतौ ॥ १८ ॥ निरर्थकक्लेशकरंविकीर्णैर्नृपाश्रयंदुर्गकृताधिकारम् ॥ कुर्यात्कलावान्प रिसूतिकालेकुलीरसंस्थेनलिनीशदृष्टः ॥ १९ ॥ दक्षंचशूरंजननीविरुद्धंक्षीणांगयष्टिंमनुजंकरोति ॥ कुलीरसंस्थःपरिसूतिकालेदृष्टःकलावान् किलमंगलेन ॥ २० ॥ दारार्थपुत्रोन्नतिनीतिसौख्यंसेनापतिंवासाचिवंमनुष्यम् ॥ कर्काधिरूढःकुरुतेहिमांशुर्हिमांशुपुत्रेणनिरीक्ष्यमाणः ॥ २१ ॥ नृपाधिकारंगुणिनंनयज्ञंसुखान्वितंचारुपराक्रमंच ॥ करोतिजातंयदिचक्रवर्त्तीपीयूषमूर्त्तिर्गुरुणेक्ष्यमाणः ॥२२॥ सद्रत्नचामीकररत्नभूषावरांगनासौ ख्ययुतंनितांतम् ॥ नरंनिजागारगतःकरोतिसुधाकरःशुक्रनिरीक्ष्यमाणः ॥ २३ ॥ सत्येनहीनंजननीविरुद्धंसदाटनंपापरतंगतार्थम् ॥ करोतिजा तंनिजगेहगामीचेद्यामिनीशोरविजेनदृष्टः ॥ २४ ॥ गुणयुतंसततंनृपतिप्रियंवरपदंचविलंघितसंततिम् ॥ हरिगतोवितनोतिनिशाकरःखरकरप्रवि लोकनसंयुतः ॥ २५ ॥ नरपतेःसचिवोधनवाहनात्मजकलत्रसुखोहिभवेन्नरः ॥ हरिणलक्ष्मणिकेसरिणिस्थितेक्षितिसुतेनतनुप्रविलोकिते ॥ २६ ॥ धनांगनावाहननंदनेभ्यःसुखप्रपूरंहिनरंकरोति॥ द्विजाधिराजोमृगराजसंस्थोद्विजाधिराजात्मजसंप्रदृष्टः॥२७॥बहुश्रुतंविस्मृतसाधुवृत्तंकुर्यान्नरंभूमिपतेः

प्रधानम् ॥ चंद्रोमृगेंद्रोपगतोऽमरेंद्रोपाध्यायदृष्टिःपरिसूतिकाले ॥ २८ ॥ स्त्रीविभवंवैगुणिनंगुणज्ञप्राज्ञंविधिज्ञंकुरुतेमनुष्यम् ॥ पीयूषरश्मिर्जननेयादि
स्यात्पंचाननस्थोभृगुसूनुदृष्टः ॥ २९ ॥ कांतावियुक्तःकृषिकर्मदक्षोदुर्गाधिकारोहिनरोत्सकार्थः ॥ सिंहोपयातेसतिशीतभानौनिरीक्षितेसूर्यसुतेनसूतौ
॥ ३० ॥ भूमीशकोशाधिकृतंसुवृत्तंभार्याविमुक्तंगुरुभक्तियुक्तम् ॥ जातंचकन्याश्रितशीतरश्मिस्तनोतिजंतुंखररश्मिदृष्टः ॥ ३१ ॥ हिंसापरं
शूरतरंसकोपंनृपाश्रितंलब्धजयंरणादौ ॥ कुमारिकासंश्रितशीतभानुर्भूसूनुदृष्टोमनुजंकरोति ॥ ३२ ॥ ज्योतिर्विद्याकाव्यसंगीतविद्यंप्राज्ञंयुद्धेल
ब्धकीर्त्तिंविनीतम् ॥ कुर्यान्नूनंमानवंमानवंतंकन्यास्थेंदुश्चेंदुजेनप्रदृष्टः ॥ ३३ ॥ भूरिबंधुमवनीपतिप्रियंचारुवृत्तशुभकीर्त्तिसंयुतम् ॥ मानवंहिकुरुते
गनाश्रितश्चंद्रमाःसुरपुरोहितेक्षितः ॥ ३४ ॥ विलासिनीकेलिविलासचित्तंकांताश्रितंभूपतिलब्धवित्तम् ॥ कुर्यान्नरंशीतकरःकुमार्यांसंस्थःसिते
नप्रविलोकितश्च ॥ ३५ ॥ निष्किंचनंहीनमतिंनितांतंस्त्रीसंश्रयादात्मधनंजनन्या ॥ हीनंप्रकुर्यात्खलुकन्यकायांगतोमृगांकोऽर्कसुतेनदृष्टः ॥ ३६ ॥
सदाटनःसौख्यधनैर्विहीनःसदंगनासूनुजनैर्विहीनः ॥ मित्रैरमित्रैश्चनरोऽतितप्तस्तुलाधरेशीतकरेऽर्कदृष्टे ॥ ३७ ॥ बुद्ध्यापरार्थाकरणैकचित्तं
मायासमेतंविषयाभितप्तम् ॥ करोतिजातंहितुलागतेंदुर्निरीक्ष्यमाणोधरणीसुतेन ॥ ३८ ॥ कलाविधिज्ञंधनधान्ययुक्तंवक्तृत्वविद्याविभवैःसमेतम् ॥
कुर्यान्नरंशीतकरस्तुलास्थःप्रसूतिकालेशशिजेनदृष्टः ॥ ३९ ॥ विचक्षणोवस्त्रविभूषणेषुक्रयेऽथवाविक्रयताविधाने ॥ तुलाधरेशीतकरेनरः
स्याद्दृष्टेशुनासीरपुरोहितेन ॥ ४० ॥ प्राज्ञस्त्वनेकोद्यमसाधितार्थःस्यात्पार्थिवानांकृपयासमेतः ॥ दृष्टोनरःशीतकलेवरश्चजूकेमृगांकेभृगुजेनदृष्टे
॥ ४१ ॥ धनैश्चधान्यैर्वरवाहनैश्चयुतोऽपिहीनोविषयोपभोगैः ॥ भवेन्नरस्तौलिनिजन्मकालेकलानिधौभानुतनूजदृष्टे ॥ ४२ ॥ सद्वृत्तहीनंधनिनं
जनानामसत्यमत्यंतकृतप्रयासम् ॥ बलंनिवासंमनुजंप्रकुर्यात्ताराधिपःकौर्प्यगतोऽर्कदृष्टः ॥ ४३ ॥ रणांगणात्राप्तयशोविशेषोगभीरतांगौरवसंयुतश्च॥

भूपानुकंपासमुपात्तवित्तोनरोऽलिनींदौक्षितिजेनदृष्टे ॥ ४४ ॥ वाग्विलासकुशलोरणशीलोगीतनृत्यनिरतश्चनितांतम् ॥ कूटकर्मणिनरोनिपुणःस्या
द्वृश्चिकेशशिनिचंद्रजदृष्टे ॥ ४५ ॥ लोकानुरूपःसुतरांसुरूपःसत्कर्मकृद्वित्तविभूषणाढ्यः ॥ स्यान्मानवोजन्मनिशीतरश्मौसंस्थेऽलिनीड्येननिरी
क्ष्यमाणे ॥ ४६ ॥ प्रसन्नमूर्त्तिःसमुदारकीर्त्तिःकूटक्रियाज्ञोधनवाहनाढ्यः ॥ कांताहतार्थःपुरुषोऽलियातेशीतद्युतौदैत्यगुरुप्रदृष्टे ॥ ४७ ॥ स्था
नभ्रंशंद्रव्यनाशाल्पवित्तंनीचापत्यासत्वयक्ष्मप्रकोपम् ॥ कुर्याच्चंद्रःसूतिकालेऽलिसंस्थेछायापुत्रप्रेक्षणत्वंप्रयातः ॥ ४८ ॥ प्रौढप्रतापोत्तमकीर्त्तिसं
पत्सद्वाहनान्याहवजंजयंच ॥ नृपप्रसादंकुरुतेनराणांताराधिपश्चापगतोऽर्कदृष्टः ॥ ४९ ॥ सेनापतित्वंचमहत्प्रतापंपद्मालयालंकरणोपलब्धिम् ॥
कुर्यान्नराणांहरिणांकएषःशरासनस्थोऽवनिजेनदृष्टः॥ ५० ॥ सद्वाग्विलासंबहुभृत्ययुक्तंकुर्यान्नरंज्योतिषशिल्पविद्यम् ॥ तुरंगजंघेहिकुरंगजन्मा
कुरंगलक्ष्मप्रभवेनदृष्टः ॥ ५१ ॥ महत्पदस्थोधनवान्सुवृत्तोभवेन्नरश्चारुशरीरयष्टिः ॥ धनुर्धरेशीतकरेप्रयातेनिरीक्षितेशक्रपुरोहितेन ॥ ५२ ॥
संतानार्थात्यंतसंजातधर्मःशश्वत्सौख्येनान्वितोमानवःस्यात् ॥ तारास्वामीचापगामीप्रसूतौदैत्यामात्यप्रेक्षणत्वंप्रयातः ॥ ५३ ॥ सत्वोपेतंनित्यशास्त्रा
नुरक्तंसद्वृत्तारंमानवंचप्रचंडम् ॥ कोदंडस्थस्तीक्ष्णरश्म्यात्मजेनदृष्टःसूतौशीतरश्मिःकरोति ॥ ५४ ॥ गतधनोमलिनश्चलनप्रियोहतमतिःखलुदुः
खितमानसः ॥ हिमकरेमकरेचदिवाकरेक्षिततनौहिनरःप्रभवेयदि ॥ ५५ ॥ अतिप्रचंडोधनवाहनाढ्यःप्राज्ञश्चदारात्मजसौख्ययुक्तः ॥ स्यान्मा
नवोवैभवभाक्नितांतंमृगेमृगांकेऽवनिसूनुदृष्टे ॥ ५६ ॥ बुध्याहीनोनिर्धनस्त्यक्तगेहोगेहिन्याद्यैरुज्झितःपूरुषःस्यात् ॥ आर्कौकेरःस्थावरेशीतर
श्मौपीयूषांशोरात्मजेनप्रदृष्टे ॥ ५७ ॥ नृपात्मजःसत्ययुतोगुणज्ञःकलत्रपुत्रादियुतोनरःस्यात् ॥ मृगाननेजन्मनियामिनीशेवाचामधीशेननिरीक्ष्य
माणे ॥ ५८ ॥ सुनयनोधनवाहनसंयुतःसुतविभूषणवस्त्रसुखोनरःकुमुदिनीदयितेमृगसंस्थितेभृगुसुतेनजनौननुवीक्षिते ॥ ५९ ॥ महालसोमंद

धनस्त्वसत्योमलीमसः स्याद्व्यसनाभिभूतः ॥ पीयूषमूर्त्तिर्यदिनक्रवर्त्तीत्रिमूर्त्तिपुत्रेणनिरीक्ष्यमाणः ॥ ६० ॥ कृषावलः कैतवसंयुतश्चनृपार्थितोधर्मरतो
नरः स्यात् ॥ पीयूषमूर्त्तिर्यदिकुंभगामीत्वंभोजिनीस्वामिनिरीक्ष्यमाणः ॥ ६१ ॥ धनभवनजनित्रीतातविश्लेषयुक्तोविषमतमपदार्थोत्पादकोऽनल्पज
ल्पः ॥ भवतिमलिनंचित्तोऽस्यंतघूर्त्तोहिमर्त्यः शशिनिकलशयातेवीक्षितोभूसुतेन ॥ ६२ ॥ विषयसौख्यरतोशनसंविधारुचिरतीवशुचिः प्रियभाष
णः ॥ युवतिगीतसुनीतकृतादरोघटगतेदुरिहज्ञनिरीक्षितः ॥ ६३ ॥ महीपुरग्राममुखादिसौख्यंभोगान्वितंसाधुजनप्रवृत्तिम् ॥ कुर्यान्नरंश्रेष्ठतरं
घटस्थोनिशाकरः शक्रगुरुप्रदृष्टः ॥ ६४ ॥ मित्रात्मजस्त्रीगृहसौख्यहीनोदीनोजनोत्सारितगौरवः स्यात् ॥ निशाकरेकुंभधरेप्रसूतौसंवीक्षितेदान
वपूजितेन ॥ ६५ ॥ नखोष्ट्रवालाश्वतरादिलाभंकुस्त्रीरतंधर्मविरुद्धवृत्तिम् ॥ करोतिपुंसांहिघटेऽधितिष्ठन्निशाकरोभास्करसूनुदृष्टः ॥ ६६ ॥
मनोद्भवोत्कर्षमतीवसौख्यंसेनापतित्वंबहुवित्तवृद्धिम् ॥ सत्कार्यसिद्धिंकुरुतेहिमांशुर्झषेदिनेशेननिरीक्ष्यमाणः ॥ ६७ ॥ पराभिभूतंकुलटाधिसख्यं
सौख्येोज्झितंपापरतंनितांतम् ॥ करोतिजातंहिनिधिः कलानांमीनस्थितोभूमिसूतेनदृष्टः ॥ ६८ ॥ वरांगनासूनुसुखानिनूनंमानंधनंभूमिपतेः प्रसादम् ॥
कुर्यान्नराणांहरिणांकएषवैसारिणस्थोज्ञनिरीक्ष्यमाणः ॥ ६९ ॥ उदारदेहंसुकुमारदेहंसद्बुद्धिहीनासूनुधनादिसौख्यम् ॥ नृपंविदध्यात्पृथुरोमगामी
तमीपतिर्वाक्पतिवीक्षितश्चेत् ॥ ७० ॥ सद्गीतवाद्यादिरतंसुवृत्तंविलासिनीकेलिविलासशीलम् ॥ करोतिमर्त्यंतिमियुग्मसंस्थः शीतद्युतिर्जन्मनिशुक्रदृष्टः
॥ ७१ ॥ कामातुरंदारसुतैर्विहीनंनीचांगनासख्यमविक्रमंच ॥ नीहाररश्मिः शफरंप्रपन्नोनरंविधध्याद्रविसूनुदृष्टः ॥ ७२ ॥ इतिचंद्रंप्रतिग्रहदृष्टयः ॥
॥ अथस्वभेभौमेग्रहदृष्टयः ॥ प्राज्ञः सुवक्ता पितृमातृभक्तोधनीप्रधानोऽतितरामुदारः ॥ नरोभवेदात्मगृहेमहीजेसरोजिनीराजनिरीक्ष्यमाणे ॥ १ ॥ अन्यां
गनासक्तमतीवशूरंकृपाविहीनंहतचोरवर्गं ॥ नरंप्रकुर्यान्निजधामगामीभूमीतनूजोद्विजराजदृष्टः ॥ २ ॥ पण्यांगनालंकरणैकवृत्तिर्विचक्षणोऽन्यद्रवि

णापहारी ॥ भवेन्नरःस्वर्क्षगतेप्रसूतौक्षोणीसुतेसोमसुतेनदृष्टे ॥ ३ ॥ वंशेऽवनीशोधनवान्सकोपोनृपोपचारःकृतचौरसख्यः आरेनिजागारगतेनरः
स्यात्सूतौसुराचार्यनिरीक्ष्यमाणे ॥ ४ ॥ भूयोभूयोभोजनौत्सुक्यसक्तःकांताहेतोर्यानाचिंतानितांतम् ॥ प्राणीपुण्येकर्मणिप्रीतिमान्स्यात्स्वर्क्षेभौमेभार्गवे
णप्रदृष्टे॥ ५ ॥ मित्रोज्झितंमातृवियोगतप्तंकृशांगयष्टिंविषमंकुटुंबे ॥ ईर्ष्याविशेषंपुरुषंविदध्यात्कुजःस्वभस्थोऽर्कसुतेनदृष्टः ॥ ६ ॥ इतिस्वभेभौमेग्रहदृष्टयः
अथशुक्रगृहस्थेभौमेग्रहदृष्टयः ॥ कांतामनोवृत्तिविहीनमुच्चैर्वनाद्रिसंस्थानरुचिंविपक्षम् ॥ प्रचंडकोपंकुरुतेमनुष्यंकुजःसितागारगतोऽर्कदृष्टः ॥ १ ॥
अंबाविरुद्धःखलुयुद्धभीरुर्न्नेहंगनानामपिनाथकश्च ॥ स्यान्मानवोभूतनयेसितर्क्षेनक्षत्रनाथेननिरीक्ष्यमाणे ॥ २ शास्त्रप्रवृत्तिःकलहप्रियःस्यादनल्प
जल्पोऽल्पधनागमश्च ॥ सत्कायकांतिःपरिसूतिकालेसितालयस्थेशशिजेनदृष्टः ॥ ३ बंधुप्रियेस्यान्निरतोऽतिभाग्यःसद्गीतनृत्यादिविधिप्रवीणः ॥ क्षो
णतिनूजेभृगुजर्क्षयातेसंवीक्षितेवाक्पतिनाप्रसूतौ ॥ ४ ॥ सुश्लाघ्यनामाक्षितिपालमंत्रीसेनापतिर्वाबहुसौख्ययुक्तः ॥ स्यान्मानवःशुक्रगृहोपयातेनिरी
क्षितेभूमिसुतेसितेन ॥ ५ ॥ ख्यातोविनीतोधनवान्सुमित्रःपवित्रबुद्धिःकृतशास्त्रयत्नः ॥ नरःपुरग्रामपतिःसितर्क्षेभूनंदनेभानुसुतेनदृष्टे ॥ ६ ॥ इ
तिशुक्रभवनस्थेभौमेग्रहदृष्टयः अथबुधभवनस्थभौमेग्रहदृष्टयः ॥ विद्याधनैश्वर्ययुतंमुसत्वमरण्यदुर्गाचलकेलिशीलम् ॥ कुर्यान्नरंसोमसुतालयस्थः
क्षोणीसुतेसूर्यनिरीक्ष्यमाणः ॥ १ ॥ संरक्षणेभूपतिनानियुक्तंकांतारतिंसत्वयुतंसतोषम् ॥ भूमीसुतःसंजनयेन्मनुष्यंबुधर्क्षसंस्थःशशिनाप्रदृष्टः ॥
॥ २ ॥ अनल्पजल्पंगणितप्रगल्भंकाव्यप्रियंचानृतचारुवाक्यम् ॥ दौत्येप्रयासैःसहितंप्रकुर्यात्धरातनूजोज्ञगृहेज्ञदृष्टः ॥ ३ ॥ अन्यदेशगमनव्य
सनाद्यैःसंयुतंहिकुरुतेनरमुच्चैः ॥ सोमसूनुभवनेऽवनिसूनुर्दानवारिसचिवेनचदृष्टः ॥ ४ ॥ वस्त्रान्नपानीयसुखैःसमेतंकांताप्रसक्तंसुतरांसमृद्धम् ॥
कुर्यान्नरंभूमिसुतोबुधर्क्षसंस्थःप्रदृष्टोभृगुनंदनेन ॥ ५ ॥ अतीवशूरोमलिनोऽलसश्चदुर्गाचलारण्यविलासशीलः ॥ भवेन्नरोभास्करसूनुदृष्टेधरासुते

सौमसुतालयस्थे ॥ ६ ॥ इतिबुधभवनस्थभौमेग्रहदृष्टयः ॥ ॥ अथकर्कस्थभौमेग्रहदृष्टयः ॥ ॥पित्तप्रकोपार्त्तियुतोऽतिधीरोदंडाधिकारीसुतरां
महौजाः॥ भवेन्नरःकर्कगतेमहीजेनिरीक्ष्यमाणेरविणाप्रसूतौ ॥१॥ गदाभिभूतोगतवस्तुशोकोविहीनवेषोगतसाधुवृत्तः ॥ भवेन्नरःकर्कटगेमहीजेसोमे
नसूतौचनिरीक्ष्यमाणे ॥२॥ मित्रैर्विमुक्तोऽल्पकुटुंबभारःपापप्रचारःखलचित्तवृत्तिः ॥ बुधेनदृष्टेसतिकर्कटस्थेभौमेनरःस्याद्व्यसनाभिभूतः ॥ ३ ॥
नरेंद्रमंत्रीगुणगौरवाढ्योमान्योवदान्योमनुजःप्रसिद्धः॥कुळीरसंस्थेतनयेधरित्र्यानिरीक्षितेचित्रशिखंडिजेन॥४॥अर्थक्षयोदुर्व्यसनेननूनंनिरंतरानर्थस
मुद्भवःस्यात् ॥ भवेन्नराणांभृगुणाप्रदृष्टेत्वंगारकेकर्कटराशिसंस्थे ॥ ५ ॥ कीलालधान्यादिधनःसुकांतिर्महीपतिप्राप्तधनोमनुष्यः ॥ महीसुतेकर्कट
राशियातेनिरीक्षितेसूर्यसुतेनसूतौ ॥ ६ ॥ इतिकर्कस्थभौमेग्रहदृष्टयः ॥ अथसिंहस्थभौमेग्रहदृष्टयः ॥ हितप्रकर्त्ताऽभिमतेषुनूनंद्विषज्जनानामहितप्र
दाता ॥ वनाद्रिकुंजेषुकृतप्रचारःसिंहेमहीजेरविणाप्रदृष्टे ॥ १ ॥ प्रपुष्टमूर्तिःकठिनस्वभावश्चांबाविनीतोनिपुणःस्वकार्ये ॥ तीव्रःपुमांश्चारुमतिःप्रसू
तौसिंहेमहीजेद्विजराजदृष्टे ॥ २ ॥ सत्काव्यशिल्पादिकलाकलापेऽभिज्ञोऽपिलुब्धश्चलचित्तवृत्तिः ॥ स्वकार्यसिद्धौनिपुणोनरःस्यात्सिंहेमहीजेशशि
जेनदृष्टे ॥ ३ ॥ प्रशस्तबुद्धिर्नृपतेःसुहृच्चसेनाधिनाथोऽभिमतोबहूनाम् ॥ विद्याप्रवीणोहिनरःप्रसूतौजीवेक्षितेसिंहगतेमहीजे ॥ ४ ॥ गर्वान्वितोऽत्यंत
शरीरकांतिर्नानांगनाभोगयुतःसमृद्धः ॥ भूमीसुतेसिंहगतेप्रसूतौनिरीक्षितेदैत्यपुरोहितेन॥ ५ ॥ भवेन्निवासोऽन्यगृहेतिचिंतावृद्धाकृतिस्त्वद्रविणोझ्झित
त्वम् ॥ भवेन्नराणांधरणीतनूजेसिंहस्थितेभानुसुतेनदृष्टे ॥ ६ ॥ इतिसिंहस्थितेभौमेग्रहदृष्टयः ॥ अथजीवभवनस्थभौमेग्रहदृष्टयः ॥ वनाद्रिदुर्गेषुकृ
ताधिवासंक्रूरंसभाग्यंजनपूजितंच ॥ करोतिजातंधरणीतनूजोजीवर्क्षयातस्तरणिप्रदृष्टः ॥ १ ॥ विद्वद्द्विधिज्ञंनृपतेरसत्यंकलिप्रियंसर्वनिराकृतंच ॥
प्राज्ञंप्रकुर्यान्मनुजंधराजोजीवर्क्षगःशीतकरप्रदृष्टः ॥ २ ॥ प्राज्ञंचशिल्पेनिपुणंसुशीलंसमस्तविद्याकुशलंविनीतम् ॥ करोतिजातंखलुलोहितांगःसौ

म्येनदृष्टोगुरुगेहयातः ॥ ३ ॥ कांतातिचिंतासहितंनितांतमरातिवर्गैःकलहानुरक्तं ॥ स्थानच्युतंभूमिसुतःप्रकुर्यात्जीवेक्षितोजीवगृहाधिसंस्थः ॥
॥ ४ ॥ उदारचेताविषयानुसक्तोविचित्रभूषापरिभूषितश्च ॥ भाग्यान्वितःस्यात्पुरुषोऽवनीजेजीवर्क्षगेदानवपूज्यदृष्टे ॥ ५ ॥ कायकांतिरहितश्चनितां
तंस्थानसंचलरतोपिचदुःखी ॥ अन्यकर्मनिरतश्चनरःस्यात्जीवधाम्निकुरुतेऽर्कजदृष्टे ॥ ६ ॥ इतिजीवभवनस्थभौमेग्रहदृष्टयः॥ ॥ अथशन्यगारगत
भौमेग्रहदृष्टयः॥ ॥कलत्रपुत्रार्थसुखैःसमेतंश्यामंसुतीक्ष्णंसुतरांचशूरम्॥कुर्यान्नरंभूतनयोऽर्कदृष्टश्चार्कात्मजागारगतःप्रसूतौ ॥ १ ॥ सद्दूषणमातृसु
खेनहीनंस्थानच्युतंचंचलसौहृदंच ॥ उदारचित्तंप्रकरोतिजातंकुजोऽर्कदृष्टशशिनाप्रदृष्टः ॥ २ ॥ प्रियोक्तियुक्तोऽटनलब्धवित्तःसत्वान्वितःकैतवसं
युतश्च ॥ अभीनरोमंदगृहंप्रयातेपृथ्वीसुतेचंद्रसुतेनदृष्टे ॥ ३ ॥ दीर्घायुषंभूपकृपागुणाढ्यंबंधुप्रियंचारुशरीरकांतिम् ॥ कार्यप्रलापंजनयेन्मनुष्यंजी
वेक्षितोमंदगृहेमहीजः ॥ ४ ॥ सद्भोगसौभाग्यसुखैःसमेतःकांतावशोऽत्यंतकलिप्रियश्च ॥ क्षोणीसुतेमंदगृहेप्रयातेनिरीक्ष्यमाणेभृगुणानरःस्यात् ॥
नृपात्तवित्तोवनिताविषादोबहुश्रुतोऽत्यंतमतिःसकष्टः ॥ रणप्रियःस्याद्धरणीतनूजेमंदेक्षितेमंदगृहंप्रयाते ॥ ६ ॥ इतिमंदागारगतभौमेग्रहदृष्टयः ॥ अ
थभौमगेहेबुधेग्रहदृष्टयः ॥ बंधुप्रियंसत्यवचोविलासंनृपालसद्गौरवसंयुतंच ॥ करोतिजातंक्षितिसूनुगेहेसंस्थोबुधोभानुमताप्रदृष्टः ॥ १ ॥ सद्गीतनृत्या
दिरुचिःप्रकामंकांतारतिर्वाहनभृत्ययुक्तः ॥ कौटिल्यभाक्स्यान्मनुजःकुजर्क्षेसोमात्मजेशीतकरप्रदृष्टे ॥ २ ॥ भूपप्रियंभूरिधनंचशूरंकलाप्रवीणं
कलहोद्यतंच ॥ क्षुधान्वितंसंजनयेन्मनुष्यंसौम्यःकुजर्क्षेकुसुतेनदृष्टः ॥ ३ ॥ सुखोपपन्नंचतुरंसुवाक्यंकांतासुताद्यैःसहितंप्रसन्नम् ॥ करोतिमर्त्यं
कुजगेहगामीसोमात्मजोवाक्पतिनाप्रदृष्टः ॥ ४ ॥ कांताविलासंगुणगौरवाढ्यंसुहृत्प्रियंचारुमतिंविनीतम् ॥ करोतिजातंशशिजःकुजर्क्षेसंस्थश्चशु
क्रेणनिरीक्ष्यमाणः ॥ ५ ॥ सुसाहसंचोग्रतरस्वभावंकुलात्कलिप्रीतिमसाधुवृत्तिम् ॥ करोतिमर्त्यंहारिणांकसूनुर्भौमर्क्षसंस्थःशनिनाप्रदृष्टः ॥ ६ ॥

इतिभामगहबुधेग्रहदृष्टयः । अथबुधेशुक्रर्क्षगेग्रहदृष्टयः । दारिद्रदुःखामयतप्तदेहंपरोपकाराभिरतंनितांतम् ॥ शांतंसुचित्रंपुरुषंप्रकुर्यात्सौम्योभृगु
क्षेत्रगतोऽर्कदृष्टः ॥ १॥ बहुप्रपंचंधनधान्ययुक्तंदृढव्रतंभूमिपतिप्रधानम् ॥ ख्यातंप्रकुर्यान्मनुजंहिसौम्यःशुक्रर्क्षसंस्थःशशिनाप्रदृष्टः ॥ २ ॥ रा
जापमानादिगदप्रतप्तंत्यक्तंसुहृद्भिर्विषयैश्चनूनम् ॥ कुर्यान्नरंसोमसुतःसितर्क्षेसंस्थोधरापुत्रनिरीक्ष्यमाणः ॥ ३ ॥ देशोत्तमग्रामपुराधिराजप्राज्ञंगुण
ज्ञंगुणिनंसुशीलम् ॥ कुर्यान्नरंचंद्रसुतेसितर्क्षेसंस्थःसुराचार्यनिरीक्ष्यमाणे ॥ ४ ॥ अतिसुललितवेषंवस्त्रभूषाविशेषैर्युवतिजनमनोज्ञंमन्मथोत्कर्षहर्ष
अतिचतुरमुदारंचारुभाग्यंप्रकुर्याद्भृगुगृहगतसौम्योभास्करेणप्रदृष्टः ॥ ५ ॥ कलत्रपुत्रात्मजयानपीडासंतप्तचित्तंसुखवित्तहीनम् ॥ कुर्यान्नरंशत्रु
जनाभिभूतंमंदेक्षितोज्ञःसितधामगामी ॥ ६ ॥ ॥ इतिशुक्रर्क्षगेग्रहदृष्टयः ॥ ॥ अथस्वक्षेत्रस्थबुधंप्रतिग्रहदृष्टयः ॥ ॥ सत्योपेतंचारुली
लाविलासंभूमीपालात्प्राप्तमानोन्नतिंच ॥ चंचल्लक्ष्मींचापिकुर्यान्मनुष्यंस्वक्षेत्रस्थश्चंद्रपुत्रोऽर्कदृष्टः ॥ १ ॥ अनल्पजल्पोऽमृततुल्यभाषीकलिप्रि
योराजसमीपवर्त्ती ॥ भवेन्नरःसोमसुतेस्वगेहेनिरीक्ष्यमाणेभृगुलांछनेन ॥ २ ॥ प्रसन्नगात्रंकुटिलंकलाज्ञंनरेंद्रकृत्येसुतरांप्रवीणम् ॥ जनप्रि
यंसंजनयेन्मनुष्यंभौमेक्षितोज्ञःस्वगृहेऽधिसंस्थः ॥ ३ ॥ बह्वर्थसामर्थ्यविराजमानंसद्राजमानातपदाधिकारं ॥ श्रुतंप्रकुर्यान्निजमंदिरस्थःसौम्यः
प्रदृष्टःसुरपूजितेन ॥ ४ ॥ नरेंद्रदूतोविजितारिवर्गःसंधिक्रियामार्गविधिप्रगल्भः ॥ वारांगनासक्तमनोभिलाषःशुक्रेक्षितज्ञेनिजभेनरःस्यात्
॥ ५ ॥ प्रारंभसिद्धिंविनयंविशेषात्सद्वस्त्रभूषादिसमृद्धिमुच्चैः ॥ कुर्यान्नराणाममृतांशुजन्मास्वमंदिरस्थोरविसूनुदृष्टः ॥ ६ ॥ इतिस्वक्षेत्रस्थ
बुधंप्रतिग्रहदृष्टयः ॥ ॥ अथकुलीरगामिनिबुधेग्रहदृष्टयः ॥ ॥ वस्त्रादिशुद्धौमणिसंग्रहेचगृहादिनिर्माणविधौप्रवीणः ॥ प्रसूनमालाग्रथनेऽपिम
र्त्यःकुलीरगेज्ञेनलिनीशदृष्टे ॥ १ ॥ कांतानिमित्ताप्तमहद्व्यलीकोद्रव्यव्ययात्संतकृशांगयष्टिः ॥ बहूपसर्गोऽपिभवेन्मनुष्यःकुलीरगेज्ञेशशि

नाग्रहष्टे ॥ २ ॥ स्वल्पश्रुतंचौर्यंतरंचशूरंप्रियंवदंकूटविधौप्रवीणम् ॥ कुर्यान्नरंशीतकरस्यसूनुःकुलीरसंस्थोऽवनिसूनुदृष्टः ॥ ३ ॥ प्राज्ञोविधि
ज्ञोविधिनाऽधिशालीसद्वाग्विलासोऽवनिपालमान्यः ॥ स्यान्मानवोजन्मनिसोमसूनौकुलीरगामिन्यमरेज्यदृष्टे ॥ ४ ॥ प्रियंवदश्चारुशरीरभाक्चसद्गी
तवाद्यादिविधौप्रवीणः ॥ स्यान्मानवोदानववंद्यदृष्टेककर्टिकस्थेऽमृतभानुसूनौ ॥ ५ ॥ गुणैर्विहीनंस्वजनैर्वियुक्तमलीकदंभानुरतंकृतघ्नं ॥ करोतिम
र्त्यंपरिसूतिकालेकुलीरगोज्ञोरविसूनुदृष्टः ॥ ६ ॥ इतिकुलीरगामिनिबुधे० ॥ अथसिंहगतेबुधेग्रहदृष्टयः ॥ ॥ कृपाविहीनंचचलत्स्वभावंसे
र्ष्यंचाहिंसाभिरतंचरौद्रम् ॥ क्षुद्रंप्रकुर्यान्मनुजंप्रसूतौबुधोऽर्कदृष्टोमृगराजसंस्थः ॥ १ ॥ रूपान्वितंचारुमतिंविनीतंसंगीतनृत्याभिरतंनितांतम् ॥ सद्वृ
त्तवृत्तंकुरुतेहिमर्त्यंचंद्रेक्षितोसिंहगतोबुधाख्यः ॥ २ ॥ कंदर्पसत्त्वोज्झितमुग्रवृत्तंक्षतांकितंहीनमतिंविचित्रम् ॥ सुदुःखितंसंजनयेत्तुमांसंभौमेक्षितः
सिंहगतःशशीजः ॥ ३ ॥ कोमलामलरुचिःकुलवर्यश्चारुलोचनयुतश्चसमर्थः ॥ वाहनोत्तमधनोमनुजःस्यादिंदुजेहरिगतेगुरुदृष्टे ॥ ४ ॥ सद्रू
पशालीप्रियवाग्विलासोनृपाश्रितोवाहनवित्तयुक्तः ॥ भवेन्नरःसोमसुतेप्रसूतौसिंहास्थितेदानववंद्यदृष्टे ॥ ५ ॥ स्वेदोद्गमोद्भूतमहोग्रगंधंविस्तीर्णगात्रंच
कुरूपमुग्रम् ॥ सुखेनहीनंमनुजंप्रकुर्यान्मंदेक्षितःसिंहगतोयदिज्ञः ॥ ६ ॥ इतिसिंहगतेबुधेग्रहदृष्टयः ॥ ॥ अथगुरुभवनस्थेबुधेखेटदृष्टयः ॥
॥ शूलाश्मरीमेहनिपीडितांगोभंगोज्झितःशांतिमपागतश्च ॥ स्यात्पूरुषोगीष्पतिवेश्मसंस्थोनिशीथिनीस्वामिसुतेऽर्कदृष्टे ॥ १ ॥ लेखक्रियायांसुत
रांप्रवीणःसुसंगतःसाधुसुहृज्जनानाम् ॥ नरःसुखीशीतमयूखपुत्रेचंद्रेक्षितेजीवगृहंप्रयाते ॥ २ ॥ परंपराचोरवनस्थितानांस्युर्लेखकाधान्यधनैर्वि
हीनाः ॥ नरास्तुनीहारकरप्रसूतौजीवालयेमंगलदृष्टदेहे ॥ ३ ॥ विज्ञानशालीस्वकुलावतंसोनृपालकोशालयलेखकर्त्ता ॥ भर्त्ताबहूनांमनुजस्तुसौम्ये
जीवेक्षितेजीवगृहंप्रयाते ॥ ४ ॥ भूपामात्यापत्यलेखाधिकारंचौर्यासक्तंसौकुमार्येणयुक्तः ॥ द्रव्योपेतंमानवंसोमसूनुर्जीवर्क्षस्थःशुक्रदृष्टःकरोति ॥ ५ ॥

बव्हन्नभोक्तामलिनःकुवृत्तःकांतारदुर्गाचलवासशीलः ॥ कार्योपयुक्तोनभवेन्मनुष्योजीवर्क्षगेज्ञेऽर्कसुतेनदृष्टे ॥ ६ ॥ इतिजीवगृहस्थेबुधेखेटदृष्टयः ।
अथशन्यालयगामिनिज्ञेखेचरदृष्टयः ॥ प्रारब्धकार्याकलितप्रतापंसन्मल्लविद्याकुशलंकुशीलम् ॥ कुटुंबिनंसंजनयेन्मनुष्यंबुधःशनिक्षेत्रगतोऽर्कदृष्टः॥
॥ १ ॥ जलोपजीवीधनवांश्चभीरुःप्रसूनकंदोद्यमतत्परश्च ॥ पुमान्भवेद्भानुसुतालयस्थेबुधेसुधारश्मिनिरीक्ष्यमाणे ॥ २ ॥ व्रीडालसस्तब्धतरस्वभावः
सौम्यःसुखीवाक्चपलोऽर्थयुक्तः ॥ स्यान्मानवोभानुसुतर्क्षसंस्थेदृष्टेऽब्जसूतौक्षितिनंदनेन ॥ ३ ॥ धान्यवाहनधनान्वितःसुखीग्रामपत्तनपतिर्महामतिः
भानुसूनुभवनेऽब्जनंदनेदेवदेवसचिवेक्षितेनरः ॥ ४ ॥ बहुप्रजासंजनकंकुरूपंप्राज्ञोज्झितंनीचजनानुयातम् ॥ कामाधिकंसंजनयेन्मनुष्यंशुक्रेक्षितोज्ञः
शनिगेहसंस्थः ॥ ५ ॥ सुखोज्झितंपापरतंचदीनमकिंचनंहीनजनानुयातम् ॥ करोतिमर्त्यंशनिधामगामीसौम्यस्तमोहंतृसुतेनदृष्टः ॥ ६ ॥ इतिश
न्यालयगामिनिबुधेखेचरदृष्टयः ॥ अथभौमर्क्षगेगुरौग्रहदृष्टयः ॥ असत्यभीरुर्बहुधर्मकर्त्ताख्यातश्चसद्भाग्ययुतोविनीतः ॥ भवेन्नरोदेवगुरौप्रयाते
भौमस्यगेहेरविदृष्टदेहे ॥ १ ॥ ख्यातोविनीतोवानेतानुयातःसतांमतोधर्मरतःप्रशांतः ॥ जातोभवेद्भूमिसुतर्क्षयातेवाचांपतौशीतकरेणदृष्टे ॥ २ ॥ क्रू
रोगतिधूर्त्तःपरगर्वहर्त्तानृपाश्रयाज्जीवनवृत्तिकर्त्ता ॥ भर्त्ताबहूनांननुमानवःस्यात्जीवेकुजर्क्षेचकुजेनदृष्टे ॥३॥ रूढ़त्तसत्योत्तमवाग्विहीनश्छिद्रप्रतीक्षीप्र
णतानुयातः ॥ मर्त्योभवेत्कैतवसंप्रयुक्तोवाचस्पतौभौमग्रहेज्ञदृष्टे ॥ ४ ॥ गंधमाल्यशयनासनभूषायोषिदंबरनिकेतनसौख्यम् ॥ ५ ॥ संप्रयच्छतिनृ
णांभृगुणाचेद्वीक्षितःसुरगुरुःकुजसंस्थः ॥ लुब्धंरौद्रंसाहसैःसंयुतंचामित्रापत्योद्भूतसौख्योज्झितंच ॥ कुर्यान्मंत्रनिष्ठुरंदेवमंत्रीधात्रीपुत्रक्षेत्रगोमंददृष्टः
॥ ६ ॥ इतिभौमर्क्षगेगुरौग्रहदृष्टयः ॥ अथशुक्रागारस्थेगुरौग्रहदृष्टयः ॥ संगततविजयंक्षतगात्रंसामयंचबहुवाहनभृत्यम् ॥ मंत्रिणंहिकुरुतेसुर
मंत्रीदैत्यमंत्रिगृहगोरविदृष्टः ॥ १ ॥ सत्येनयुक्तंसततंविनीतंपरोपकाराभिरतंसुचित्तं ॥ सद्भाग्यभाजंकुरुतेमनुष्यंजीवःसितर्क्षेऽमृतरश्मिदृष्टः ॥ २ ॥

भाग्योपपन्नंसुतसौख्यभाजंप्रियंवदंभूपतिलब्धमानं ॥ नरंसदाचारपरंकरोतिभौमेक्षितेज्योभृगुजालयस्थः ॥ ३ ॥ सन्मंत्रविद्यानिरतंनितांतंभाग्या
न्वितंभूपतिलब्धवित्तम् ॥ चंचत्कलाज्ञंपुरुषंप्रकुर्याद्गुरुर्भृगुक्षेत्रगतोज्ञदृष्टः ॥ ४ ॥ धनान्वितंचारुविभूषणाढ्यंसद्वृत्तचित्तंविभवैःसमेतम् ॥ करोति
मर्त्यंसुरराजमंत्रीशुक्रालयस्थोभृगुसूनुदृष्टः ॥ ५ ॥ सत्पुत्रदारादिसुखैरुपेतंप्राज्ञंपुरग्रामभवोत्सवाढ्यम् ॥ नरंप्रकुर्याच्चतुरंसुरेज्योदैत्येज्यभस्थोऽर्कसु
तेनदृष्टः ॥ ६ ॥ इतिशुक्रागारस्थेगुरौग्रहदृष्टयः ॥ ॥ अथबुधवेश्मसंस्थेगुरौखगदृष्टयः ॥ ॥ सत्पुत्रदारं धनमित्रसौख्यंश्रेष्ठप्रतिष्ठाप्तविराज
मानम् ॥ नरंप्रकुर्यात्सुरराजमंत्रीरविप्रदृष्टोबुधवेश्मनिस्थः ॥ १ ॥ गुणान्वितंग्रामपुरोपकारंविराजमानंबहुगौरवेण ॥ कुर्यान्नरंदेवगुरुर्बुधर्क्षेसंस्थोनि
शानाथनिरीक्ष्यमाण ः ॥ २ ॥ संग्रामसंप्राप्तजयंक्षतांगंधनेनसारेणसमन्वितंच ॥ करोतिजातंविबुधेंद्रमंत्रीबुधालयस्थःक्षितिसूनुदृष्टः ॥ ३ ॥
सन्मित्रदारात्मजवित्तसौख्योदक्षोभवेत्ज्योतिषशिल्पवेत्ता ॥ स्याच्चारुभाषीपुरुषःप्रकामंजीवेबुधर्क्षेचबुधेनदृष्टे ॥ ४ ॥ धनांगनासूनुसुखैरुपेतःप्रासा
दवापीकृषिकर्मचित्तः ॥ भवेत्प्रसन्नःपुरुषःसुरेज्येदैत्येज्यदृष्टेबुधवेश्मसंस्थे ॥ ५ ॥ नरेंद्रसद्गौरवसंप्रयुक्तंनित्योत्सवंपूर्णगुणाभिरामम् ॥ नरंपुरग्रामप
तिंकरोतिगुरुर्ज्ञगेहेशनिनाप्रदृष्टः ॥ ६ ॥ इतिबुधवेश्मसंस्थेगुरौग्रहदृष्टयः ॥ ॥ अथकुलीरसंस्थेगुरौग्रहदृष्टयः ॥ दारात्मजार्थोद्भवसौख्यहानिः
पूर्वंचपश्चात्खलुतत्सुखानि॥कुर्यान्नराणांहिगुरुःसुराणांकुलीरसंस्थोरविणाप्रदृष्टः ॥१॥ नरेंद्रकोशाधिकृतिंसुकांतिंसद्वाहनार्थादिसुखोपपन्नम् ॥ सद्वृ
त्तचित्तंजनयेन्मनष्यंकर्कस्थितेज्योवानिजेनदृष्टः ॥ २ ॥ मित्राश्रयोत्पादितसर्वसिद्धिःसद्वृत्तबुद्धिर्विलसत्प्रतापः ॥ मंत्रीनरःकर्कटराशिसंस्थेगीर्वाणवं
द्येशशिसूनुदृष्टे ॥ ३ ॥ बव्हंगनावैभवमंगनानांनानासुखानामुपलब्धयःस्युः ॥ कुलीरयातेवचसामधीशोनिरीक्षितेदैत्यपुरोहितेन ॥ ४ ॥ सन्मान
भूपागुणचारुशीलःसेनापुरग्रामपतिर्नरःस्यात् ॥ अनल्पजल्पःखलुकर्कटस्थेवाचस्पतौसूर्यसुतेनदृष्टे ॥ ५ ॥ कुमारदारांबरचारुभूषाविशेषभाजंगु

णिनंचशूरम् ॥ प्राज्ञंक्षतांगंकुरुतेमनुष्यंकर्कस्थितेज्योऽवनिजेनदृष्टः ॥ ६ ॥ इतिगुरौकुलीरस्थेग्रहाणांदृष्टयः ॥ अथसिंहयातेजीवेग्रहदृष्टिः ॥
व्ययान्वितंख्यातमतीवधूर्त्तंनृपात्तवित्तंशुभकर्मचित्तम् ॥ नरंप्रकुर्यात्सुरराजपूज्यःसूर्येणदृष्टोमृगराजसंस्थः ॥ १ ॥ प्रसन्नमूर्त्तिगताचित्तशुद्धिंस्त्रीहेतु
संप्राप्तधनंवदान्यम् ॥ कुर्यात्पुमांसंवचसामधीशःशशांकदृष्टःकरिवैरिसंस्थः ॥ २ ॥ मान्योगुरूणांगुरुगौरवेणसत्कर्मनिर्माणविधौप्रवीणः ॥ प्राणी
भवेत्केसरिणिस्थितेऽस्मिन्गीर्वाणवंद्येऽवनिजेनदृष्टे ॥ ३ ॥ गृहादिनिर्माणविधौप्रवीणोगुणाग्रणीःस्यात्सचिवोनृपाणाम् ॥ वाणीविलासेप्रचुरोनरःस्यात्
सिंहस्थितेदेवगुरौज्ञदृष्टे ॥ ४ ॥ भूमीपतिप्राप्तमहत्पदस्थःकांताजनप्रीतिकरोगुणज्ञः ॥ भवेन्नरोदेवगुरौहरिस्थेनिरीक्षितेचासुरपूजितेन ॥ ५ ॥सु
खेनहीनंमलिनंसुवाचंकृशांगयष्टिंविगतोत्सवंच ॥ करोतिमर्त्यंमरुताममात्यःसिंहस्थितःसूर्यसुतेनदृष्टः ॥ ६ ॥ इतिसिंहयातेगुरौग्रहदृष्टिः ॥
॥ अथस्वगृहंप्रयातेगुरौग्रहदृष्टिः ॥ ॥ राज्ञाविरुद्धत्वमतीवनूनंसुहृज्जनेनाऽपिचवैमनस्यम् ॥ शत्रूद्गमःस्यान्नियतंनराणांजीवेऽर्कदृष्टेस्वगृहंप्रयाते॥१॥
सुगर्वितंभाग्यधनाभिवृध्याप्रियाप्रियत्वाभिमतंविशेषात् ॥ करोतिजातंसुखिनंविनीतंचंद्रेक्षितोदेवगुरुःस्वभस्थः ॥ २ ॥ व्रणांकितंसंगरकर्मदक्षंहिं
सापरंक्रूरतरस्वभावं ॥ परोपकाराभिरतंप्रकुर्याद्गुरुःस्वभस्थःक्षितिजेनदृष्टः ॥ ३ ॥ नृपाश्रयप्राप्तमहाधिकारोदाराधनैश्वर्यसुखोपपन्नः ॥ परोपका
रादरतैकचित्तोनरोगुरौस्वर्क्षगतेज्ञदृष्टे ॥४ ॥ सुखोपपन्नंनिधनंप्रसन्नंप्राज्ञंसदैश्वर्यविराजमानम् ॥ नूनंप्रकुर्यान्मनुजंसुरेज्योदैत्येज्यदृष्टोनिजमंदिरस्थः
॥ ५ ॥ पदच्युतंसौम्यसुतैर्विहीनंसंग्रामसंजातपराभवंच ॥ करोतिदीनंस्वगृहेसुरेज्योसूर्यात्मजेनप्रविलोक्यमानः ॥ ६ ॥ इतिस्वगृहेगुरौग्रहदृ
ष्टिः ॥ ॥ अथमंदस्थानंप्रयातेगुरौग्रहदृष्टयः ॥ ॥ प्रसन्नकांतिंशुभवाग्विलासंपरोपकारादरतासमेतम् ॥ कुलेनृपालंकुरुतेसुरेज्योमंदालयस्थो
यदिभानुदृष्टः ॥ १ ॥ कुलोद्वहस्तीव्रमतिःसुशीलोधर्मक्रियायांसुतरामुदारः ॥ नरोऽभिमानीपितृमातृभक्तोजीवेशनिक्षेत्रगतेंदुदृष्टे ॥ २ ॥ स्या

भ० दर्थसिद्धिर्नृपतिप्रसादात्कीर्त्तिः सुखानामुपलब्धिरेव ॥ सूतौसुरेड्येशनिमंदिरस्थेनिरीक्ष्यमाणेधरणीसुतेन ॥ ३ ॥ ज्ञातंनितांतंवनितानुकूलंधर्मक्रिया
६ यांनिरतंनितांतम् ॥ करोतिमर्त्यंमरुतांपुरोधाबुधेनदृष्टःशनिमंदिरस्थः ॥ ४ ॥ विद्याविवेकार्थगुणैःसमेतःपृथ्वीपतिप्राप्तमनोभिलाषः ॥ स्यात्पूरुषः
सूर्यसुतर्क्षसंस्थेजीवेप्रसूतौभृगुजेनदृष्टे ॥ ५ ॥ कामंसकामंसुगुणाभिरामंसद्मार्थप्राप्तिंधनधान्ययुक्तम् ॥ ख्यातंविनीतंकुरुतेमनुष्यंमंदेक्षितोमंदगृह
स्थजीवः ॥ ६ ॥ इतिमंदगृहंप्रयातेगुरौग्रहदृष्टिः ॥ ॥ अथकुजगेहयातेशुक्रेग्रहदृष्टयः ॥ ॥ कृपाविशेषंनृपतेर्नितांतमतीवजाया
जनितव्यलीकम् ॥ कुर्यान्नराणांतराणिप्रदृष्टःशुक्रोहिवक्रस्यगृहंप्रयातः ॥ १ ॥ श्रेष्ठप्रतिष्ठंचलवित्तवृत्तिंकामातुरत्वाद्विकृतिंप्रयातम् ॥ करोतिमर्त्यं
कुजगेहयातोभृगोःसुतःशीतकरेणदृष्टः ॥ २ ॥ धनेनमानेनसुखेनहीनंदीनविशेषान्मलिनंकरोति ॥ नूनंधरित्रीतनयालयस्थःशुक्रोधरित्रीतनयेन
दृष्टः ॥ ३ ॥ अनार्यमर्थात्मजनैर्विहीनंस्वबुद्धिसामर्थ्यपराङ्मुखंच ॥ क्रूरंपरार्थापहरंनरंहिकरोतिशुक्रःकुजभेज्ञदृष्टः ॥ ४ ॥ कलत्रपुत्रादिसुखैः
समेतंसत्कायकांतिंसुतरांविनीतम् ॥ उदारचित्तंप्रकरोतिमर्त्यंजीवेक्षितोदैत्यगुरुःकुजर्क्षे ॥ ५ ॥ सुगुप्तवित्ताभिमतंप्रशांतंमान्यंवदान्यंस्वजनानुया
तम् ॥ करोतिजातंक्षितिपुत्रगेहेसंस्थःसितोभानुसुतेनदृष्टः ॥ ६ ॥ इतिकुजगेहयातेशुक्रेग्रहदृष्टयः ॥ ॥ अथनिजवेश्मगेशुक्रेग्रह० ॥ व
रांगनाभ्योधनवाहनाभ्यःसुखानिनूनंलभतेमनुष्यः ॥ प्रसूतिकालेनिजवेश्मयातेसितेपतंगेननिरीक्ष्यमाणे ॥१॥ विलासिनीकेलिविलाससक्तःकुलाधिपा
लोऽमलबुद्धिशाली ॥ नरःसुशीलःशुभवाग्विलासःस्वीयालयेस्यात्स्फुजितींदुदृष्टे ॥२॥ गृहादिसौख्योपहतंनितांतंकलिप्रसंगाभिभवोपलब्धिम् ॥ कुर्यान्नरा
णांदनुजेंद्रमंत्रीस्वक्षेत्रसंस्थःक्षितिपुत्रदृष्टः ॥३॥ गुणाभिरामंसुभगंप्रकामंसौम्यंसुसत्वंधृतिसंयुतंच ॥ स्वक्षेत्रगोदैत्यगुरुःप्रकुर्यान्नरंतुषारांशुसुतेनदृष्टः
॥४॥ सद्वाहनानांगृहिणीगुणानांसुमित्रपुत्रद्रविणादिकानाम् ॥ करोतिलब्धिंनिजवेश्मयातःसितःसुराचार्यनिरीक्षितश्चेत् ॥ ५ ॥ गदाभिभूतोहतसाधुवृत्तः

सौख्यार्थहीनोमनुजोऽतिदीनः ॥ भवेत्प्रसूतौनिजवेश्मयातेभृगोः सुतेभानुसुतेनदृष्टे॥ ६ ॥ इतिनिजवेश्मगेशुक्रेग्रहदृष्टयः ॥ ॥ अथबुधर्क्षसंस्थेशुक्रेग्र
हदृष्टिः ॥ नृपावरोधाधिकृतंविनीतंगुणान्वितंशास्त्रकृतप्रवेशम् ॥ कुर्यान्नरंदैत्यगुरुःप्रसूतौसौम्यर्क्षसंस्थोरविणाप्रदृष्टः ॥ १ ॥ सदन्नवस्त्रादिसुखोपपन्नंनी
लोत्पलश्यामलचारुनेत्रम्॥सुकेशपाशंमनुजंप्रकुर्यात्सौम्यर्क्षसंस्थोभृगुरिंदुदृष्टः ॥ २ ॥ भाग्यान्वितःकामविधिप्रवीणःकांतानिमित्तंद्रविणव्ययःस्यात्॥ न
रोहिनीहारकरात्मजर्क्षेस्थितेसितेभूमिसुतेनदृष्टे॥ ३ ॥ प्रज्ञांमहद्वाहनवित्तवृद्धिंसेनापतित्वंपरिवारसौख्यम् ॥ कुर्यान्नराणामुशनाप्रकामंबुधर्क्षसंस्थश्चबुधे
नदृष्टः ॥ ४ ॥ सद्बुद्धिवृद्धिर्बहुवैभवाढ्यःप्रसन्नचेताःसुतरांविनीतः ॥ मर्त्योभवेत्सौम्यगृहोपयातेदृष्टेसितेदेवपुरोहितेन ॥५॥ पराभिभूतंचपलंविवित्तंसुदुः
खितंसर्वजनोज्झितंच ॥ मर्त्यंकरोत्येवभृगोस्तनूजःसोमात्मजर्क्षेरविजेनदृष्टः ॥ ६ ॥ इतिबुधर्क्षसंस्थेशुक्रेग्रहदृष्टयः ॥ ॥ अथकर्कटगेशुक्रे
ग्रहदृष्टिः ॥ ॥ सरोषयोषाकृतहर्षनाशःस्यात्पूरुषःशत्रुजनाभिभूतः ॥ दैत्यार्चितेकर्कटराशियातेनिरीक्षितेऽहर्पतिनाप्रसूतौ ॥ १ ॥ कन्या
प्रजापूर्वकपुत्रलाभमंबांसपत्नींबहुगौरवाणि ॥ कुर्यान्नराणांहरिणांकदृष्टःकुलीरगोभार्गवनामधेयः ॥ २ ॥ कलासुदक्षोहतशत्रुपक्षोबुध्याचसौख्ये
नयुतोमनुष्यः ॥ परंतुकांताकृतचिंतयार्त्तोभौमेक्षितेकर्कटगेसितेस्यात् ॥ ३ ॥ विद्याप्रवीणंगुणिनंगुणज्ञंकलत्रपुत्रोद्भवदुःखततम् ॥ जनोज्झितंचा
पिकरोतिमर्त्यंकाव्यःकुलीरोपगतोज्ञदृष्टः ॥ ४ ॥ अतिचतुरमुदारंचारुवृत्तंविनीतंमतिविभवसमेतंकामिनीसूनुसौख्यम् ॥ प्रियवचनविलासंमानु
षंसंविधत्तेसुरपतिगुरुदृष्टोभार्गवःकर्कसंस्थः ॥ ५ ॥ सद्वृत्तसौख्योपहतंगतार्थंव्यर्थप्रयत्नंवनिताजितंच ॥ स्थानच्युतंसंजनयेन्मनुष्यंमंदेक्षितः कर्कग
तःसिताख्यः ॥ ६ ॥ इतिकर्कराशिस्थेशुक्रेग्रहदृष्टयः ॥ ॥ अथसिंहेसितेखगदृष्टयः ॥ ॥ स्पर्धातिसंवर्धितचित्तवृत्तिःकांताश्र
योत्पन्नधनोमनुष्यः ॥ क्रमेलकाद्यैर्यदिवायुतःस्यादर्केक्षितेसिंहगतेसिताख्ये ॥ १ ॥ नूनंजनन्याश्चभवेत्सपत्नीपत्नीविरोधोविभवोद्भवश्च ॥ यस्यप्र

भ० सूतोदनुजेंद्रमंत्रीचंद्रेक्षितःसिंहगतोयदिस्यात् ॥ २ ॥ नृपप्रियंधान्यधनैरुपेतंकंदर्पजातव्यसनाभिभूतम् ॥ करोतिमर्त्यंमृगराजसंस्थोभृगोस्तनूजोऽ
७ वनिजेनदृष्टः ॥ ३ ॥ धनान्वितंसंग्रहचित्तवृत्तिंलुब्धंस्मराधिक्यविकारनिंद्यम् ॥ दैत्येंद्रमंत्रीकुरुतेमनुष्यंसिंहास्थितःसोमसुतेनदृष्टः ॥ ४ ॥ नरें
द्रमंत्रीधनवाहनाढ्योबह्वंगनानंदनभृत्यसौख्यः ॥ विख्यातकर्माचभृगोस्तनूजेजीवेक्षितेसिंहगतेनरःस्यात् ॥ ५ ॥ नृपोपमंसर्वसमृद्धिभाजंदंडाधिका
रेऽप्यथवानियुक्तम् ॥ करोतिमर्त्यंमृगराजवर्त्तीदैत्यार्चितःसूर्यसुतेनदृष्टः ॥ ६ ॥ इतिसिंहेसितेखगदृष्टयः । अथजीवभवनेशुक्रेग्रहदृष्टिः । ॥
रौद्रंप्राज्ञंभाग्यसौभाग्यभाजंसत्वोपेतंवित्तवंतंविशेषात् ॥ नानादेशप्राप्तयानंमनुष्यंकुर्याच्छुक्रोजीवभेभानुदृष्टः ॥ १ ॥ सद्राजमानेनविराजमानंख्यातं
विनीतंबहुभोगयुक्तम् ॥ धीरंससारंहिनरंकरोतिभृगुर्गुरुक्षेत्रगतोऽब्जदृष्टः ॥ २ ॥ द्विषामसत्वंधनिनंप्रसन्नंकांताकृतप्रेमभरंसुपुण्यम् ॥ सद्वाहना
ढ्यंकुरुतेमनुष्यंभौमेक्षितेज्यालयगामिशुक्रः ॥ ३ ॥ सद्वाहनार्थांबरभूषणानांलाभंसदन्नानिसुखानिनूनम् ॥ कुर्यान्नराणांगुरुमंदिरस्थोदैत्यार्चितः
सोमसुतेनदृष्टः ॥ ४ ॥ तुरंगहेमांबरभूषणानांमहागजानांवनितासुखानाम् ॥ करोत्यवाप्तिंभृगुजःप्रसूतौजीवेक्षितोजीवगृहाश्रितश्च ॥ ५ ॥ सद्भो
गसौख्योत्तमकर्मभाजंनित्योत्सवोत्कर्षयुतंसुवित्तम् ॥ करोतिमर्त्यंगुरुगेहयातोदैत्यार्चितोभानुसुतेक्षितश्च ॥ ६ ॥ इतिजीवगेहेशुक्रेग्रहदृष्टयः । ॥
अथशनिक्षेत्रगतशुक्रेखेटदृशः । ॥स्थिरस्वभावंविभवोपपन्नंमहाधनंसारविराजमानम् ॥ कांताविलासैःसहितंप्रकुर्याद्भृगुःशनिक्षेत्रगतोऽर्कदृष्टः ॥१॥
ओजस्विनंचारुशरीरयष्टिंप्रकृष्टसत्वंधनवाहनाढ्यम् ॥ करोतिमर्त्यंशनिगेहयातोभृगोःसुतःशीतकरेणदृष्टः ॥ २ ॥ श्रमामयाभ्यामतितप्तमूर्त्तिमन
र्थतोऽर्थक्षतिसंयुतंच ॥ कुर्यान्नरंदानवराजपूज्य.कुजेक्षितःसूर्यसुतालयस्थः ॥३॥ विद्वद्विधिज्ञंधनिनंसुतुष्टंप्राज्ञंसुसत्वंबहुलप्रपंचम् ॥ सद्वाग्विलासंमनु
जंप्रकुर्याद्भृगुःशनिक्षेत्रगतोज्ञदृष्टः ॥ ४ ॥ सद्गंधमाल्यांबरचारुवाद्यसंगीतसंजातरुचिःशुचिश्च ॥ स्यान्मानवोदानवराजपूज्येसुरेज्यदृष्टेशनिमंदिरस्थे

॥ ५ ॥ प्रसन्नगात्रंचविचित्रलाभंधनांगनावाहनसूनुसौख्यम् ॥ कुर्यान्नरंदानववृंददेवोमंदोक्षितोमंदगृहेऽधिसंस्थः ॥ ६ ॥ इतिशुक्रेग्रहदृष्टयः ॥ ॥
अथभौमालयस्थेशनौग्रहदृष्टयः ॥ लुलायगोजाविसमृद्धिभाजंकृषिक्रियायांनिरतंसदैव ॥ सत्कर्मसक्तंजनयेन्मनुष्यंभौमालयस्थोशनिरर्कदृष्टः ॥ १
नीचानुयातंचपलंकुशीलंखलंसुखार्थैःपरिवर्जितंच ॥ कुर्यादवश्यंरविजोमनुष्यंशशीक्षितोभूसुतवेश्मसंस्थः ॥ २ ॥ अनल्पजल्पंगतसत्परार्थकार्यं
क्षतिंजातविशेषवित्तम् ॥ करोतिजातंननुभानुसूनुःकुजेनदृष्टःकुजवेश्मसंस्थः ॥ ३ ॥ चौर्यकर्मकलहादितत्परंकामिनीजनगतोत्सवंनरम् ॥ ज्ञेक्षितो
हिकुरुतेऽर्कनंदनोभूमिसूनुभवनाधिसंस्थितः ॥ ४ ॥ सुखधनैःसौहंतनृपमंत्रिणंनृपसमाश्रितमुख्यतयान्वितम् ॥ सुरपुरोहितवीक्षितभानुजोऽवनिजवे
श्मगतःकुरुतेनरम् ॥ ५ ॥ बहुप्रयाणाभिरतंविकांतिंपापांगनासक्तमतिंविचित्तम् ॥ करोतिमर्त्यंक्षितिजालयस्थोभानोस्तनूजोभृगुजेनदृष्टः ॥ ६ ॥
इतिशनौभौमालयस्थेग्रहदृष्टयः ॥ ॥ अथशुक्रवेश्मगेशनौग्रहदृष्टयः ॥ विद्याविचारेप्रचुरोऽतिवक्तापरान्नभोक्ताविधनश्चशांतः ॥ भवेन्नरास्ति
ग्मकरेणदृष्टेसूर्यात्मजेभार्गववेश्मसंस्थे ॥ १ ॥ नृपप्रसादाप्तमहाधिकारंयोषाविभूषांबरजातसौख्यम् ॥ बलान्वितंसंजनयेन्मनुष्यंमंदःसितर्क्षेहरि
णांकदृष्टः॥ २ ॥ संग्रामकार्याभिरतंनितांतमनल्पजल्पंचमहत्प्रसादम् ॥ कुर्यान्नरंतिग्मकरस्यसूनुर्भूसूनुदृष्टोभृगुजालयस्थः ॥ ३ ॥ कांतारतोनी
चजनानुयातोविनोदहास्याभिरतोगतार्थः ॥ क्लीबादिसख्यश्चभवेन्मनुष्यःशनौसितर्क्षेशशिसूनुदृष्टे ॥ ४ ॥ परोपकारेकृतचित्तवृत्तिःपरस्यदुःखेनस
दुःखितश्च ॥ दातोद्यमीसर्वजनप्रियश्चमंदेसितर्क्षेगुरुणाप्रदृष्टे ॥ ५ ॥ रत्नादिलाभंवनिताविलासंजलाधिकत्वंनृपगौरवाप्तिम् ॥ कुर्यान्नराणांतरणेस्त
नूजःशुक्रेक्षितःशुक्रगृहंप्रयातः ॥ ६ ॥ इतिशनौशुक्रोदवसितंप्रयातेग्रहाणांदृष्टयः ॥ अथबुधमंदिरेशनौखेटदृशः ॥ सुखोज्झितंनीचरतं
सकोपमधार्मिकंद्रोहकरंसुधीरम् ॥ कुर्यान्नरंतिग्मकरस्यसूनुर्भानुप्रदृष्टेबुधमंदिरस्थः ॥ १ ॥ प्रसन्नमूर्त्तिर्नृपतिप्रसादप्राप्ताधिकारोन्नतिरार्यवृत्तिः॥

कांताधिकारोयदिवानरःस्यान्मंदेज्ञभस्थेमृतरश्मिदृष्टे ॥ २ ॥ प्रकृष्टबुद्धिंसुतरांविधिज्ञंख्यातंगभीरंचनरंकरोति ॥ सोमात्मजक्षेत्रगतोऽर्कसूनुर्भूसूनु
दृष्टःपरिसूतिकाले ॥ ३ ॥ धनान्वितंचारुमतिंविनीतंगीतप्रियंसंगरकर्मदक्षम् ॥ शिल्पेऽप्यभिज्ञंमनुजंप्रकुर्यात्सौम्येक्षितःसौम्यगृहस्थमंदः ॥ ४ ॥
राजाश्रितश्चारुगुणैःसमेतःप्रियःसतांगुप्तधनोमनस्वी ॥ भवेन्नरोमंदचरोयदिस्यात्तज्ज्ञराशिसंस्थःसुरपूज्यदृष्टः ॥ ५ ॥ योषाविभूषाकरणेप्रवीणंसत्कर्म
धर्मानुरतंनितांतं ॥ स्त्रीसक्तचित्तंप्रकरोतिमर्त्यंसितेक्षितोभानुसुतोज्ञगेहे ॥ ६ ॥ इतिबुधगेहेशनौग्रहदृष्टयः अथकुलीरोपगतमंदंप्रतिग्रहदृष्टिः ॥
आनंददारद्रविणैर्विहीनःसदान्नभोगैरपिवोज्झितश्च ॥ मातुर्महत्क्लेशकरोनरःस्यान्मंदेकुलीरोपगतेऽर्कदृष्टे ॥ १ ॥ निपीडनंबंधुजनेजनन्यांनूनंधनाना
मभिवर्द्धनंच ॥ कुर्यान्नराणांद्युमणेस्तनूजःकुलीरसंस्थोद्विजराजदृष्टः ॥ २ ॥ गलद्बलक्षीणकलेवरश्चनृपार्पितार्थोत्तमवैभवोपि ॥ स्यान्मानुषोभानुसु
तेप्रसूतौकर्कस्थितेक्षोणिसुतेनदृष्टे ॥ ३ ॥ वाग्विलासकठिनोटनबुद्धिश्चेष्टितैर्बहुविधैरपियुक्तः ॥ दंभवृत्तिचतुरोपिनरःस्यात्कर्कगामिनिशनौबुधदृष्टे
॥ ४ ॥ क्षेत्रपुत्रगृहगोहिर्निधनैरत्नवाहनविभूषणैरपि ॥ संयुतोभवतिमानवोजनौजीवदृष्टियुजिकर्कगेशनौ ॥ ५ उदारतागौरवचारुमानैःसौंदर्यवर्यामं
लवाग्विलासैः ॥ नूनंविहीनामनुजाभवेयुःशुक्रेक्षितेकर्कगतेऽर्कसूनौ ॥ ६ ॥ इतिकर्कोपगतेशनौग्रहदृष्टयः ॥ ॥ अथसिंहोपयातेमंदेग्रहदृष्टिः ॥
धनेनधान्येनचवाहनेनसद्वृत्तसत्योत्तमचेष्टितैश्च ॥ भवेद्विहीनोमनुजःप्रसूतौसिंहस्थितेभानुसुतेऽर्कदृष्टे ॥ १ ॥ सद्रत्नभूषांबरचारुकीर्त्तिकलत्रमित्रा
त्मजसौख्यपूर्त्तिम् ॥ प्रसन्नमूर्त्तिकरुतेऽर्कसुनुर्नरंहरिस्थोहरिणांकदृष्टः ॥ २ ॥ संग्रामकर्मण्यतिनैपुणःस्यात्कारुण्यहीनोमनुजःसकोपः ॥ क्रूरस्वभा
वोननुभानुसूनौपंचाननस्थेऽवनिसूनुदृष्टे ॥ ३ ॥ धनांगनासूनुसुखेनहीनंदीनंचनीचव्यसनाभिभूतम् ॥ करोतिजातंतपनस्यसूनुःसिंहस्थितेऽसोम
सुतेक्षितश्च ॥ ४ ॥ सन्मित्रपुत्रादिगुणैरुपेतंख्यातंसुवृत्तंसुतरांविनीतम् ॥ नरंपुरग्रामपतिंकरोतिसौरिर्हरिस्थोगुरुणाप्रदृष्टः ॥ ५ ॥ धनैश्चधान्यैर

पिवाहनैश्वसुखैरुपेतंवनितांप्रतप्तम् ॥ कुर्यान्मनुष्यंतपनस्यसूनुःपंचाननस्थोभृगुसूनुदृष्टः ॥ ६ ॥ इतिसिंहोपयातेशनौग्रहदृष्टयः ॥ ॥ अथगुर्वं
गारेशनैश्वरेग्रहाणांदृष्टिः॥ ख्यातिंधनाप्तिंबहुगौरवाणिस्नेहप्रवृत्तिंपरनंदनेषु ॥ लभेन्नरोदेवगुरोरगारेशनैश्वरेपद्मिनिनाथदृष्टे ॥ १ ॥ सद्वृत्तशाली
जननीवियुक्तोनामद्वयालंकरणप्रयातः ॥ सुखार्थभार्यासुखभाङ्नरःस्यात्सौरेसुरेड्यालयगेऽब्जदृष्टे ॥ २ ॥ वातान्वितंलोकविरुद्धचेष्टंप्रवासिनंदीन
तरंकरोति ॥ नरंधरासूनुनिरीक्ष्यमाणोमार्तंडपुत्रःसुरमंत्रिणोभे ॥ ३ ॥ गुणाभिरामोधनवान्प्रकामंनराधिराजाप्तमहाधिकारः ॥ नरःसदाचरविरा
जमानःशनौज्ञदृष्टेगुरुमंदिरस्थे॥४॥नृपप्रधानःपृतनापतिर्वासर्वाधिशालीबलवान्सुशीलः॥स्यान्मानवोभानुसुतेप्रसूतौजीवेक्षितेजीवगृहंप्रयाते ॥ ५॥ वि
देशवासीबहुकार्यसक्तोद्विमातृपुत्रःसुतरांपवित्रः ॥ स्यान्मानवोदानवमंत्रिदृष्टेमंदेमराचार्यगृहंप्रयाते ॥६॥ इतिगुर्वंगारेशनैश्वरेग्रहाणांदृष्टयः॥ ॥
अथनिजागारंगतमंदंप्रतिग्रहदृष्टयः ॥ कुरूपभार्यश्चपरान्नभोक्तानानाप्रयासामयसंयुतश्च ॥ विदेशवासीप्रभवेन्मनुष्योमंदोनिजागारगतेर्कदृष्टे ॥ १ ॥
धनांगनाढ्यंवृजिनानुयातंचलत्स्वभावंजननीविरुद्धम् ॥ कामातुरंचापिनरंप्रकुर्यान्मंदःस्वभस्थोऽमृतरश्मिदृष्टः ॥ २ ॥ शूरःक्रूरःसाहसीसद्गुणाढ्यः
सर्वोत्कृष्टःसर्वदाहृष्टचित्तः ॥ ख्यातोमर्त्यश्चात्मभस्थेऽर्कपुत्रेधात्रीपुत्रप्रेक्षणत्वंप्रयाते ॥ ३ ॥ सद्वाहनान्साहसिकान्ससत्वान्धीरांश्चनानाविधका
र्यसक्तान् ॥ करोतिमर्त्यान्ननुभानुपुत्रःस्वक्षेत्रसंस्थःशशिपुत्रदृष्टः ॥ ४ ॥ गुणान्वितंक्षोणिपतिप्रधानंनिरामयंचारुशरीरयष्टिम् ॥ कुर्यान्नरंदेव
गुरुप्रदृष्टश्चंडांशुसूनुर्निजवेश्मसंस्थः ॥ ५ ॥ कामातुरंसन्नियमेनहीनंभाग्योपपन्नंसुखिनंधनाढ्यम् ॥ भोक्तारमीशंकुरुतेस्वभस्थोरवेःसुतोभार्गवसू
नुदृष्टः ॥ ६ ॥ इतिनिजागारंगतमंदंप्रतिग्रहदृष्टयः ॥ ॥ इतिश्रीढुंढिराजविरचितेजातकाभरणेग्रहदृष्टिफलाध्यायः ॥ अथराशिफलानि ॥
॥ भवतिसाहसकर्मकरोनरोरुधिरपित्तविकारकलेवरः ॥ क्षितिपतिर्मतिमान्सहितस्तदासुमहसामहसामधिपेक्रिये ॥१ ॥ परिमलैर्विमलैःकुसुमाश

नैःसुवसनैःपशुभिःसुखमद्भुतम् ॥ गविगतोहिरविर्जलभीरुतांविहितमाहितमादिशतेनृणाम् ॥ २ ॥ गणितशास्त्रकलामलशीलितासुललिताद्भुत
वाक्प्रथितोभवेत् ॥ दिनपतौमिथुनेननुमानवोविनयतानयतातिशयान्वितः ॥ ३ ॥ सुजनतारहितःकिलकालवित्जनकवाक्यविलोपकरोनरः ॥ दि
नकरेहिकुलीरगतेभवेत्सधनताधनतासहिताधिकः ॥ ४ ॥ स्थिरमतिश्चपराक्रमताधिकोविभुतयायुतकीर्त्तिसमन्वितः ॥ दिनकरेकरिवैरिगतेनरो
नृपरतोपरतोषकरोभवेत् ॥ ५ ॥ दिनपतौयुवतौसमवस्थितेनरपतेर्द्रविणंहिनरोलभेत् ॥ मृदुवचाश्रुतगेयपरायणःसुमहिमामहिमापहिताहितः ॥६॥
नरपतेरतिभीरुरहर्निशंजनविरोधविधानमघंदिशेत् ॥ कलिमनाःपरकर्मरतिर्घटेदिनमणिर्नमणिद्रविणादिकम् ॥ ७ ॥ कृपणताकलहंचभृशरुषंवि
षहुताशनशस्त्रभयंदिशेत् ॥ अलिगतःपितृमातृविरोधितांदिनकरोनकरोतिसमुन्नतिम्॥८॥ स्वजनकोपमतीवमहन्मतिंबहुधनंहिधनुर्धरगोरविः ॥ सु
जनपूजनमादिशतेनृणांसुमतितोमतितोषविवर्धनम् ॥ ९ ॥ अटनतांनिजपक्षविपक्षतामधनतांकुरुतेसततंनृणाम् ॥ मकरराशिगतोविगतोत्सवंदिनवि
भुर्नविभुत्वसुखंदिशेत् ॥ १० ॥ कलशगामिनिपंकजिनीपतौशठतरोहिनरोगतसौहृदः ॥ मलिनताकलितोरहितःसदाकरुणयारुणयात्तसुखोभ
वेत् ॥ ११ ॥ बहुधनंक्रयविक्रयतःसुखंनिजजनादपिगृत्द्यमहाभयम् ॥ दिनपतौगुरुभेऽभिमतोभवेत्सजनतोजनतोषदसन्मतिः ॥ १२ ॥ इति
राशिस्थितरविफलम् ॥ ॥ अथराशिस्थचंद्रफलम् ॥ स्थिरधनोरहितःसुजनैर्नरःसुतयुतःप्रमदाविजितोभवेत् ॥ अजगतोद्विजराजइतीरितांविभु
तयाद्भुतयास्वसुकीर्तिभाक् ॥ १ ॥ स्थिरगतिंसुमतिंकमनीयतांकुशलतांहिनृणामुपभोगताम् ॥ वृषगतोहिभृगुर्भृशमादिशेत्सुकृतितःकृतितश्चसुखानि
च ॥ २ ॥ प्रियकरःकरमत्स्ययुतोनरःसुरतसौख्यभरोयुवतिप्रियः ॥ मिथुनराशिगतोहिमगोभवेत्सुजनताजनताकृतगौरवः ॥ ३ ॥ श्रुतकला
बलनिर्मलवृत्तयःकुसुमगंधजलाशयकेलयः ॥ किलनरास्तुकुलीरगतेविधौवसुमतीसुमतीप्सितलब्धयः ॥ ४ ॥ अचलकाननयानमनोरथंगृह

कलिंचगलोदरपीडनम् ॥ द्विजपतिर्मृगराजगतोनृणांवितनुतेतनुतेजवहीनताम् ॥ ५ ॥ युवतिगेशशिनिप्रमदाजनप्रबलकेलिविलासकुतूहलैः ॥
विमलशीलसुताजननोत्सवैःसुविधिनाविधिनासहितःपुमान् ॥ ६ वृषतुरंगमविक्रमविक्रमद्विजसुरार्चनदानमनाःपुमान् ॥ शशिनितौलिगतेबहुदा
रभाग्विभवसंभवसंचितविक्रमः ॥ ७ ॥ शशिधरेहिसरीसृपगेनरोनृपदुरोदरजातधनक्षयः ॥ कलिरुचिर्विबलःखलमानसःकृशमनाःशमनाप
हतोभवेत् ॥ ८ ॥ बहुकलाकुशलःप्रबलोमहाविमलताकलितःसरलोक्तिभाक् ॥ शशधरेतुधनुर्धरगेनरोधनकरोनकरोतिबहुव्ययम् ॥ ९ ॥
कलितशीतभयःकिलगीतवित्तनुरुषासहितोमदनातुरः ॥ निजकलोत्तमवृत्तिकरःपरंहिमकरेमकरेपुरुषोभवेत् ॥ १० ॥ अलसतासहितोन्यसु
तप्रियःकुशलताकलितोऽतिविचक्षणः ॥ कलशगामिनिशीतकरेनरःप्रशमितोशमितोरुरिपुव्रजान् ॥ ११ ॥ शशिनिमीनगतेविजितेंद्रियोबहु
गुणःकुशलोजललालसः ॥ विमलधीःकिलशास्त्रकलादरस्त्वबलताबलताकलितोनरः ॥ १२ ॥ इतिचंद्रफलम् ॥ ॥ अथराशिग
तभौमफलम् ॥ ॥ क्षितिपतेःक्षितिमानधनागमैःसुवचसामहसाबहुसाहसैः ॥ अवनिजःकुरुतेसततंयुतंत्वजगतोजगतोऽभिमतंनरम् ॥ १ ॥
गृहधनाल्पसुखंचरिपूदयंपरगृहास्थितिमादिशतेनृणाम् ॥ अवनयाग्निरुजौवृषभस्थितःक्षितिसुतोऽतिसुतोद्भवपीडनम् ॥ २ ॥ बहुकलाकलनंकुल
जोत्कलिंप्रचलनंप्रियतांचनिजस्थलात् ॥ ननुनृणांकुरुतेमिथुनस्थितःकुतनयस्तनयप्रमुखासुखम् ॥ ३ ॥ परगृहस्थिरतामतिदीनताविमतितांश
मितांचरिपूदयम् ॥ हिमकरालयगेकिलमंगलेप्रबलयाबलयाकलहंव्रजेत् ॥ ४॥ अतितरांसुतदारसुखान्वितोहतरिपुर्विततोद्यमसाहसः ॥अवनिजे
मृगराजगतेपुमाननयतानयताभियुतोभवेत् ॥ ५ ॥ सुजनपूजनताजनताधिकोयजनयाजनकर्मरतोभवेत् ॥ क्षितिसुतेसतिकन्यकयान्वितेत्ववनितो
वनितोत्सवतःसुखी ॥ ६ ॥ बहुधनव्ययतांगविहीनतागतगुरुप्रियतापरितापितः ॥ वणिजभूमिसुतेविकलःपुमानवनितोवनितोद्भवदुःखितः ॥७॥

भ० विषहुताशनशस्त्रभयान्वितःसुतसुतावनितादिमहत्सुखः ।। वसुमतीसुतभाजिसरीसृपेनृपरतःपरतश्चजयंव्रजेत् ।। ८ ।। रथतुरंगमगौरवसंयुतःपर
० मरातिजनक्षतिदुःखितः ।। भवतिनावनिजेधनुषिस्थितेसुवनितावनिताभ्रमणिप्रियः ।। ९ ।। रणपराक्रमतावनितासुखंनिजजनप्रतिकूलतयाश्रमः।।
विभवतामनुजस्यधरात्मजेमकरगेकरगेचरमोभवेत् ।। १०।। विनयतारहितंसहितंरुजानिजजनप्रतिकूलमलंखलम् ।। प्रकुरुतेमनुजंकलशाश्रितःक्षि
तिसुतोऽतिसुतोद्भवदुःखितम्।। ११ ।।व्यसनतांखलतामदयालुतांविकलतांचलनंचनिजालयात्।। क्षितिसुतास्तिमिनासुसमन्वितोविमतिनामनिनाशन
मादिशेत् ।। इतिभौमः ।। ।। अथबुधः ।। ।। खलमतिःकिलचंचलमानसोबहुलभुक्कलहाकुलितोनरः ।। अकरुणोनृणवांश्चबुधंभवेदाविग
तेविगतेक्षितसाधनः ।। १ ।। वितरणप्रणयंगुणिनंदिशेद्बहुकलाकुशलंरतिलालसं ।। धनिनमिंदुसुतोवृषभस्थितस्तनुजतोऽनुजतोऽतिसुखंनरम् ।।२।।
प्रियवचारचनासुविचक्षणोद्विजननीतनयःशुभवंशभाक् ।। मिथुनगेजननेशशिनंदनेसदनतोदनतोऽपिसुखीनरः ।।३।। कुचरितानिचगीतकथादरोनृप
रुचिःपरदेशगतिर्नृणाम् ।। किलकुलीरगतेशशभृत्सुतेसुरततारततावितरांभवेत् ।। ४ ।। अनृततासहितंविमतिंपरंसहजवैरकरंकुरुतेनरम् ।। युव
तिहर्षपरंशशिनःसुतोहरिगतोऽरिगतोन्नतिदुःखितम् ।। ५ ।। सुवचनानुरतश्चतुरोनरोलिखनकर्मपरोहिवरोन्नतिः ।। शशिसुतेयुवतौचगतेसुखी
सुनयनानयनांबलवेष्टितैः।।६।।अनृतवाक्व्ययभाक्खलुशिल्पवित्कुचारिताभिरतिर्बहुजल्पकः ।। व्यसनयुङ्मनुजःसहितेबुधेऽत्रतुलयातुलयात्वसतायु
तः ।। ७ ।। कृपणतातिरतिप्रणयश्रमोविहितकर्मसुखोपहतिर्भवेत् ।। धवलभानुसुतेऽलिगतेक्षतिस्त्वलसतालसतोऽपिचवास्तुनः ।। ८ ।। वितरण
प्रणयोबहुवैभवःकुलपतिश्चकलाकुशलोभवेत् ।। शशिसुतेऽत्रशरासनसंस्थितोविहितयाहितयारमयान्वितः ।। ९ ।। रिपुभयेनयुतःकुमतिर्नरःस्म
रविहीनतरःपरकर्मकृत् ।। मकरगेसतिशीतकरात्मजेव्यसनतःसनतःपुरुषोभवेत् ।। १० ।। गृहकलिंककलशेशशिनंदनेवितनुतेतनुताननुदीनताम् ।।

धनपराक्रमधर्मविहीनतांविमतितामतितापितशत्रुभिः ॥११॥ परधनादिकरक्षणतत्परोद्विजसुरानुचरोहिनरोभवेत् ॥ शशिसुतेपृथुरोमसमाश्रितेसुवद
नावदनानुविलोकनः ॥ १२ ॥ इतिबुधः ॥ अथगुरुफलम् ॥ बहुतरांकुरुतेसमुदारतांसुराचितांनिजवैरिसमुन्नतिम् ॥ विभवतांचमरु
त्पतिपूजितःक्रियगतोरुगतोरुमतिप्रदः ॥ १ ॥ द्विजसुरार्चनभक्तिविभूतयोद्रविणवाहनगौरवलब्धयः ॥ सुरगुरौवृषभेबहुवैरिणश्वरणगारणगाढप
राक्रमैः ॥ २ ॥ कवितयासहितःप्रियवाक्शुचिर्विमलशीलरुचिर्निपुणःपुमान् ॥ मिथुनगेसतिदेवपुरोहितेसहितताहिततासहितैर्भवेत् ॥३॥ बहुध
नागमनोमदनोन्नतिर्विविधशास्त्रकलाकुशलोनरः ॥ प्रियवचाश्वकुलीरगतेगुरौचतुरगैस्तुरगैःकरिभिर्यतः ॥ ४ ॥ अचलदुर्गवनप्रभुतोर्जितो
दृढतनुर्ननुदानपरोभवेत् ॥ अरिविभूतिहरोहिनरोयुतःसुवचसावचसामधिपेगुरौ ॥ ५ ॥ कुसुमगंधसदंबरशालिताविमलताधनदानमतिर्भृशम् ॥
सुरगुरौसुतयासतिसंयुतोरुचिरताचिरतापितशत्रुता ॥ ६ ॥ श्रुततपोजपहोममहोत्सवद्विजसुरार्चनदानमतिर्भवेत् ॥ वणिजिजन्मनिचित्रशिखंडि
जेचतुरतातुरतासहितारिता ॥७॥ धनविनाशनदोषसमुद्भवैःकृशतरोबहुदंभपरोनरः ॥ अलिगतेसतिदेवपुरोहितेभवनतोवनतोपिचदुःखभाक् ॥८॥
वितरणप्रणयोबहुवैभवंननुधनान्यथवाहनसंचयः ॥ धनुषिदेवगुरौहिमतिर्भवेत्सरुचिरारुचिराभरणानिच ॥९॥ हतमतिःपरकर्मकरोनरोस्मराविहीनतरो
मयरोषभाक् ॥ सुरगुरौमकरेविदधातिनोजनमनोनमनोरथसाधनम् ॥१०॥ गदयुतःकुमतिर्द्रविणोज्झितःकृपणतानिरतःकृतकिल्बिषः ॥ घटगतेस
तिदेवपुरोहितेकदशनोदशनोदरपीडितः ॥ ११ ॥ नृपकृपातधनोमदनोन्नतिःसदनसाधनदानपरोनरः ॥ सुरगुरौतिमिनासहितेसतामनुमतोनुमतो
त्सवदोभवेत् ॥ १२ ॥ इतिगुरुः ॥ ॥ अथशक्रः ॥ भवनवाहनवृंदपुरोधिपःप्रचलनप्रियताविहितादरः ॥ यदिचसंजननेहिभवेद्रविःकवियु
तोवियुतोरिपुभिर्नरः ॥ १ ॥ बहुकलत्रयुतोत्सवगौरवंकुसुमगंधरुचिःकृषिनिर्मितिः ॥ वृषगतेभृगुजेकमलाभवेदविरलाविरलारिपुमंडला ॥ २ ॥

भृगुसुतेजननेमिथुनस्थितेसकलशास्त्रकलामलकौशलम् ॥ सरलताललिताकिलभारतीसुमधुरामधुरान्नरुचिर्भवेत् ॥ ३ ॥ द्विजपतेःसदनेभृगुनंदने
विमलकर्ममतिर्गुणसंयुतः ॥ जनमलंसकलंकुरुतेवशं सुकलयाकलयापिगिरानरः ॥ ४ ॥ हरिगतेसुरवैरिपुरोहितेयुवतितोधनमानसुखानिच ॥
निजजनव्यसनान्यपिमानवस्त्वहिततोहिततोषमनुव्रजेत् ॥५॥ भृगुसुतेसतिकन्यकयाऽन्वितेबहुधनीखलुतीर्थमनोरथः ॥ कमलयापुरुषोतिविभूषितस्त्वमि
तयामितयापिगिरान्वितः ॥ ६ ॥ कुसुमवस्त्रविचित्रधनान्वितोबहुगमागमनोननुमानवः ॥ जननकालतुलाकलनंयदासुकविनाकविनायकतांव्रजेत्
॥ ७ ॥ कलहघातमतिंजननिंद्यतांप्रजननामयतांनियतंनृणाम् ॥ व्यसनतांजननेऽलिसमाश्रितोरविरलंविरलंकुरुतेधनम् ॥८॥ युवतिसूनुधनागमनोत्स
वंसचिवतांनियतंशुभशीलताम् ॥ जनुषिकार्मुकगःकुरुतेकविःकविरतिंविरतिंविरतोनृणाम् ॥ ९ ॥ अभिरतिस्तुजरांगनयानृणांव्ययभयंकृशताम
तिचिंतया ॥ भृगुसुतेमृगराजगतेसदाकविजनेविजनेपिमनोभवेत् ॥ १० ॥ उशनसःकलशेजनुषिस्थितेवसनभूषणभोगविहीनता ॥ विमलकर्मम
हालसतानृणामुपगतापगताविरमाभवेत् ॥ ११ ॥ भृगुसुतेसतिमीनसमन्वितेनरपतेर्विभुताविततभवेत् ॥ रिपुसमाक्रमणंद्रविणागमोवितरणेतरणेप्रणयो
नृणाम् ॥ १२ ॥ इतिशुक्रः ॥ ॥ अथशनिः ॥ धनविहीनतयातनुतातनौजनविरोधतयेप्सितनाशनम् ॥ क्रियगतेऽर्कसुतेस्वजनैर्नृणांविषमताश
मताशमनंभवेत् ॥ १ ॥ युवतिसौख्यविनाशनतांभृशंपिशुनसंगरुचिंमतिविच्युतिम् ॥ तनुभृतांजननेवृषभस्थितोरविसुतोविसुतोत्सवमादिशेत् ॥ २ ॥
प्रचलनंविमलत्वविहीनतांभवनवाद्यविलासकुतूहलम् ॥ व्रजातिनामिथुनोपगतेसुतेदिनविभोर्नृविभोर्लभतेसुखम् ॥ ३ ॥ शशिनिकेतनगामिनिभानुजेत
नुभृतांकृशताभृशमंत्रया ॥ वरविलासकराकमलाभवेदविकलंविकलंरिपुमंडलम् ॥ ४ ॥ लिपिकलाकुशलश्चकलिप्रियोविमलशीलविहीनतरो
नरः ॥ रविसुतेरविवेश्मनिसंस्थितेहतनयस्तनयप्रमदार्त्तिभाक् ॥ ५ ॥ विहितकर्मणिशर्मकदापिनोविनयतोपहृतिश्चलसौहृदम् ॥ रविसुतेसतिक

न्यकयान्वितेविबलताबलतासहितोभवेत् ॥६॥ निजकुलेऽवनिपालबलान्वितःस्मरबलाकुलितोबहुदानदः ॥ जलजिनीशसुतेहितुलान्वितेनृपकृतोपकृतो
हिनरोभवेत् ॥ ७ ॥ विषहुताशनशस्त्रभयान्वितोधनविनाशनवैरिगदार्दितः ॥ विकलताकलिताचसमन्वितेरविसुतेविसुतेष्टसुखोनरः ॥ ८ ॥
रविसुतेनगुतेसतिकार्मुकेसुतगणैःपरिपूर्णमनोरथः ॥ प्रथितकीर्त्तिसुवृत्तपरोनरोविभवतोभवतोषयुतोभवेत् ॥ ९ ॥ नरपतेरविगौरवतांव्रजेद्रविसुतेमृ
गराशिगतेनरः ॥ अगरुणाकुसुमैर्मृगराजताविमलयामलयाचलजैःसुखम् ॥ १० ॥ ननुजितोरिपुभिर्व्यसनानृतोविहितकर्मपराङ्मुखतान्वितः ॥
रविसुतेकलशेनसमन्वितेसुसहितःसहितप्रचयैर्नरः ॥ ११ ॥ विनयताव्यवहारसुशीलतासकललोकगृहीतगुणोनरः ॥ उपकृतौनिपुणस्तिमिसं
श्रितेरविभवेविभवेनसमन्वितः ॥ १२ ॥ बलान्वितेराशिपतौचराशौखेटेऽथवाराशिफलंसमग्रम् ॥ नीचोच्चगेहास्तमयादिभावैर्न्यूनाधिकत्वंपरिक
ल्पनीयम् ॥ इतिराशिफलानि ॥ अथशुभाशुभज्ञानार्थंशनिचक्रंलिख्यते ॥ ॥ नराकारंलिखेच्चक्रंशनिचक्रंतदुच्यते ॥ वेदितव्यंफलंतत्रमानवानांशुभाशु
भम् ॥ १ ॥ जन्मर्क्षतोयत्रचकुत्रसंस्थंमित्रस्यपुत्रंप्रथमंविदित्वा ॥ चक्रेनराख्येखलुजन्मधिष्ण्याद्विन्यस्यभानिप्रवदेत्फलानि ॥ २ ॥ नक्षत्रमेकंच
शिरोविभागेमुखेलिखेत्त्रीणियुगंचगुह्ये ॥ नेत्रेचनक्षत्रयुगंत्हृदिस्थंभपंचकंवामकरेचतुष्कम् ॥ ३ ॥ वामेचपादेत्रितयंहिभानांभानांत्रयंदक्षिणपाद
संस्थं ॥ चत्वारिऋक्षाणिचदक्षिणाख्येपाणौप्रणीतंमुनिनारदेन ॥ ४ ॥ रोगोलाभोहानिराप्तिश्चसौख्यंबंधःपीडासत्प्रयाणंचलाभः ॥ मंदेचक्रेमार्ग
गेकल्पनीयंतद्वैलोम्याच्छीघ्रगेस्यात्फलानि ॥ ५ ॥ इतिशनिचक्रम् ॥ ॥ अथसर्वतोभद्रचक्रम् ॥ ॥ अथातःसंप्रवक्ष्यामिचक्रंत्रैलोक्यदीपक
म् ॥ विख्यातंसर्वतोभद्रंसद्यःप्रत्ययकारकं ॥ १ ॥ याम्योत्तराःप्रागपराश्चकोष्ठानवात्रचक्रेसुधियाविधेयाः ॥ स्वरर्क्षवर्णादिकमत्रलेख्यंप्रसिद्धभा
वाच्चमयानिरुक्तम् ॥ २ ॥ भ्रमोभवद्वेक्षरजेचहानिर्व्याधिःस्वरेभीश्चतिनिरुक्ता ॥ राशौचवेधेसतिविघ्नमेवजंतुःकथंजीवतिपंचवेधे ॥ ३ ॥ भरण्य


अथचक्रम्

अ	कृ	रो	मृ	आ	पु	पुः	आ	आ
भ	उ	अ	व	क	ह	ड	ऊ	म
अ	ल	ऌ	२	३	४	ॡ	म	पू
रे	च	१	ओ	नं	औ	५	ट	उ
उ	द	१२	रि	पू	भ	६	प	ह
पू	स	११	अः	ज	अं	७	र	चि
श	ग	ऐ	१०	९	८	ए	त	स्वा
ध	ऋ	ख	ज	भ	य	न	ॠ	वि
ई	श्र	अ	उ	पू	मू	ज्ये	अ	इ


कारौवृषभंचनंदांभद्रांतकारंश्रवणंविशाखाम् ।। तुलांचविंध्येदनलर्क्षसंस्थोग्रहोऽत्रचक्रेगदितंस्वरज्ञैः ।। ४ ।। वकारमौकारमुकारदास्त्रेस्वातींरकारंमिथुनंचकन्याम् ।। तथाभिजित्संज्ञकभंचविध्येद्ब्रह्मर्क्षसंस्थोहिनभश्चरौद्रः ।। ५ ।। कर्कंककारंचहरिंपकारंचित्रांचपौष्णंचतथालकारं ।। अकारकंवैश्वभमत्रविध्येदलंनभोमंडलगोमृगस्थः ।। ६ ।। एवंविधःसर्वतोभद्रचक्रेसर्वर्क्षेभ्यश्चिंतनीयःसुधीभिः ।। दद्याद्वेधःसत्फलंसौम्यजातोऽन्यंतंकष्टंदुष्टवेधःकरोति ।।७।। यस्मिनृक्षेसंस्थितोवेधकर्तापापःखेटःसोऽस्यभंयातियस्मिन् ।। कालेतस्मिन्मंगलंपीडितानांप्रोक्तंसद्भिर्नान्यथास्यात्कदाचित् ।। ८ ।। इतिसर्वतोभद्रचक्रं ।।

।।अथसूर्यकालानलचक्रम् ।।

।। सूर्यकालानलंचक्रंस्वरशास्त्रोदितंहियत् ।। तदहंविशदंवक्ष्येचमत्कृतिकरंपरम् ।। १ ।। त्रिशूलकाग्राःसरलाश्चतिस्रःकिलोर्ध्वलेखाःपरिकल्पनीयाः ।। रेखात्रयंमध्यगतंचतत्रद्वेद्वेचकोणोपरिगेविधेये ।। २ ।। त्रिशूलकोणांतरगाऽन्यरेखातदग्रयोःशृंगयुगंविधेयम् ।। मध्येत्रिशूलस्यचदंडमूलात्सव्येनभान्यर्कभतोऽभिजिच्च ।। ३ ।। स्वनामभंयत्रगतंचतत्रप्रकल्पनीयंसदसत्फलंहि ।। तलस्थऋक्षत्रितयेक्रमेणचिंतावधश्चप्रतिबंधनानि ।। ४ ।। शृंगद्वयेरुक्चभवेच्चभंगशूलेषुमूलंपरिकल्पनीयं ।। शेषेषुधिष्ण्येषुजयश्चलाभोऽभीष्टार्थसिद्धिर्बहुधानराणां ।। ५ ।। श्रीसूर्यकालानलचक्रमेतद्वदेचवादेचरणेप्रयाणे ।। प्रयत्नपूर्वंननुचिंतनीयंपुरातनानांवचनंप्रमाणं ।। ६ ।। इतिसूर्यकालानलचक्रम्



॥ अथचंद्रकालानलचक्रम् ॥ ॥ कर्कोटकेनप्रविधायवृत्तंतस्मिंश्चपूर्वापर
याम्यसौम्ये ॥ वृत्ताद्बहिःसंचलितेविधेयेरेखेत्रिशूलाश्चतदग्रकेषु ॥ १ ॥
कोणाश्चरेखाद्वितयेनसाध्याःपूर्वेत्रिशूलेकिलमध्यसंस्थम् ॥ चांद्रंलिखेद्भंतदनु
क्रमेणसव्येनधिष्ण्यानिबहिस्तदंते ॥ २ ॥ कालानलंचक्रमिदंहिचांद्रंरणप्र
याणादिषुजन्मभंचेत् ॥ त्रिशूलसंस्थंनिधनायनूनमंतर्बहिस्थंत्वशुभप्रदंहि ॥ ३ ॥
इतिचंद्रकालानलचक्रम् ॥ ॥ अथाऽष्टवर्गाः ॥ ॥ नृजन्मराशेःख
चरप्रचारैर्यद्वाचरेसांहितिकैःप्रणीतम् ॥ स्थूलंफलंतत्किलसंप्रवच्मिबालावबो
धप्रदमभ्रगानां ॥ १ ॥ गतिर्भयंश्रीर्व्यसनंचदैन्यंशत्रुक्षयोयानमतीवपीडा ॥



कांतिक्षयोभीष्टवरिष्टसिद्धिर्लाभोव्ययोऽर्कस्यफलंक्रमेण ॥ २ ॥ सदन्नमर्थक्षयमर्थलाभंकुक्षिव्यथांकार्यविघातलाभं ॥ वित्तंरुजंराजभयंसुखंचला
भंचशोकंकुरुतेमृगांकः ॥ ३ ॥ पुत्रधर्मधनस्थस्यचंद्रस्योक्तमसत्फलम् ॥ कलाक्षयेपरिज्ञेयंकलावृद्धौतुसाधुतत् ॥ ४ ॥ भीतिंक्षतिंवित्तमरिप्र
वृद्धिमर्थप्रणाशंधनमर्थनाशम् ॥ शस्त्रोपघातंचरुजंचरोगंलाभंव्ययंभूतनयस्तनोति ॥ ५ ॥ बंधंधनंवैरिभयंधनाप्तिंपीडांस्थितिंपीडनमर्थलाभम् ॥
खेदंसुखंलाभमथार्थनाशंक्रमात्फलंयच्छतिसोमसूनुः ॥ ६ ॥ भीतिंवित्तंपीडनंवैरिवृद्धिंसौख्यंशोकंराजमानंचरोगम् ॥ सौख्यंदैन्यंमानवित्तंचपी
डांदत्तेजीवोजन्मराशेःसकाशात् ॥ ७ ॥ रिपुक्षयंवित्तमतीवसौख्यंवित्तंसुतप्रीतिमरातिवृद्धिम् ॥ शोकंधनाप्तिंवरवस्त्रलाभंपीडांस्वमर्थंचददातिशु

क्रः ॥ ८ ॥ भ्रंशंक्लेशंशंचशत्रुप्रवृद्धिंपुत्रात्सौख्यंसौख्यवृद्धिंचदोषम् ॥ पीडांसौख्यंनिर्धनत्वंधनाप्तिंनानानर्थंभानुसूनुस्तनोति ॥ ९ ॥ हानिंनै
स्वंस्वंचवैरंचशोकंवित्तंवादंपीडनंचापिपापम् ॥ वैरंसौख्यंद्रव्यहानिंप्रकुर्याद्राहुःपुंसांगोचरेकेतुरेवम् ॥ १० ॥ राशौराशौगोचरेखेचराणामुक्तं
पूर्वैर्यत्फलंजन्मराशेः ॥ तन्मर्त्यानामेकभोत्पत्तिकानांभिन्नंभिन्नंदृश्यतेवश्यमेव ॥ ११ ॥ यस्मिन्राशौशीतरश्मिःप्रसूतौसंस्थःप्रोक्तोजन्मराशिःस
एव ॥ एवंलग्नेनान्विताःसप्तखेटास्तेकिंनस्युःप्राणिनांजन्मभानि ॥ १२ ॥ पुंसामतोऽष्टौकिलराशयःस्युःशुभाशुभान्यत्रफलानितेभ्यः ॥ ततश्चरे
खामिलनांतरालात्स्पष्टंफलंचाष्टकवर्गयुक्तम् ॥ १३ ॥ स्वान्मंदात्कुजतोरविर्मृतितपोलाभार्थकेंद्रास्थितःशुक्रादस्तारिपुव्ययेषुचगुरोर्धर्मारिपुत्राप्तिषु॥
चंद्राद्व्याप्तिरिपुत्रिखेषुशशिजात्पंचत्रिनंदव्ययारिप्राप्त्यभ्रगतस्तनोस्त्रिषुसुखोगांत्यारिरिःफेशुभः ॥ १४ ॥ भौमात्ग्लौर्नवधीधनोपचयगःषट्त्र्या
तिधीस्थोर्कजाल्लग्नाच्चोपचयेरवेरुपचयाष्टास्तेषुशस्तोबुधात् ॥ १५ ॥ धीरंध्रेषुचतुष्टयात्रिषुगुरोःकेंद्राष्टलाभव्ययेस्वादेकोपचयास्तगस्त्रिखभवास्तां
बुत्रिकोणेभृगोः ॥ १६ ॥ स्वाद्भौमोऽष्टचतुष्टयायधनगोजीवात्षडायांत्यखेचंद्रादायारिपुत्रिगोभृगुसुतादष्टांत्यलाभागिरः ॥ ज्ञात्पंचायारिपुत्रिगो
र्कतनयात्केंद्राष्टधर्मान्यगःसूर्याच्चोपचयात्मजेषुतनुतस्त्र्यायारिखाद्यैःशुभः ॥ १७ ॥ शुक्रादासुतधर्मलाभमृतिगःसौम्यःकुजात्वयोस्तपःकेंद्रायाष्टध
नेस्वतोप्युपचयांत्यैकात्रिकोणेशुभः ॥ कोणांत्यारिभवेरवेरिपुभवाष्टंस्येगुरोरिंदुतःखायाष्टारिसुखार्थगःखखभवाष्टैकांबुषट्सूदयात् ॥ १८ ॥ स्वात्
स्वायाष्टत्रिकेंद्रस्वनवदशभवारातिधीस्थश्चशुक्राल्लग्नात्केंद्रायधीषट्स्वनवसुचकुजात्स्वाष्टकेंद्रायईड्यः ॥ इंदोर्द्यूनार्थकोणाप्तिषुसहजनवाष्टायकेंद्रार्थगोऽ
र्कात्ज्ञात्कोणेद्व्ययखाद्यांबुधिरिपुषुशनेस्त्र्यंत्यधीषट्सुशस्तः ॥ १९ ॥ खास्तांत्याहितवर्जितेषुतनुतःशुक्रोविनास्तारिखंचंद्रात्स्वान्मदनव्ययारिर
हितेष्वर्काद्व्ययाष्टाप्तिषु ॥ मंदाद्व्येकरिपुव्ययास्तरहितेष्वीड्यान्नवायाष्टधीखेज्ञात्कोणभवत्रिषट्सुभवधीत्र्यंत्यारिधर्मेकुजात् ॥ २० ॥ स्वान्मंदास्त्रिष

अथरवेरष्टवर्गांकाः ४८							
र	चं	मं	ब	गु	शु	श	ल
१	३	१	३	५	६	१	३
२	६	२	५	६	७	२	४
४	१०	४	६	९	१२	४	६
७	११	७	९	११	०	७	१०
८	०	८	१०	०	०	८	११
९	०	९	११	०	०	९	१२
१०	०	१०	१२	०	०	१०	०
११	०	११	०	०	०	११	०
०	०	०	०	०	०	०	०

अथचंद्रस्याष्टवर्गांकाः ४९							
चं	मं	बु	गु	शु	श	ल	र
१	२	१	१	३	३	३	३
३	३	३	४	४	५	६	६
६	५	४	७	५	६	१०	७
७	६	५	८	७	११	११	८
१०	९	७	१०	९	०	०	१०
११	१०	८	११	१०	०	०	११
०	११	१०	१२	११	०	०	०
०	०	११	०	०	०	०	०
०	०	०	०	०	०	०	०

अथभौमस्याष्टवर्गांकाः ३९							
मं	बु	गु	शु	श	ल	र	चं
१	३	६	६	१	१	३	३
२	५	१०	८	४	३	५	६
४	६	११	११	७	६	६	११
७	१२	१२	१२	८	१०	१०	०
८	०	०	०	९	११	११	०
१०	०	०	०	१०	०	०	०
११	०	०	०	११	०	०	०
०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०

अथबुधस्याष्टवर्गांकाः ५४

बु	गु	शु	श	ल	र	चं	म
१	६	१	१	१	५	४	१
३	८	२	२	२	६	५	२
५	११	३	४	४	९	६	४
६	१२	४	७	६	११	८	७
९	०	५	८	९	१२	१०	८
१०	०	८	९	११	०	११	९
११	०	९	१०	१२	०	०	१०
१२	०	११	११	०	०	०	११
०	०	०	०	०	०	०	०

अथगुरोरष्टवर्गांकाः ५६

गु	शु	श	ल	र	चं	मं	बु
१	२	३	१	१	२	१	१
२	५	५	२	२	५	२	२
३	६	६	४	३	७	४	४
४	९	१२	५	४	९	७	५
७	१०	०	६	७	११	८	६
८	११	०	७	८	०	१०	९
१०	०	०	९	९	०	११	१०
११	०	०	१०	१०	०	०	११
०	०	०	११	११	०	०	०

अथशुक्रस्याष्टवर्गांकाः ३९

शु	श	ल	र	चं	मं	बु	गु
१	३	१	८	१	३	३	५
२	४	२	११	२	५	५	८
३	५	३	१२	३	६	६	९
४	८	४	०	४	९	९	१०
५	९	५	०	५	११	११	११
८	१०	८	०	८	१२	०	०
९	११	९	०	९	०	०	०
१०	०	११	०	११	०	०	०
११	०	०	०	१२	०	०	०

अथशनेरष्टवर्गांकाः

श	ल	र	चं	मं	बु	गु	शु
३	३	१	३	३	६	५	६
५	४	३	६	५	८	६	११
६	६	४	११	६	९	११	१२
११	९	७	०	१०	१०	१२	०
०	१०	८	०	११	११	०	०
०	११	१०	०	१२	१२	०	०
०	०	११	०	०	०	०	०
०	०	०	०	०	०	०	०

॥ इत्यष्टवर्गांकाःसमाप्ताः ॥

डायधीषुरवितोष्टायाद्दिकेंद्रेशुभोभौमात्खायेषडंत्यधीत्रिषुतनोःखायांबुषट्त्र्येखगः ॥ ज्ञादायारिनवांत्यखाष्टसुभृगोरंत्यायषट्संस्थितश्चंद्रादायारिगुत्रिगोसुरगुरोरंत्यायधीशत्रुगः ॥ २१ ॥ स्थानानियानिप्रतिपादितानिशुभानिचान्यान्यशुभानिनूनम् ॥ तयोर्वियोगादधिकंफलंयत्स्वराशितोयच्छतितद्ग्रहेंद्रः ॥ २२ ॥ भुजंगवेदानवसागराश्चनवाग्नयःसागरसायकाश्च॥रसेषवोयुग्मशरानवत्रितुल्याःक्रमेणाष्टकवर्गलेखाः ॥२३॥ विलग्ननाथाश्रितराशितोऽत्रभवंतिरेखाखलुयत्रयत्र ॥ विलग्नतस्तत्रचतत्रराशौसंस्थापनीयाःसुधियाक्रमेण ॥ २४ ॥ क्लेशोऽर्थहानिर्व्यसनंसमत्वंशश्वत्सुखंनित्यधनागमश्च ॥ संपत्प्रवृद्धिर्विपुलामलश्रीःप्रत्येकरेखाफलमामनंति ॥ २५ ॥ इत्येकखेटस्यहिसंप्रदिष्टारेखायुतिश्चाऽखिलखेटरेखाः ॥ अष्टद्विसंख्यास्तुसमास्ततोपियथाधिकोनाःसदसत्फलाःस्ताः ॥ २६ ॥ कःकदाकःफलदातेत्याशंक्याह ॥ इलातनूजश्चपतिर्नलिन्याःप्रवेशकालेफलदःकिलस्यात् ॥ राश्यर्द्धभोगेभृगुजामरेज्यौप्रांतेशनींदूचसदैंदुसूनुः ॥ २७ ॥ शिरःप्रदेशेवदनेदिनेशोवक्षःस्थलेचापिगलेकलावान् ॥ पृष्ठोदरेभूतनयःप्रभुत्वंकरोतिसौम्यश्चरणेचपाणौ ॥ २८ ॥ कटिप्रदेशेजघनेचजीवःकविस्तुगुह्यस्थलमुष्कयुग्मे ॥ जानूरुदेशेनलिनीशसूनुश्चारेणवाजन्मनिचिंतनीयम् ॥ २९ ॥ यदायदास्यात्प्रतिकूलवर्त्तीस्वांगेस्वदोषेणकरोतिपीडाम् ॥ इदंतुपूर्वंप्रविचार्यंसर्वंप्रश्नप्रसूत्यादिषुकल्पनीयम् ॥ ३० ॥ इत्यष्टवर्गाध्यायः ॥ ॥ अथद्विग्रहयोगाध्यायः ॥ ॥

भ० पाषाणयंत्रक्रयविक्रयेषुकूटक्रियायांचविचक्षणःस्यात् ॥ कामीप्रकामीपुरुषःसगर्वःसर्वौषधीशेनरवौसमेते ॥ १ ॥ भवेन्महौजाबलवान्विमूढोगा
३५ ढोद्धतासत्यवचामनुष्यः ॥ सुसाहसःशूरतरोऽतिहिंस्रोदिवामणौक्षोणिसुताभ्युपेते । २ ॥ प्रियवचाःसचिवोबहुसेवयाऽर्जितधनश्चकलाकुशलोभवेत्
श्रुतपटुर्हिनरोनलिनीपतौकुमुदिनीपतिसूनुसमन्विते ॥ ३ ॥ आचारहीन·कुटिलःप्रतापीपण्यानुजीवीकलहप्रियश्च ॥ स्यान्मातृशत्रुर्मनुजोरुजार्तः
शीतद्युतौभूसुतसंयुतेवै ॥ ४ ॥ पुरोहितत्वेनिपुणोनृपाणांमंत्रीचमित्राप्तधनःसमृद्धः ॥ परोपकारीचतुरोदिनेशेवाचामधीशेनयुतेनरःस्यात् ॥ ५ ॥
संगीतवाद्यायुधचारुबुद्धिर्भवेन्नरोनेत्रबलेनहीनः ॥ कांतानिमित्ताप्तसुहृत्समाजःसितान्वितेजन्मनिपद्मिनीशे ॥ ६ ॥ धातुक्रियापण्यमतिर्गुणज्ञोधर्म
प्रियःपुत्रकलत्रसौख्यः ॥ सदासमृद्धोऽतितरांनरःस्यात्प्रद्योतनेभानुसुतेनयुक्ते ॥ ७ ॥ सद्वाग्विलासोधनवान्सुरूपःकृपार्द्रचेताःपुरुषोविनीतः ॥
कांतापरप्रीतिरतोविवक्ताचंद्रेसचांद्रेबहुधर्मकृत्स्यात् ॥ ८ ॥ सदाविनीतोदृढगूढमंत्रःस्वधर्मकर्माभिरतोनरःस्यात् ॥ परोपकारादरतैकचित्तःशी
तद्युतौवाक्पतिनासमेते ॥ ९ ॥ वस्त्रादिकानांक्रयविक्रयेषुदक्षोनरःस्याद्व्यसनीविधिज्ञः ॥ सुगंधपुष्पोत्तमवस्त्रचित्तोद्विजाधिराजेभृगुजेनयुक्ते
॥ १० ॥ नानांगनानांपरिसेवनेच्छोवैश्यानुवृत्तिर्गतसाधुशीलः ॥ परात्मजःस्यात्पुरुषार्थहीनइंदौसमंदेप्रवदंतिसंतः ॥ ११ ॥ बाहुयुद्धकुशलो
विपुलस्त्रीलालसोविविधभेषजपण्यः ॥ हेमलोहविविधबुध्धिविभावःसंभवेयदिकुजेंदुजयोगः ॥ १२ ॥ मंत्रार्थशास्त्रार्थकलाकलापविवेकशीलो
मनुजःकिलस्यात् ॥ चमूपतिर्वानृपतिःपुरेशोग्रामेश्वरोवासकुजेसुरेड्ये ॥ १३ ॥ नानांगनाभोगविधानचित्तोद्यूतानृतप्रीतिरतिप्रपंचः नरःसगर्वः
कृतसर्ववैरोभृगोःसुतेभूसुतसंयुतेस्यात् ॥ १४ ॥ शस्त्रास्त्रवित्संगरकर्मकामस्तेयानृतप्रीतिकरःप्रकामम् ॥ सौख्येनहीनोऽतितरांनरःस्याद्धरासुते
मंदयुतेऽतिनिंद्यः ॥ १५ ॥ संगीतविन्नीतिपतिर्विनीतःसौख्यान्वितोऽत्यंतमनोभिरामः ॥ धीरोनरःस्यात्सुतरामुदारःसुगंधभाक्वाक्पतिसौम्ययो

गे ॥१६॥ कुलाधिशालीशुभवाग्विलासः सदासहर्षःपुरुषः सुवेषः ॥ भर्त्ताबहूनांगुणवान्विवेकीसभार्गवेजन्मनिसोमसूनौ ॥ १७ ॥ चलस्वभावश्चक
लिप्रियोपिकलाकलापेकुशलः सुशीलः ॥ पुमान्बहूनांप्रतिपालकश्चेत्भवेत्प्रसूतौमिलनेज्ञशन्योः ॥१८॥ विद्ययाभवतिपंडितः सदापंडितैरपिकरोतिवि
वादम् ॥ पुत्रमित्रधनसौख्यसंयुतोमानवः सुरगुरौभृगुयुक्ते ॥१९॥ शूरोऽर्थवान्ग्रामपुराधिनाथोभवेद्यशस्वीकुशलः कलासु ॥ स्त्रीसंश्रयप्राप्तमनोरथ
श्चनरः सुरेज्येरविजेनयुक्ते ॥२०॥ शिल्पलेख्यविधिजातकौतुकोदारुणोरणकरोनरोभवेत् ॥अश्मकर्मकुशलश्चजन्मनिभार्गवेरविसुतेनसंयुते ॥२१॥
इतिद्विग्रहयोगाध्यायः ॥ ॥ अथत्रिग्रहयोगाध्यायः ॥ ॥ शूराश्चयंत्राद्यविधिप्रवीणास्त्रपाकृपाभ्यांसुतरांविहीनाः॥ नक्षत्रनाथक्षितिपुत्रमित्रैरे
कत्रसंस्थैर्मनुजाभवंति॥१॥ भवेन्महौजानृपकार्यकर्त्तावार्त्ताविधौशास्त्रकलासुदक्षः॥दिवामणिज्ञामृतरश्मिसंज्ञैःप्राणीभवेदेकगृहप्रयातैः॥२॥ सेवाविधि
ज्ञश्चविदेशगामीप्राज्ञः प्रवीणश्चपलोऽतिधूर्त्तः ॥ नरोभवेच्चंद्रसुरेंद्रवंद्यप्रद्योतनानांमिलनेप्रसूतौ ॥ ३ ॥ परस्वहर्ताव्यसनानुरक्तोविमुक्तसत्कर्मरुचिर्नरः
स्यात् ॥ मृगांकपंकेरुहबंधुशुक्राश्चैकत्रभावेयदिसंयुताःस्युः ॥ ४ ॥ परेंगितज्ञोविधनश्चमंदोधातुक्रियायांनिरतोनितांतम् ॥ व्यर्थप्रयासप्रकरो
नरः स्यात्क्षेत्रेयदैकत्ररवींदुमंदाः ॥ ५ ॥ ख्यातोभवेन्मंत्रविधिप्रवीणः सुसाहसोनिष्ठुराचित्तवृत्तिः ॥ लज्जार्थजायात्मजमित्रमुक्तोयुक्तैर्बुधार्क
क्षितिजैर्नरः स्यात् ॥ ६ ॥ वक्तार्थयुक्तःक्षितिपालमंत्रीसेनापतिर्नीतिविधानदक्षः ॥ महन्मनाः सत्यवचोविलासः सूर्यारजीवैःसहितैर्नरः स्यात्
॥७॥ भाग्यान्वितोऽत्यंतमतिर्विनीतःकुलीनवान्शीलविराजमानः ॥ स्यादल्पजल्पश्चतुरोनरश्चेत्भौमास्फुजित्सूर्ययुतिःप्रसूतौ ॥ ८ ॥ धनेनहीनः
कलहान्वितश्चत्यागीवियोगीपितृबंधुवर्गैः ॥ विवेकहीनोमनुजः प्रसूतौयोगोयदार्कारशनैश्चराणाम् ॥ ९ ॥ विचक्षणः शास्त्रकलाकलापेसुसंग्रहा
र्थःप्रबलः सुशीलः ॥ दिवाकरज्ञामरपूजितानांयोगेभवेन्नानयनामयार्तः ॥ १० ॥ साधुद्वेषीनिंदितोऽत्यंततप्तःकांताहेतोर्मानवः संयुतश्चेत् ॥

दैत्यामात्यादित्यसौम्याख्यखेटावाचालःस्यादन्यदेशाटनश्च ॥ ११ ॥ तिरस्कृतःस्वीयजनैश्चहीनोऽप्यन्यैर्महतद्वेषकरोनरःस्यात् ॥ षंढाकृतिर्हीन
तरानुयातश्चादित्यमंदेंदुसुतैःसमेतैः ॥ १२ ॥ अप्रगल्भवचनोधनहीनोऽप्याश्रितोऽवनिपतेर्मनुजःस्यात् ॥ शूरताप्रियतरःपरकार्येसादरोऽर्कगु
रुभार्गवयोगे ॥ १३ ॥ नृपप्रियोमित्रकलत्रपुत्रैर्नित्यंयुतःकांतवपुर्नरःस्यात् ॥ शनैश्चराचार्यदिवामणीनांयोगेसुनीत्याव्ययकृत्प्रगल्भः ॥ १४ ॥
रिपुभयपरियुक्तःसत्कथाकाव्यमुक्तःकुचरितरुचिरेवात्यंतकंडूयनार्त्तः ॥ निजजनधनहीनोमानवःसर्वदास्यात्कविरविरविजानांसंयुतिश्चेत्प्रसूतौ ॥
१५ ॥ भवंतिदीनाधनधान्यहीनानानाविधानात्मजनापमानाः ॥ स्युर्मानवाहीनजनानुयाताश्चेत्संयुताःक्षोणिसुतेंदुसौम्याः ॥ १६ ॥ व्रणांकितः
कोपयुतश्चहर्त्तांकांतारतःकांतवपुर्नरःस्यात् ॥ प्रसूतिकालेमिलिताभवंतिचेदारनीहारकरामरेज्याः ॥ १७ ॥ दुःशीलकांतापतिरस्थिरःस्यादुःशी
लकांतातनुजोऽल्पशीलः ॥ नरोभवेज्जन्मनिचैकभावाभौमास्फुजिच्चंद्रमसोयदिस्युः ॥ १८ ॥ शैशवेहिजननीमृतिप्रदःसर्वदापिकलहान्वितोभवेत् ॥
संभवेरविभवेंदुभूसुताःसंयुतायदिनरोऽतिगर्हितः ॥ १९ ॥ विख्यातकीर्तिर्मतिमान्महौजाविचित्रमित्रोबहुभाग्ययुक्तः ॥ सद्वृत्तविद्योऽतितरांनरः
स्यादेकत्रसंस्थैर्गुरुसोमसौम्यैः ॥ २० ॥ विद्याप्रवीणोऽपिचनीचवृत्तःस्पर्धाभिवृत्त्यांचरुचिर्विशेषात् ॥ स्यादर्थलुब्धोहिनरःप्रसूतौमृगांकसौ
म्यास्फुजितांयुतिश्चेत् ॥ २१ ॥ कलाकलापामलबुद्धिशालीख्यातःक्षितीशाभिमतोनितांतम् ॥ नरःपुरग्रामपतिर्विनीतोबुधेंदुमंदाःसहितायदिस्युः
॥ २२ ॥ भाग्यभाग्भवतिमानवः॥सदाचारुकीर्तिमतिवृत्तसंयुतःभार्गवेंदुसुरराजपूजितःसंयुतायदिभवंतिसंभवे ॥ २३ ॥ विचक्षणाःक्षोणिपतिप्रि
यश्चसन्मंत्रशास्त्राधिकृतोनितांतम् ॥ भवेत्सुवेषोमनुजोमहौजाःसंयुक्तमंदेंदुसुरेंद्रवंद्यैः ॥ २४ ॥ पुरोधसोवेदविदांवरेण्याःस्युःप्राणिनःपुण्यपराय
णाश्च ॥ सत्पुस्तकालोकनलेखनेच्छाःकवींदुमंदामिलितायदिस्युः ॥ २५ ॥ क्ष्मापालकःस्वीयकुलेनरःस्यात्कवित्वसंगीतकलाप्रवीणः ॥ परार्थ

संसाधकतेकाचित्तोवाचस्पतिज्ञावनिसूनुयोगे ॥ २६ ॥ वित्तान्वितःक्षीणकलेवरश्चवाचालताचंचलतासमेतः ॥ धृष्टःसदोत्साहपरोनरःस्यादेकत्र
यातैःकविभौमसौम्यैः ॥ २७ ॥ कुलोचनःक्षीणतनुर्वनस्थःप्रेष्यःप्रवासीबहुहास्ययुक्तः ॥ स्यान्नोसहिष्णुश्चनरोपराधीमंदारसौम्यैःसहितैःप्रसूतौ
॥ २८ ॥ सत्पुत्रदारादिसुखैरुपेतःक्ष्मापालमान्यःसुजनानुयातः ॥ वाचस्पतिक्षोणिसुतास्फुजिद्भिःक्षेत्रेयदेकत्रगतैर्नरःस्यात् ॥ २९ ॥ नृपातमानं
कृपयाविहीनंकृशंकुवृत्तंगतामित्रसख्यम् ॥ जन्यांचशन्यांगिरसावनीजासंयोगभाजोमनुजंप्रकुर्युः ॥ ३० ॥ वासोविदेशेजननीत्वनार्याभार्यातथैवो
पहतिःसुखानाम् ॥ दैत्येंद्रपूज्यावनिजार्कजानांयोगेभवेतजन्मनरस्ययस्य ॥ ३१ ॥ नृपानुकंपोबहुगीतकीर्तिःप्रसन्नमूर्तिर्विजितारिवर्गः ॥ सौम्याम

अथैषांयोगानांन्यासः																		
	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८
	रचं मं	रचं बु	रचं गु	रचं शु	रचं श	रबु मं	रमं बु	रमं शु	रमं श	रबु गु	रबु शु	रबु श	रशु गु	रशु श	रशु श	चंमं बु	चंमं गु	चंमं शु
	१९	२०	२१	२२	२३	२४	२५	२६	२७	२८	२९	३०	३१	३२	३३	३४	३५	३६
	चंमं श	चंबु गु	चंशु बु	चंबु श	चंगु शु	चंगु श	चंशु श	मंबु गु	मंबु शु	मंबु श	मंगु शु	मंगु श	मंशु श	बुगु शु	बुगु श	बुशु श	गुशु श	०० ००

रेज्यास्फुजितांप्रसूतौचेत्संयुतिः सत्वपरोनरः स्यात् ।। ३२ ।। स्थानार्थसद्वैभवसंयुतः स्यादनल्पजल्पोधृतिमान्सुवृत्तः ।। शनैश्वराचार्यशशांकपुत्रक्षे
त्रेयदैकत्रगताभवंति ।। ३३ ।। साधुशीलरहितोऽनृतवक्ताऽनल्पजल्पनरुचिः खलुधूर्त्तः ।। दूरयाननिरतश्चकलाज्ञोभार्गवज्ञशनिसंयुतिजन्मा ।।३४।।
नीचान्वयेयद्यपिजातजन्मानरः सुकीर्तिः पृथिवीपतिः स्यात् ।। सद्वृत्तशालीपरिसूतिकालेमंदेज्यशुक्रामिलितायदिस्युः ।। ३५ ।। पापान्वितेशीतरुचौ
जनन्यानूनंभवेन्नैधनमामनंति ।। तादृक्दिनेशः पितृनाशकर्त्तामिश्रेविमिश्रंफलमत्रकल्प्यम् ।। ३६ ।। शुभान्वितेजन्मनिशीतरश्मयंशोर्थभूकीर्तिविवृद्धि
लब्धिम् ।। करोतिजातंस्वकुलप्रदीपंश्रेष्ठप्रतिष्ठंनृपगौरवेण ।। ३७ ।। एकालयेचेत्खलखेचराणांत्रयंकरोत्येवनरंकुरूपं ।। दारिद्रदुःखैःपरितप्तदेहं
कदापिगेहंनसमाश्रयेत्सः ॥ ३८ ॥ इतिश्रीजातकाभरणेत्रिग्रहयोगाध्यायः ।। अथराजयोगालिख्यंते ।। सद्विलासकलगर्जनशी
लःशुंडिकातलयकृत्प्रतिवेलम् ।। अस्तुवःकलितभालतलेंदुर्मंगलायकिलमंगलमूर्त्तिः ।। १ ।। भाग्यादिभावप्रतिपादितंयद्भाग्यंभवेत्तत्खलुराजयोगैः
तान्विस्तरेणप्रवदामिसम्यक्तैःसार्थकंजन्मयतोनराणां ।। २ ।। नभश्चराःपंचनिजोच्चसंस्थायस्यप्रसूतौसतुसार्वभौमः ।। त्रयःस्वतुंगादिगताःसुराज्ञारा
जात्मजोऽन्यस्यसुतोऽत्रमंत्री ।। ३ ।। तुंगोपगायस्यचतुर्नभोगामहापगासंतरणेबलानाम् ।। दंतावलानांकिलसेतुबंधाःकीर्तिप्रबंधावसुधातलेते।। ४ ।।
स्वोच्चेसूर्यशनीज्यभूमितनयैर्यद्वात्रिभिर्लग्नगैस्तेषामन्यतमोहिषोडशमिताःश्रीराजयोगाःस्मृताः ।। तन्मध्येनिजतुंगगेग्रहयुगेयद्वैकखेटेविधौस्वर्क्षेतुंगस
माश्रितेकखचरेलग्नेपरेषोडश ।। ५ ।। वर्गोत्तमेमृतकरेयदिवाशरीरेसंवीक्षितेचचतुरादिभिरिंदुहीनैः ।। द्वाविंशतिप्रमितयःखलुसंभवंतियोगाः
समुद्रवलयक्षितिपालकानाम् ।। ६ ।। उदग्वसिष्ठोभृगुजश्चपश्चात्प्राग्वाक्पतिर्दक्षिणतस्त्वगस्त्यः ।। प्रसूतिकालेसभवेदिलायानाथोहिपाथोनिधिमेख
लायाः ।। ७ ।। स्वोच्चेमूर्तिगतेऽमृतांशुतनयेनक्रेसवक्रेशनौचापेवागधिपेंदुभार्गवयुतेस्याज्जन्मभूमीपतेः ।। स्वस्थानेननुयस्यभूरितुरगोन्मत्तभमालामि

लत्सेनांदोलितभूमिगोलकलनंदिक्दंतिनःकुर्वते ॥ ८ ॥ दिनाधिराजेमृगराजसंस्थेनक्रेसवक्रेकलशेऽर्कसूनौ ॥ पाटीनलग्नेशशिनासमेतमहीप
तेर्जन्ममहौजसःस्यात् ॥ ९ ॥ महिसुतेमेषगतेतनुस्थेबृहस्पतौवातनुगेस्वतुंगे ॥ योगद्वयेऽस्मिन्नृपतीभवेतांजितारिपक्षौनृपनीतिदक्षौ ॥ १० ॥
वाचस्पतिःस्वोच्चगतोविलग्नेमेषेदिनेशःशनिशुक्रसोम्याः ॥ लाभालयस्थाःकिलभूमिपालंतंभूतलस्याभरणंगृणंति ॥ ११ ॥ मंदोयदानक्रविलग्नवर्ती
मृगेंद्रयुग्माजतुलाकुलीराः ॥ स्वस्वामियुक्ताजनयंतिनाथंपाथोनिधिप्रांतमहीतलस्य ॥ १२ ॥ द्वंद्वेदैत्यगुरौनिशाकरसुतेमूर्तौस्वतुंगेस्थितेनक्रेवक्रश
नैश्वरेचशफरेचंद्रामरेज्यौस्थितौ ॥ योगोऽयंप्रभवेत्प्रसूतिसमयेयस्याऽवनीशोमहान्वैरिव्रातमहोद्धतेभदलनेपंचाननःकेवलं ॥ १३ ॥ सिंहोद
येऽर्कस्त्वजगोमृगांकःशनैश्वरःकुंभधरेसुरेज्यः ॥ धनुर्धरेचेन्मकरेमहीजोराजाधिराजोमनुजोभवेत्सः ॥ १४ ॥ मेषेगतोमूर्तिगतःप्रसूतौबृहस्पति
श्चास्तगतःकलावान् ॥ रसातलेव्योमगते सितश्चेन्महीपतिर्गीतदिगंतकीर्तिः ॥ १५ ॥ गुरुःकुलीरोपगतःप्रसूतौस्मरांबुखस्थाभृगुमंदभौमाः ॥
तद्यानकालेजलधेर्जलानिभेरीनिनादोच्छलनंप्रयांति ॥१६ ॥ प्रसूतिकालेस्फुरदंशुजालःषड्वर्गशुद्धोदितभेस्वभेवा ॥ तुंगेत्रिकोणसनभश्चरेंद्रोनरं
प्रकुर्यात्खलुसार्वभौमम् ॥ १७ ॥ षड्वर्गशुद्धौखचरद्वयंचेद्यथोक्तरीत्याजननेनरस्य ॥ तस्याधिपत्यंखलुकिंनरेषुद्विपांतरेचात्रनाकिंधरायाम् ॥
॥१८॥ तुंगत्रिकोणाद्यधिकारहीनैःषड्वर्गशुद्धैस्त्रिभिरेवमंत्री ॥ राजाचतुर्भिःखलुसार्वभौमःपंचादिभिर्वाक्पतिनैककेन ॥ १९ ॥ वृषेशशील
ग्नगतौबुसप्तखस्थारवीज्यार्कसुताभवंति ॥ तद्दंडयात्रासुरजोंधकारात्दिनेपिरात्रिंकुरुतेप्रवेशम् ॥ २० ॥ गुर्विंदुसौम्यास्फुजितश्चयस्यमूर्तित्रिधर्माय
गताभवंति ॥ मृगेऽर्कसूनुस्तनुगोऽत्रनूनंमेकातपत्रांसभुनक्तिधात्रीम् ॥ २१ ॥ तुंगास्थितौशुक्रबुधौविलग्नेनक्रेचवक्रौधनुषीज्यचंद्रौ ॥ प्रसूतिकालेकि
लतौभवेतामाखंडलौभूमितलेऽपिसंस्थौ ॥ २२ ॥ कर्केऽर्कचंद्रौसुरराजमंत्रीशत्रुस्थितश्चापिबुधःस्वतुंगे ॥ कश्चिद्बलीलग्नगतःसराजाराजाधिराजा

१० भिधयासमेतः ॥ २३ ॥ गुरुर्निजोच्चेयदिकेंद्रशालीराज्यालयेदानवराजपूज्यः ॥ प्रसूतिकालेकिलतस्यमुद्राचतुःसमुद्रावधिगामिनीस्यात् ॥ २४
८ देवाचार्यदिनेश्वरौक्रियगतौमेषूरणेक्षोणिजःपुण्येभार्गवसौम्यशीतकिरणायस्यप्रसूतौस्थिताः ॥ नूनंदिग्विजयप्रयाणसमयेसैन्यैरिलाव्याकुलाचिंतामुद्र
हतीतिकागतिरहोसर्वंसहाख्यास्थितेः ॥ २५ ॥ नीचारातिलवोज्झिताबलयुताःसंत्यक्तवैराःपरंस्फारस्कांतिधराभवंतिखचराःसंस्थोवृषेभार्गवः ॥
मातॄणांयदिमंडलेसमुदितोजीवोभवेत्संभवेदेवस्तुल्यपराक्रमःसचनृपःकोपप्रमृष्टाहितः ॥ २६ ॥ मेषोदयेऽर्कश्चगुरुःकुलीरेतुलाधरेमंदविधूभवेताम् ॥
भवेन्नृपालोऽमलकीर्तिशालीभूपालमालापरिपालिताज्ञः ॥ २७ ॥ मीनेनिशाकरःपूर्णःसर्वग्रहनिरीक्षितः ॥ सार्वभौमंनरंकुर्यादिंद्रतुल्यपराक्रमम् ॥
॥ २८ ॥ धनेदिनेशात्भृगुजीवसौम्यानास्तंगतानोरिपुदृष्टियुक्ताः ॥ स्यात्संकटंतत्कटकंरिपूणांयशःपटोदिग्वसनायनूनम् ॥ २९ ॥ सत्वोपेतः
शुभजननयःपूर्ण द्रंप्रपद्येद्यस्योत्पत्तौभवतिनृपतिर्निर्जितारातिपक्षः ॥ यात्राकालेगजहयरथात्यंततुर्यस्वनानांब्रह्मांडनोऽखिलमपिभवेत्पूरणार्थेसमर्थम
॥३०॥ स्वोच्चेषुवाचस्पतिसूर्यशुक्राःशनीक्षितःशीतरुचिर्निजोच्चे ॥ यद्यानकालेरजसोवितानंरुणद्धिसूर्यादववविलोचनानि ॥३१ ॥ नास्तंयाताः
सुतगृहगताःसौम्यशुक्रामरेज्यानक्रेवक्रोरविरहितगोधर्मगोयस्यमंदः ॥यात्राकालेकिलकमलिनीपुष्पसंकोचकर्त्ताश्रीसूर्योऽपिप्रचालितदलोद्भूतधूलीकृ
तास्तः ॥३२ ॥ कन्यालग्नगतेबुधेचविबुधामात्येचजायास्थितेभौमार्कौसहजेऽर्कजोऽरिभवनेंऽबुस्थेभृगोर्नंदने ॥ योगेऽस्मिन्मनुजस्ययस्यजननंतच्छा
सनंसर्वदाराजानःप्रवहंत्यलंसुविमलेमालेवमौलिस्थले ॥ ३३ ॥ मीनोदयेदानवराजपूज्यश्चंद्रामरेज्यौभवतःकुलीरे ॥ मेषेर्कभौमौनृपतिःकिलस्यादा
खंडलेनापितुलांप्रयाति ॥ ३४ ॥ इतिनिगदितयोगैर्नीचवंशोद्भवोऽपिसभवतिपतिरुर्व्याःकिंपुनाराजसूनुः॥ नरपतिकुलजातोवक्ष्यमाणैश्चयोगैर्भव
तिनृपतिरेवंतत्समोऽन्यस्यसूनुः ॥ ३५ ॥ छायासुतोनक्रविलग्नयातश्चास्तेप्रसूतौयदिपुष्पवंतौ ॥ लाभेकुजेवभृगुजोऽष्टमस्थःस्याद्भूपतिर्भूपकुलप्रसूतः

॥ ३६ ॥ सुरासुरेड्योभवतश्चतुर्थेऽर्थसमर्थःपृथिवीपतिःस्यात् ॥ कर्कस्थितोदेवगुरुःसचंद्रःकाश्मीरदेशाधिपतिंकरोति ॥ ३७ ॥ सुरासुरेड्य स्थितदृष्टिरिंदुःस्वोच्चेस्थितोभूमिपतिंकरोति ॥ विलोकयंतःपरिपूर्णचंद्रंशुक्रज्ञजीवाजनयंतिभूपम् ॥ ३८ ॥ पश्येन्मृगांकात्मजमिंद्रमंत्रीविचित्रसंप न्नृपतिंकरोति ॥ एकोपिखेटोयदिपंचमांशेप्रसूतिकालेकुरुतेनृपालम् ॥ ३९ ॥नक्षत्रनाथोप्यधिमित्रभागेशुक्रेणदृष्टोनृपतिंकरोति ॥ स्वांशाधि मित्रांशगतोऽथवास्याज्जीवेनदृष्टःकुरुतेनृपालम् ॥ ४० ॥ दिनाधिनाथोप्यधिमित्रभावेचंद्रेणसम्यक्प्रविलोकितोवा ॥ स्यात्तस्कराणांनिचयेनृपालःस च्छीलशालीसुतरामुदारः ॥ ४१ ॥ स्वोच्चेस्थितःसोमसुतःससोमःकुर्यान्नरंमागधदेशराजम् ॥ कलाधिशालीबलवान्कलावान्करोतिभूपंशुभधाम संस्थः ॥ ४२ ॥ जन्मेश्वरोजन्मविलग्नपोवाकेंद्रेबलीनीचकुलेपिभूपम् ॥ कुर्यादुदारंसुतरांपवित्रंकिमत्रचित्रंक्षितिपालपुत्रम् ॥ ४२ ॥ मेषेदिने शःशशिनासमेतोयस्यप्रसूतौसतुभूपतिःस्यात् ॥ कर्णाटकद्राविडकेरलांध्रदेशाधिपानामनुकूलवर्त्ती ॥ ४४ ॥ स्वतुंगगेहोपगतौसितेड्यौकेंद्रत्रिको णेषुगतौभवेतां ॥ प्रसूतिकालेकुरुतेनृपालंनृपालजातंसचिवेंद्रमान्यम् ॥ ४५ ॥ प्रसूतिकालेमदनेधनेचव्ययेविलग्नेयदिसंतिखेटाः ॥ तेछत्रयोगंजन यंतितस्यप्राक्पुण्यपाकाभ्युदयोहियस्य ॥ ४६ ॥ पापोविलग्नेयदियस्यसूतौदृष्टोभवेच्चित्रशिखंडिजेन ॥ कर्केगुरुर्ब्राह्मणदेवभक्तःप्रासादवापीपुरकृन्नरः स्यात् ॥ ४७ ॥ एकोपिशस्तःशुभदःस्वतुंगकेंद्रेपतंगोबलवान्प्रदृष्टः ॥ सुतस्थितेनाऽमरपूजितेनचेन्मानवोमानवनायकःस्यात् ॥ ४८ ॥ मृगरा शिपरित्यज्यास्थितोलग्नेबृहस्पतिः॥ करोतिपृथिवीनाथंमत्तेभपरिवारितम् ॥ ४९ ॥कलाकलापाधिकताधिशालीचंद्रोभवेज्जन्मनिकेंद्रवर्त्ती ॥ विहायल ग्नंकुरुतेनृपालंलीलाविलासाकलितारिवृंदम् ॥ ५० ॥ केंद्रगःसुरगुरुःसशशांकोयस्यजन्मनिचभार्गवदृष्टः ॥ भूपतिर्भवतिसोऽतुलकीर्तिर्नीचगोनय दिकश्चिद्ग्रहःस्यात् ॥ ५१ ॥ धनस्थिताःसौम्यसितामरेड्याःसदारचंद्रायदिसप्तमस्थाः ॥ यस्यप्रसूतौसतुभूपतिःस्याद्रातिदंतिक्षतिसिंहएव ॥ ५२ ॥

अ० कुंभाष्टमांशे शशिनित्रिकोणेमेषेद्विभागेधरणीसुतेवा ॥ द्वंद्वैकविंशांशगतेथवाज्ञेयस्यप्रसूतौसतुभूपतिःस्यात् ॥ ५३ ॥ कुंभस्यचेत्पंचदशेविभागेकर्के
९ दशांशोपगतोविधुश्चेत् ॥ तृतीयभागेधनुषींद्रवंद्यःसिंहेशशांकेप्यथवापिभूपः ॥ ५४ ॥ वृषेश्विभेवाप्यथकृत्तिकासुवर्गोत्तमेपूर्णतनुःकलावान् ॥ करो
तिजातंखलुसार्वभौमंत्रिपुष्करोत्पन्ननरोऽपिभूपः ॥ ५५ ॥ तिथिःसुभद्राविषमांघ्रिभंचेद्वारेगुरुक्ष्मातनयार्कजानाम् ॥ त्रिपुष्करोयोगइतिप्रदिष्टोवृद्धौ
चहानौत्रिगुणाप्तिकर्त्ता ॥ ५६ ॥ मैत्रेचदास्रेऽप्यथवात्मतुंगेवर्गोत्तमेभूमिसुतःकरोति ॥ महीपतिंपार्थिववंशजातंचान्यंप्रधानंधनिनंसमृद्धम् ॥ ५७॥
चेद्भार्गवोजन्मनियस्यपुण्येमेषूरणेपूर्णतनुःशशांकः ॥ अन्येग्रहालाभगताभवेयुःपृथ्वीपतिःपार्थिववंशजातः ॥ ५८ ॥ उपचयभवनस्थाःसर्वखेटाः
शशांकाद्रविगुरुशशिनश्चेत्भूमिसूनोर्भवंति ॥ त्रितनयनवमस्थाःकुर्वतेतेनरेंद्रंगजतुरगरथानांसंपदाराजमानम् ॥ ५९ ॥ सुखेसितज्ञौसहजेऽम्बुजे
शास्तिष्ठंतिखेटाःसुतधाम्निचान्ये ॥ निजारिराशौनहिकश्चिदत्रधात्रीपतिश्चैककृतातपत्रः ॥ ६० ॥ सिंहेकमलिनभिर्त्ताकुलीरस्थोनिशाकरः॥
दृष्टौद्वावपिजीवेनपार्थिवकुरुतस्तदा ॥ ६१ ॥ बुधःकर्कटमारूढोवाक्पतिश्चधनुर्धरे ॥ रविभूसुतदृष्टौतौकुरुतःपृथिवीपतिम् ॥ ६२ ॥ शफरीयुगुलेचं
द्रःकर्कटेचबृहस्पतिः ॥ शुक्रःकुंभभवद्राजागजवाजिसमृद्धिभाक् ॥ ६३ ॥ सितदृष्टःशनिःकुंभेपद्मिनीनायकोदये ॥ चंद्रेजलचरेराशौयदिराजा
तदाभवेत् ॥ ६४ ॥ चेत्खेचरोनीचगृहंप्रयातस्तदीश्वरश्चापितदुच्चनाथः ॥ केंद्रस्थितौतौभवतःप्रसूतौप्रकीर्तितौभूपातिसंभवाय ॥ ६६ ॥ कृत्तिकारे
वतस्वातीपुष्यस्थायीभृगोःसुतः ॥ करोतिभूभुजांनाथमश्विन्यामपिसंस्थितः ॥ ६७ ॥ राज्योपलब्धिर्दशमस्थितस्याविलग्नगस्याप्यथवादशायाम् ॥
तयोरभावेबलशालिनोवासद्राजयोगोयदिजन्मकाले॥ ६८ ॥ इतिराजयोगाध्यायः ॥ ॥ अथराजयोगसंगतिकसामुद्रिकाध्यायः ॥ ॥
प्रसूतिकालप्रबलायदिस्युर्नृपालयोगाःपुरुषस्ययस्य ॥ सद्राजचिन्हानिपदेतदीयेभवंतिवापाणितलेऽमलानि ॥ १ ॥ अनामिकामूलगताप्रशस्तास

कीर्तितापुण्यविधानरेखा ॥ मध्यांगुलेर्यामणिबंधमाप्ताराज्याप्तयेसाचकिलोर्ध्वरेखा ॥ २ ॥ विराजमानंयवलांछनंचेदंगुष्ठमध्येपुरुषस्ययस्य ॥ भ
वेद्यशस्वीनिजवंशभूषाभूषाविशेषैःसहितोविनीतः ॥ ३ ॥ चेद्वारणोवातपवारणंवावेसारिणःपुष्करिणीसृणिर्वा ॥ वीणाचपाणौचरणेनराणांतेस्युर्नरा
णामधिपावरेण्याः ॥ ४ ॥ आदर्शमालाकरवालशैलहलाश्चतत्पाणितलेमिलंति ॥ स्यान्मांडलीकोऽवनिपालकोवाकुलेनृपालःकुलतारनम्यात्
॥ ५ ॥ चेदस्यपाणौचरणेचचक्रंधनुर्ध्वजाब्जव्यजनासनानि ॥ रथाश्वदोलाकमलाविलासात्तस्यालयेस्युर्गजवाजिशालाः ॥ ६ ॥ स्तंभस्तुकुं
भस्त्वतरुस्त्वरंगोगदामृदंगोंऽघ्रिकरप्रदेशे ॥ दंडोथवाऽखंडितराज्यलक्ष्म्यास्यान्मंडितःपंडितशौंडकोवा ॥ ७ ॥ सुवृत्तमौलिस्त्वविशालभालश्चा
कर्णनीलोत्पलपत्रनेत्रः ॥ आजानुबाहुंपुरुषंतमाहुर्भूमंडलाखंडलमार्यवर्याः ॥ ८ ॥ नरस्यनासासरलाचयस्यवक्षःस्थलंचापिशिलातलाभम् ॥ ना
भिर्गभीरागतिमृदूभवेतामारक्तवर्णौचरणौसभूपः ॥ ९ ॥ प्रसन्नमूर्तिःसमुदारचेतावंशाभिमानःशुभवाग्विलासः ॥ अभीतिभीरुर्गुरुसाधुनम्रःसाम्राज्य
लक्ष्मींलभतेमनुष्यः ॥ १० ॥ करतलेयदियस्यतिलोभवेदविरलःकिलतस्यधनागमः ॥ पदतलेचतिलेनसमन्वितेनृपतिवाहनचिन्हसमन्वितः ॥ ११ ॥
एतत्फलंराजकुलोद्भवानांस्यान्मानवानांमुनयोवदंति ॥ प्रकल्पयेदन्यकुलोद्भवानांनूनंतदूनंस्वकुलानुमानात् ॥ १२ ॥ चिन्हानियानिप्रतिपादितानि
व्यक्तानिसंपूर्णफलप्रदानि ॥ वामेतरेंघ्रौचकरेनराणांधन्यानिवामेखलुकामिनीनाम् ॥ १३ ॥ इतिश्रीदैवज्ञ०राजयोगसंगतिकसामुद्रिकाध्यायः ॥
॥ अथराजयोगभंगाध्यायः ॥ ॥ शत्रुक्षेत्रगतैःसर्वैर्वर्गोत्तमयुतैरपि ॥ राजयोगाविनश्यंतिबहुभिर्नीचगैर्ग्रहैः ॥ १ ॥ चंद्रवायदिवाल
ग्नंग्रहोनैकोऽपिवीक्ष्यते ॥ तथापिराजयोगानांभंगमाहपराशरः ॥ २ ॥ स्वांशेरवौशीतकरेविनष्टेदृष्टेचपापैःशुभदृष्टिहीने ॥ कृत्वापिराज्यंच्यवते
मनुष्यःपश्चात्सुदुःखंलभतेहताशः ॥ ३ ॥ उल्काव्यतीपातदिनेतथैववनैर्वातिकेकेतुसमुद्भवोवा ॥ चेद्राजयोगेपिचयस्यसूतिर्नरोदरिद्रोतितरांभवेत्सः

॥ ४ ॥ तुलायांनलिनानाथःपरमंनीचमाश्रितः ॥ निर्दिष्टराजयोगानादलनायभवेद्ध्रुवम् ॥ ५ ॥ मृगलग्नेसुराचार्यःपरमंनीचमाश्रितः ॥ राज
योगोद्भवस्यापिकुरुतेऽतिदारिद्रताम् ॥ ६ ॥ वाचस्पतावस्तगतेग्रहेंद्राख्ययोपिनीचेषुघटोविलग्ने ॥ एकोपिनीचेदशमेपिपापोभूपालयोगाविलयंप्रयांति
॥ ७ प्रसूतौदानवामात्यःपरमंनीचमाश्रितः ॥ करोतिपतनंनूनंमानवानांमहापदात् ॥ ८ ॥ यदितनुभवनस्थोराहुरिंदुग्रहष्टःसहजरिपुभवनस्थाभानुर्म
दावनेयाः ॥ शुभविरहितकेंद्रैरस्तगैर्वापिसौम्यैर्भवतिनृपतियोगोव्यर्थएवेतिचिंत्यम् ॥ ९ ॥ केंद्रेषुशून्येषुशुभैर्नभोगैरस्तंगतैर्नीचगृहास्थितैर्वा ॥ चतु
र्ग्रहैर्वाप्यरिमंदिरस्थैर्नृपालयोगाःप्रलयंप्रयांति ॥ १० ॥ सर्वेपिपापायदिकंटकेषुनीचारिगानोशुभदृष्टियुक्ताः ॥ नीचारिरिःफेषुचसौम्यसंज्ञाराज्ञांहि
योगाविलयंप्रयांति ॥ ११ ॥ इतिदैवज्ञ०राजयोगभंगाध्यायः ॥ ॥ अथपंचमहापुरुषलक्षणानिनिरूप्यंते ॥ ॥ येमहापुरुषसंज्ञकानृ
पाःपंचपूर्वमुनिभिःप्रकीर्तिताः ॥ वच्मितान्सुसरलान्महोक्तिभीराजयोगविधिदर्शनेच्छया ॥ १ ॥ स्वगेहतुंगाश्रयकेंद्रसंस्थैरुच्चोपगैर्वावनिसूनु
मुख्यैः ॥ क्रमेणयोगारुचकाख्यभद्रहंसाख्यमालव्यशशाभिधानाः ॥ २ ॥ दीर्घास्यःस्वच्छकांतिर्बहुरुधिरबलःसाहसावाससिद्धिश्चारुभ्रूर्नीलके
शःसमकरचरणोमंत्रविच्चारुकीर्तिः ॥ रक्तश्यामोऽतिशूरोरिपुबलमथनःकंबुकंठोमहौजाःक्रूरोभक्तोऽमराणांद्विजगुरुविनतःक्षामजानूरुजंघाः ॥
३ ॥ खट्वांगपाशवृषकार्मुकचक्रवीणावज्रांकहस्तचरणःसरलांगुलःस्यात् ॥ मंत्राभिचारकुशलस्तुलयेत्सहस्रंमध्यंचतस्यगदितंमुखदैर्घ्यतुल्यम्
॥ ४ ॥ सह्यस्यविंध्यस्यतथोज्जयिन्याःप्रभुःशरत्सप्ततिजीवितोऽसौ ॥ शस्त्राग्निचिन्होरुचकाभिधानेदेवालयेतान्निधनंप्रयाति ॥ ॥इतिरुचकः ॥
अथभद्रः ॥ ॥ शार्दूलप्रतिमाननोद्विपगतिःपीनोरुवक्षःस्थलोलंबापीनसुवृत्तबाहुयुगलस्तत्तुल्यमानोच्छ्रयः ॥ कामीकोमलसूक्ष्मरोमनिचयैःसंरु
द्धगंडस्थलःप्राज्ञःपंकजगर्भपाणिचरणःसत्वाधिकोयोगवित् ॥ ६ ॥ शंखासिकुंजरगदाकुसुमेषुकेतुचक्राब्जलांगलविचान्हितपाणिपादः ॥ यात्राग

जैंद्रमदवारिकृतार्द्रभूमिः सत्कुंकुमप्रतिमगंधतनुः सुघोषः ॥ ७ ॥ सद्रूपगोऽतिमतिमान्खलु शास्त्रवेत्ता मानोपभोगसहितोऽतिनिगूढगुह्यः ॥ सत्कुक्षिधर्म
निरतः सुललाटपट्टो धीरो भवेदसितकुंचितकेशपाशः ॥ ८ ॥ स्वतंत्रः सर्वकार्येषु स्वजनं प्रतिनक्षमी ॥ भुज्यते विभवस्तस्य नित्यमर्थिजनैः परैः ॥ ९ ॥
भालं तुलायां तु भवेत्सुरत्नैः श्रीकान्यकुब्जाधिपतिर्भवेत्सः ॥ भद्रो द्भवः पुत्रकलत्रसौख्यो जीवेन्नृपालः शरदामशीतिम् ॥ १० ॥ ॥ इति भद्रः अथ हंसः
रक्तास्यो न्नतनासिकः सुचरणो हंसे प्रसन्नेंद्रियो गौरः पीनकपोलरक्तकरजो हंसस्वनः श्लेष्मलः ॥ शंखाब्जांकुशमत्स्यदामयुगलैः खट्वांगमालाघटैश्चचत्वा
दकरस्थलो मधुनिभनेत्रे सुवृत्तशिरः ॥ ११ ॥ जलाशयप्रीतिरतीव कामी नयाति तृप्तिं वनितासु नूनम् ॥ उच्चांगुलैर्वै षडशीति तुल्यैरायुर्भवेत्षण्णवतिः समा
नाम् ॥ १२ ॥ बाल्हीकदेशांतरशूरसेनगांधर्वगंगायमुनांतरालान् ॥ भुक्त्वा वनांते निधनं प्रयाति हंसोऽयमुक्तो मुनिभिः पुराणैः ॥ १३ ॥ इति हंसः ॥
अथ मालव्यः ॥ अस्थूलौष्ठोऽथ विषमवपुर्नैवारिक्तांगसंधिर्मध्ये क्षामः शशधररुचिर्हस्तिनासः सुगंडः ॥ सदीप्ताक्षः समसितरदो जानुदेशाप्तपाणिर्मालव्योऽयं
विलसति नृपः सप्ततिर्वत्सराणाम ॥ १४ ॥ वक्त्रं त्रयोदशमितांगुलमस्य दीर्घं तिर्यग्दशांगुलमितं श्रवणांतरालम् ॥ मालव्यसंज्ञनृपतिः स भुनक्ति नूनम् लाटां
श्च मालवकासिंधुसुपारियात्रान् ॥ १५ ॥ इति मालव्यः ॥ ॥ अथ शशकः ॥ ॥ लघुद्विजास्यो द्रुतगः सकोपः शठोऽतिशूरो विजनप्रचारः ॥ वनाद्रि
दुर्गेषु नदीषु सक्तः प्रियातिथिर्नोऽतिलघुः प्रसिद्धः ॥ १६ ॥ नानासेनानिचयनिरतो दंतुरश्चापि किंचिद्धातोर्वादे भवति कुशलश्चंचलः कोलनेत्रः ॥ स्त्रीसं
सक्तः परधनहरो मातृभक्तः सुजंघो मध्ये क्षामः सुललितमती रंध्रवेधी परेषाम् ॥ १७ ॥ पर्यंकशंखशरशस्त्रमृदंगमालावीणोपमाः खलु करे चरणे च रेखाः
वर्षाणि सप्ततिमितानि करोति राज्यं सम्यक्शशाख्यनृपतिः कथितो मुनींद्रैः ॥ १८ ॥ इति शशकः ॥ केंद्रोच्चगा यद्यपि भूसुताद्या मार्तंडशीतांशुयुता भवंति
कुर्वंति नोर्वीपतिमात्मपाके यच्छंति ते केवलसत्फलानि ॥ १९ ॥ इति जातकाभरणे पंचमहापुरुषलक्षणाध्यायः ॥ ॥ अथ कारकयोगाध्यायः ॥

मूलत्रिकोणस्वगृहोच्चसंस्थानभश्चराः केंद्रगतामिथः स्युः ॥ तेकारकाख्याः कथितामुनींद्रैर्विज्ञेयआज्ञाभवनेविशेषः ॥ १ ॥ प्रालेयरश्मिर्यदिमूर्तिवर्ती
स्वमंदिरस्थोग्नदितुंगयातः ॥ सूर्यार्कजारामरराजपूज्याः परस्परंकारकसंज्ञकाः स्युः ॥ २ ॥ शुभग्रहेलग्नगतेंबरां१०बु४स्थितोग्रहः कारकसं
ज्ञकः स्यात् ॥ तुंगत्रिकोणस्वगृहांशयातास्तेपीहमानेतपनेविशेषात् ॥ ३ ॥ नीचान्वयेयद्यपिजातजन्मामंत्रीभवेत्कारकखेचरेंद्रैः ॥ राजान्वयेयस्य
यदिप्रसूतिर्भूमीपतित्वंसकथंनयाति ॥४॥ वेशिस्थितोयस्यशुभोनभोगोलग्नंविलग्नंचलवेस्वकीये ॥ केंद्राणिसर्वाणिशुभान्वितानितस्यालयेश्रीः कुरुतेनिवास
म् ॥५॥ केंद्रस्थितागुरुविलग्नकजन्मनाथामध्येवयस्यातितरांवितरंतिभाग्यम् ॥ शीर्षोदयांघ्युभयभेषुगताभवेयुरारंभमध्यमविरामफलप्रदास्ते ॥६॥
इतिकारकयोगाध्यायः ॥ ॥ अथनाभसयोगः ॥ ॥ सर्वेचरस्थाअपिवास्थिरस्थाद्विदेहसंस्थायदिवाभवंति ॥ क्रमेणरज्जुर्मुसलंनलश्चयोगत्र
यंस्यादिदमाश्रयाख्याम् ॥ १ ॥ केंद्रत्रयेसौम्यखगैस्त्रमालाखलग्रहैर्व्यालसमाव्हयः स्यात् ॥ इदंतुयोगद्वितयंदलाख्यंपराशरेणप्रतिपादितंहि
॥ २ ॥ आसन्नकेंद्रद्वयगैर्गदाख्योलग्नास्तसंस्थैः शकटः समस्तैः ॥ स्वबंधुयातैर्विहगः प्रदिष्टः शृंगाटकंलग्ननवात्मजस्थैः ॥ ३ ॥ धनारिखस्थै
स्त्रिमदायगैर्वाचतुर्थरंध्रव्ययसंस्थितैर्वा ॥ नभस्तलस्थैर्हलनामयोगः किलादितोयंनिखिलागमज्ञैः ॥ ४ ॥ लग्नस्मरस्थानगतैः शुभाख्यैः पापैश्चमेषूरणबंधु
यातैः ॥ वज्राभिधस्तैर्विपरीतसंस्थैर्यवश्चमिश्रैः कमलाभिधानः ॥ ५ ॥ सूर्याच्चतुर्थभवनेसितज्ञौकथंभवेतामितिनवयुक्तौ ॥ यवाख्यवज्रौत्विदमामनंति
तत्रोगगत्तिं गरिदर्शयामि ॥ ६ ॥ विलग्नपार्श्वद्वयवर्तिनोनेज्ञशुक्रज्ञीवान्यतमोविलग्ने ॥ कुजार्किचंद्राः खजलस्मरस्थावज्रंविलोमाच्चयवोनाकिंवा ॥७॥
सर्वैर्नभोगैर्यदिनाभसाख्योव्यालाख्यमालेत्रिभिरेवखेटैः ॥ कथंभवतामितिचिंतयंतिमुनिप्रणीतंकथमन्यथास्यात् ॥ ८ ॥ त्यक्त्वाकेंद्राणिचेत्खेटाः शे
षस्थानेषुसंस्थिताः ॥ वापीयोगोभवेदेवंगदितः पूर्वसूरिभिः ॥ ९ ॥ लग्नाच्चतुर्थात्स्मरतः खमध्याच्चतुर्गृहस्थैर्गगनेचरेंद्रैः ॥ क्रमेणयूपश्चशरश्चशक्ति

दंडःप्रदिष्टःखलुजातकज्ञैः ॥ १० ॥ लग्नाच्चतुर्थात्स्मरतःखमध्यात्सप्तर्क्षगैर्नौरथकूटसंज्ञः॥छत्रंधनुश्चान्यगृहप्रवृत्तैर्नौपूर्वकैर्योगइहार्धचंद्रः॥११॥



तनोर्धनाच्चैकगृहांतरेणस्युःस्थानषट्केगगनेचरेंद्राः॥ चक्राभिधानश्चसमुद्रनामायोगाइतीहाकृतिजाश्चविंशत् ॥ १२ ॥ येयोगाः
कथिताःपुराबहुतरास्तेषामभावेभवेद्वोलैश्चैकगतैर्युगादिगृहगैःशूलस्त्रिगेहोपगैः ॥ केदारश्चचतुर्षुसर्वखचरैःपाशस्तुपंचस्थितैःषट्
स्थैर्दामनिकाचसप्तगृहगैर्वीणेतिसंख्याइमे॥ १३ ॥ नानाप्रकारैःकिलकालविद्भिर्योगामहद्भिःपरिकीर्तितायेः॥ तत्कर्तृपाकोहिफलंत
दीयंबलानुमानेनविचिंतनीयम् ॥१४॥ चंचद्रूपेणान्विताःक्रौर्यभाजोजातोत्साहाःक्रूरकार्येनितांतम्॥ रज्जुयोगोत्पन्नमर्त्याःस्वदेशेअ
न्यस्मिन्वैसच्चरंत्यर्थलब्ध्यै॥ १५ ॥ नानामान्यज्ञानधन्योपमानःपुत्रैर्लक्ष्म्याराजतेराजतेजाः॥ पृथ्वीपालस्याश्रितःस्यात्सहर्षोहर्षोत्कर्षावातिकृन्मौसले
यः ॥१६॥ शश्वत्पूर्णाःस्वर्णरत्नैःसुगेहाराजस्नेहाःपुण्यदेहाश्चमर्त्याः॥ कीर्त्यायुक्ताःसर्वदातिसदैवादैवाद्येषांजन्मकालेनलश्चेत्॥ १७॥ पुत्रैर्मित्रैश्चारुभूषा
विशेषैर्नानायानैरन्विताःस्तेभवंति ॥ येषांपुंसांसूतिकालेहिमालामालादोलाकामिनीकेलिशीलः ॥ १८ ॥ भोक्तान्यस्यान्नस्यरौद्रादरिद्रानिद्रोत्साहोरुट्
समुद्रोप्यभद्रः । दुर्दर्पस्याच्चापकारायसार्पःसर्पःसूतौयस्यमर्त्यस्ययोगः ॥ १९ नानाशास्त्रानेकमंत्रानुरक्तोगीतेवाद्येकोविदश्चापियज्वा ॥ रौद्रोद्वेषी
द्वेषिवर्गैर्वियुक्तोयुक्तोयोषाभूषणाद्यैर्गदायाम् ॥ २० ॥ दीनोहीनोविभवेनार्थमित्रैर्यस्योत्पत्त्यावातकादर्योप्यवद्यम् ॥ यातिप्रीतिंप्राप्यमर्त्यःकुयोषांत्य
क्तायोगेशाकटेयस्यजन्म ॥ २१ ॥ येषांसूतौमानवानांवियोगेभोगेयोगोत्पन्नसौख्यंनतेषाम् ॥ यानेप्रीतिर्नित्यमेवप्रवासेवासोऽर्थानामल्पताजल्पतायैः
२२ ॥ भूयोत्कर्षःसाहसीसंगरेच्छःसौख्यैर्युक्तोऽत्यंतबुद्धिर्नरःस्यात्॥ प्रीतिंगच्छेत्पूर्वपत्न्याःसपत्न्याद्रोहंचैवशृंगपूर्वेमुखाटे ॥२३ ॥ प्रेष्योमुक्तः
साधुभिर्मित्रवर्गैःकृष्याजीवीदुःखितोऽत्यंतभुक्स्यात्॥ उत्पत्तियोलांगलाख्येप्रयातियातिक्लेशांनिर्धनत्वात्प्रकामम ॥ २४ ॥ आद्येभागेजीवितस्यांनि

मेचसौख्योपेतोभाग्यवान्मानवःस्यात् ।। मध्येभागेभाग्यहीनःप्रकामंकामक्रोधैरान्वितोवज्रयोगे ।। २५ ।। मध्येभागेधर्मकामार्थसंपत्सौख्यैर्युक्तःस्याद्वि
नीतोवदान्यः ।। नित्योत्साहःसदव्रतेषुप्रशांतःशांतक्रोधोयःप्रसूतोयवाख्ये ।। २६ ।। नित्यंहर्षोत्कर्षशालीबलीयांश्चचत्कांतिर्गीतकीर्तिर्मनुष्यः ।। यो
गेसूतिश्चेत्सरोजेसराजाराज्ञोवंशेवाभवेद्दीर्घजीवी ।। २७ ।। दीर्घायुःस्यादात्मवंशावतंसःसौख्योपेतोऽत्यंतधीरोमनीषी ।। चंचद्वादयःस्वमनाःपुष्पवा
पीवापीयोगेयःप्रसूतःप्रतापी ।। २८ ।। धीरोदारोयज्ञकर्मानुसारोनानाविद्यासद्विचारोनरोवै ।। यस्योत्पत्तौवर्ततेयूपयोगोयोगेलब्धयाजायतेतस्यनूनम्
।।२९।। हिंस्रोऽत्यंतंशल्यदुःखैःप्रतप्तःप्राप्तानंदःकाननांतेशरज्ञः ।। मर्त्योयोगेयःशरेजातजन्माजन्मारंभात्तस्यनक्वापिसौख्यम् ।।३०।। नीचेरुच्चैः
प्रीतिकृत्सालसश्चसौख्यैरर्थैर्वर्जितोनिर्बलश्च ।। वादेगूढेतस्यबुद्धिर्विशालाशालासौख्यस्याल्पताशक्तियोगे ।। ३१ ।। दीनोहीनोऽमत्तसंजातसख्यःप्रे
ष्यद्वेषीगोत्रजैर्जातवैरः ।। कांतापुत्रैरर्थमित्रैर्विहीनोहीनोबुध्यादंडयोगाप्तजन्मा ।।३२।। ख्यातोलुब्धोभोगसौख्यैर्विहीनोयोनौयोगेलब्धजन्मामनुष्यः ।।
क्लेशीशश्वच्चंचलस्वांतवृत्तिर्वृत्तिस्तेयोद्भूतधान्येनतस्य ।। ३३ ।। दुर्गारण्यावासशीलश्चमल्लभिल्लप्रीतिर्निर्धनोनिंद्यकर्मा ।। धर्माधर्मज्ञानहीनश्चकूटःकू
टप्राप्तोत्पत्तिरेवंमनुष्यः ।। ३४ ।।प्राज्ञोराज्ञांकार्यकर्तादयालुःपूर्वंपश्चात्सर्वसौख्यैरुपेतः ।। यस्योत्पत्तौछत्रयोगोपलब्धिर्लब्धिस्तस्यछत्रसच्चामरादेः
भाग्येभागेचांतिमेजीवितस्यसौख्योपेतःकाननाद्रिप्रचारः ।। योगेजातःकार्मुकेसोऽतिगर्वीगर्वोन्मत्तापत्तिकृत्कार्मुकाख्यः ।।३६।। भूमीपालप्राप्तचंच
त्प्रतिष्ठःश्रेष्ठःसेनाभूषणार्थाम्बराद्यैः ।। चेदुत्पत्तौयस्ययोगोऽर्धचंद्रश्चंद्रःसाक्षादुत्सवार्थेजनानाम् ।।३७।। श्रीमद्भोगोऽत्यंतजातप्रतापोभूयोभूयोपायनैरन्वि
तःस्यात् ।। योगेजातःपूरुषोयस्तुचक्रेचक्रेपृथ्व्याःशालिनीतस्यकीर्तिः ।। ३८ ।। दाताधीरश्चारुशीलोदयालुःपृथ्वीपालप्राप्तसौख्यःप्रकामम् ।। यो
गेजातोयःसमुद्रेसधन्योधन्योवंशस्तेननूनंनरेण ।। ३९ ।। विद्यासत्वौदार्यसामर्थ्यहीनानानायासानित्यजातप्रवासाः ।। येषांयोगःसंभवेगोलनामानानाःस

स्यप्रीतयोऽनीतयस्ते ।। ४० ।। पाखंडेनाखंडितप्रीतिभाजोनिर्लज्जाः स्युर्धर्मकर्मप्रमुक्ताः ।। पुत्रैरर्थैः सर्वथातेवियुक्तायुक्तायुक्तज्ञानशून्यायुगाख्ये ।।
युद्धेवादेतत्पराश्चातिशूराः क्रूराः स्वांतेनिष्ठुरानिर्धनाश्च ।। योगेयेषांसूतिकालेहिशूलः शूलप्रायास्तेजनानांभवंति ।। ४२ ।। सत्योपेताश्चार्थवंतोविनीताः
कृष्यौत्सुक्याश्चोपकारादराश्च ।। योगेकेदारेनरास्तेपिधीराधीराचारश्चापितेषांविशेषात् ।। ४३ ।। दीनाकारास्तत्पराश्चापकारेबंधेनार्ताभूरितल्पाः
सदंभाः ।। नानानर्थाः पाशयोगेप्रजाताजातारण्यप्रीतयः स्युर्मनुष्याः ।। ४४ ।। जातानंदोनंदनाद्यैः सुधीरोविद्वान्भूषाकोशसंजाततोषः ।। चंचल्लीलो
दारबुद्धिः प्रशस्तः शस्तः सूतौदामिनीयस्ययोगः ।। ४५ ।। अर्थोपेताः शास्त्रपारंगताश्चसंगीतज्ञाः पोषकाः स्युर्बहूनाम् ।। नानासौख्यैरन्वितास्तुप्रवीणा
वीणायोगेप्राणिनांजन्मयेषाम् ।। ४६ ।। प्रोक्तैरेतैर्नाभसाख्यैश्चयोगः स्यात्सर्वेषांप्राणिनांजन्मकामम् ।। तस्मादेतेत्यंतयत्नादपूर्वापूर्वाचार्यैर्जातकेसंप्रदिष्टाः
।। ४७ ।। एवंयोगानांफलंशालिनीसद्वृत्तैर्व्यक्तंयुक्तियुक्तंनिरुक्तं।।तस्मात्प्राज्ञैः सत्कवीनामनूनंसौख्यंचैवंजातकेकोमलोक्त्या ॥ ४८ ।। इतिजात०ना
भसयोगाध्यायः ।। अथरश्मिजातकाध्यायः ॥ येषांनराणांकिरणाः प्रसूतौएकादितः पंचभवंतियावत् ।। तेसर्वथादुःखदरिद्रभाजोनीचप्रियानीचकुलाः
खलाश्च ।। १ ।। पंचादितः खेंदुमिताश्चयावन्मरीचयस्तेजनयंत्यवद्यम् ।। नरान्विदेशाभिरतान्सुदीनान्भाग्येनहीनान्प्रतिपालितांश्च ।। २ ।। परंदश
भ्यस्तिथयस्तुयावत्तेभानवोमानवमल्पकार्यं ।। धर्मप्रियंसंजनयंतिनूनंकुलानुरूपंसुखिनंसुवेषम् ।। ३ ।। पंचेंदुतोविंशतिरेवयावत्गभस्तयस्तेमनु
जंसुशीलम् ।। कुर्वंतिसत्कीर्तिकरंसुधीरंवंशावतंसंकुशलंकलासु ।। ४ ।। यस्यप्रसूतौचनखामयूखास्तद्भाग्यरेखासुहृदांसुखाय ।। पंचाधिकाविं
शतिरत्रयावत्तावत्फलाधिक्यमनुक्रमेण ।। ५ ।। यावत्त्रिंशत्संमिताः पंचवर्गायेषांसूतौचेन्मयूखानराणाम् ।। भूमीपालप्राप्तसौख्याः प्रधानानानासं
पत्संयुतास्तेभवंति ।। ६ ।। येषांनूनंमानवानांप्रसूतावेकत्रिंशत्संख्यकाश्चेन्मयूखाः।। विख्यातास्तेराजतुल्याः प्रधानानानासेनास्वामिनः संभवंति ।। ७ ।।

प्रसूतिकालेकिरणानराणांद्वित्रिप्रमाणायदिसंभवंति ।। नानापुराणामथवागिरीणांतेस्वामिनोग्रामशताधिपावा ।। ८ ।। रामाग्निभिश्चापियुगाग्निभि
र्वाकरैर्नरस्यप्रसवोयदिस्यात् ।। क्रमात्सहस्रंत्रिसहस्रकंचग्रामान्सपातीतिवदंतिकेचित् ।। ९ ।। पंचत्रिसंख्यैःखलुयोमयूखैर्जातोभवेन्मंडलनायक
श्च ।। विलाससत्वामलशीलशालीयशोविशेषाधिककोशयुक्तः ।। १० ।। रसाग्निसंख्यैश्चनगाग्निसंख्यैर्जातोमयूखैःखलुयःक्रमेण ।। ग्रामान्मनु
ष्यःसतुसार्द्धलक्षंलक्षत्रयंयातिमहत्प्रतापात ।। ११ ।। यस्यप्रसूतौकिरणप्रमाणमष्टात्रिसंख्यंसभवेन्महौजाः ।। भूमीपतिर्लक्षचतुष्टयंहिग्रामान्प्रशा
स्तींद्रसमानसंपत् ।। १२ ।। नवत्रिसंख्याजननेमयूखाविख्यातकीर्तिर्नृपतिर्भवेत्सः ।।प्रौढप्रतापाद्गरुडस्वरूपोगर्वोद्धतारातिभुजंगमेषु ।। १३ ।। खा
ब्धिप्रमाणैःकिरणैःप्रसूतःक्षोणीपतिस्ताद्विजयप्रमाणे ।। भवंतिसेनागजगर्जितानांप्रतिस्वनाःखेघनगर्जितानि।। १४ ।। मयूखजालंपरिसूतिकालेय
स्यैकवेदाव्हयकंनरस्य ।। द्व्यंभोधिवेलामलमेखलायाभवेदिलायाःपरिपालकःसः ।। १५ ।।यमलजलधितुल्योवागुणाब्धिप्रमाणोभवतिकिरणयोग
श्चेन्नराणांप्रसूतौ ।। अतुलबलविलासत्रासितारातिवर्गाख्धिजलवलयायाःपालकास्तेपृथिव्याः।। १६ ।। सूतौवेदयुगप्रमाणकिरणाश्चेत्सार्वभौमःसनाय
त्सेनाजलधेगलन्मदजलादंतावलाःशैलताम् ।। यांतिच्छत्रविचित्रताःकमठतांमीनध्वजामीनतांनौकात्वंचरथास्तथायुधरुचिःकल्लोलमालातुलां।।१७।।
पंचाब्धितश्चेत्परतोभवंतिगभस्तयोजन्मनिमानवानाम् ।। तेदेवतानामपिदुर्जयाःस्युर्द्वीपांतरोद्गीतयशोविशेषाः।। १८ ।। इतिजातकाभरणेरश्मिजात
काध्यायः ।।अथदीप्तादिग्रहफलम् ।। दीप्तस्तुंगगतःखगोनिजगृहेस्वस्थोहितेहर्षितःशांतःशोभनवर्गगश्चखचरःशक्तःस्फुरद्रश्मिभाक्। ।। लुप्तः
स्याद्विकलःस्वनीचगृहगोदीनःखलःपापयुक्खेटोयःपरिपीडितश्चखचरैःसप्रोच्यतेपीडितः ।। १ ।। दीप्तप्रतापादतितापितारिर्गलन्मदालंकृतकुंज
रेशः ।। नरोभवेत्तान्निलयेसलीलंपद्मालयालंकुरुतेविलासम् ।। २ ।। स्वस्थेमहद्वाहनधान्यरत्नविशालशालाबहुलत्वयुक्तः ।। सेनापतिःस्या

न्मनुजोमहौजावैरिव्रजांवाप्तजयाधिशाली ॥ ३ ॥ हर्षितेभवतिकामिनीजनोऽर्थ्यंतंभूषणमणिव्रजवित्तः ॥ धर्मैकमंकरणैकमानसोमानसोद्भवचयो
हतशत्रुः ॥ ४ ॥ शांतेगतिशांतोहिमहीपतीनांमंत्रीस्वतंत्रोबहुपुत्रमित्रः ॥ शास्त्राधिकारीसुतरांनरःस्यात्परोपकारीसुकृतैकचित्तः ॥ ५ ॥ शक्ते
गतिशक्तःपुरुषोविशेषात्सुगंधमाल्याभिरुचिःशुचिश्च ॥ विख्यातकीर्तिःसुजनप्रसन्नोजनोपकर्ताऽरिजनप्रहर्ता ॥ ६ ॥ हतबलोविकलोमलिनःसदा
रिपुकुलप्रबलश्चगलन्मतिः ॥ खलसखःस्थलसंचलितोनरःकृशतरःपरकार्यगतादरः ॥ ७ ॥ दीनेगतिदीनोपचयेनततःसंप्राप्तभूमीपतिशत्रु
भीतिः ॥ संत्यक्तनीतिःखलुहीनकांतिःस्वजातिवैरांहिनरःकरोति ॥ ८ ॥ खलाभिधानेहिखलैःकलिःस्यात्कांतातिचिंतापरितप्तचित्तः ॥विदेशया
नंधनहीनताचप्रकोपतालुप्तमतिप्रकाशः ॥ ९ ॥ पीडितेभवतिपीडितःसदाव्याधिभिर्व्यसनतोपिनितांतम् ॥ यातिसंचलनतांनिजस्थलात्व्या
कुलत्वमपिबंधुचिंतया ॥ १० ॥ इतिश्रीजातकाभरणेदीप्तादिग्रहफलम् ॥ ॥ अथस्थानादियुक्तग्रहफलानि ॥ ॥ परांविभूतिं
जनयंत्यवश्यंबलाधिकत्वंमहसःप्रवृद्धिम् ॥ नानाधनंकौशलगौरवादिकुर्यादलंस्थानबलोपपन्नः ॥ १ ॥ आशाबलंयस्यभवेत्प्रकृष्टंखेटःस्वका
ष्ठांनियमेननीत्वा ॥ विशिष्टलाभंकुरुतेदशायांपुंसांनिजद्रव्यविमिश्रितंहि ॥ २ ॥ शत्रुक्षयंभूगजवाजिवृद्धिंशौर्यंचरत्नांबरसंपदंच ॥ लील
विलासंविमलांचकीर्तिंकुर्यात्ग्रहःकालबलाधिशाली ॥ ३ ॥ आचारशौचशुभसत्ययुताःसुरूपास्तेजस्विनःकृतविदोद्विजदेवभक्ताः ॥ पुष्पांब
रोत्तमविभूषणसादराश्चसौम्यग्रहैर्बलयुतैःपुरुषाभवंति ॥ ४ ॥ लुब्धाःकुकर्मनिरतानिजकार्यनिष्ठाःसाधुद्विषःस्वकुलहाश्चतमोगुणाढ्याः ॥ क्रूर
स्वभावनिरताम्मलिनःकृतघ्नाःपापग्रहैर्बलयुतैःपुरुषाभवंति ॥ ५ ॥ द्वौवात्रयोवाबलिनोभवंतिफलप्रदानत्वमितिप्रकल्प्यम् ॥ मंदारसौम्येड्यसितेंदुसू
र्यायथोत्तरंस्युर्बलिनोनिसर्गात् ॥ ६ ॥ क्वचिद्राज्यंक्वचित्पूजांक्वचित्द्रव्यंक्वचिद्यशः ॥ ददातिखेचरश्चित्रंचेष्टावीर्यसमन्वितः ॥ ७ ॥ दुष्टप्रदः

सौम्यनिरीक्षितश्चेद्दुष्टंफलंनोसकलंददाति ॥ क्रूरेक्षितःसत्फलदोऽपिचैवंविचारणेयंकिलदृग्बलस्य ॥ ८ ॥ इतिश्रीजातकाभरणेस्थानादियुक्तग्रह
फलानि ॥ . ॥ अथसूर्ययोगाध्यायः ॥ . ॥ खेचरादिनमणेर्विधुवर्जंद्वादशेचधनभेद्युभयेवा ॥ वोशिवेद्युभयचर्यभिधानाःप्राक्तनैःसमुदिताइति
योगाः ॥ १ ॥ स्यान्मंददृष्टिर्बहुकर्मकर्त्तापदयस्त्यधश्चोन्नतपूर्वकायः ॥ असत्यवादीयदिवेशियोगःप्रसूतिकालेमनुजस्ययस्य ॥ २ ॥ चेत्संभवेयस्य
चवेशियोगोभवेद्दयालुःपृथुपूर्वकायः ॥ स्याद्वाग्विलासीलसतासमेतास्तिर्यक्प्रचारःखलुतस्यदृष्टेः॥ ३ ॥ सर्वंसहःस्थिरतरोतितरांसमृद्धःसत्वाधिकः
समशरीरविराजमानः ॥ नात्युच्चकःसरलदृक्प्रबलामलश्रीयुक्तःकिलोभयचरीप्रभवोनरःस्यात् ॥ ४ ॥ सूर्यस्यवीर्यात्खचरानुसाराद्दरादयंश
योगात्प्रविचार्यसर्वम् ॥ न्यूनंसमंवाप्रबलंनराणांफलंसुधीभिःपरिकल्पनीयम् ॥ ५ ॥ इतिसूर्ययोगाध्यायः ॥ ॥ अथचंद्रयोगाध्यायः ॥ ॥
द्विजपतेर्धनगैःसुनफाभवेत्व्ययगतैरनफारविवर्जितैः ॥ दुरधराःखचरैरुभयास्थितेर्मुनिवरैरुदितामहदादरात् ॥ १ ॥ निशाकराज्जन्मनिखेचरेंद्रा
धनव्ययस्थानगतानचेत्स्युः ॥ वदंतिकेचिद्द्रुमनामयोगंलक्ष्मीवियोगंकुरुतेसनूनम् ॥ २ ॥ निजभुजार्जितमानसमुन्नतोविशदकीर्तियतोमतिमान्सुखी
ननुनरःसुनफाप्रभवोभवेन्नरपतेःसचिवःसुकृतीकृती ॥ ३ ॥ उदारमूर्तिर्गुणकीर्तिशालीकंदर्पकेलिःशुभवाग्विलासः॥ सद्वृत्तयुक्तःसततंविनीतःप्रभुर्नरः
स्यादनफाभिधाने॥ ४॥ द्रविणवाहनवाहवसुंधरासुखयुतंसततंकुरुतेनृपम् ॥ दुरुधरातितरांजितवैरिणंसुनयनानयनांचललालसम् ॥५॥ विरुद्धवृत्ति
मंलिनःकुवेषःप्रेष्योमनुष्योहिविदेशवासी ॥ कांतासुहृत्सूनुधनैर्विहीनःकेमद्रुमेभूमिपतेःसुतोऽपि ॥ ६ ॥ केंद्रादिगामीयदियामिनीशःस्यात्पद्मिनी
नायकतःकरोति ॥ विज्ञानमानोन्नतिनैपुणानिकनिष्ठमध्योत्तमतायुतानि ॥ ७ ॥ प्रालेयरश्मिःपरिसूतिकालेनिरीक्ष्यमाणःसकलैर्नभोगैः ॥ नरंचि
रंजीवितसार्वभौमंकरोतिकेमद्रुममाशुहत्वा ॥ ८ ॥ चतुर्षुकेंद्रेषुभवंतिखेटादुष्टोऽपिकेमद्रुमयोगएषः ॥ विहायकेमद्रुमतांनिततंकल्पद्रुमःस्या

त्किलसत्फलात्यै ॥ ९ ॥ क्षितिसुतयुतजीवेसूतिकालेतुलायांविलसतिनलिनीनांनायकःकन्यकायाम् ॥ विधुरपियदिशेषैर्नेक्षितोमेषवर्तीजनयतिनृप
तींद्रंहंतिकेमद्रुमंच ॥ १० ॥ इतिजातकाभरणेसुनफानफादियोगाध्यायः ॥ ॥ अथप्रव्रज्याध्यायः ॥ ॥ येषांसूतौराजयोगानराणांप्रव्र
ज्याचेत्तापसास्तेभवेयुः ॥वक्ष्येसंक्षेपेणतांस्तापसानांयोगोत्पन्नात्संमतान्प्राक्तनानाम् ॥ १ ॥ ग्रहैश्चतुर्भिर्यदिपंचभिर्वाषड्भिस्तथैकालयसंस्थितैश्च ॥
नश्यंतिसर्वेखलुराजयोगाःप्रव्राजिकोयोगइतिप्रदिष्टः ॥ २ ॥ अन्यग्रहालोकनवर्जितश्चेज्जन्मेश्वरोनैवशानिंप्रपश्येत् ॥ मंदोऽपिनोजन्मपतिंविसत्वंदी
क्षाविवक्षाप्रचरोनरःस्यात् ॥ ३ ॥ जन्माधिराजोरविजत्रिभागेकुजार्कजांशेऽर्कजवीक्षितश्च ॥ करोतिजातंजटिलंकुशीलंपाखंडिकंमंडनतत्परंवा
॥ ४ ॥ होराशीतकरामरेंद्रसचिवासौरेणसंवीक्षिताःपुण्यस्थेसुरमंत्रिणिप्रणयकृत्तीर्थाटनेमानवः ॥ कोणेपुण्यगृहाश्रितेऽन्यखचरैर्नेवेक्षितेदीक्षित
स्यान्नूनंयदपिप्रसूतिसमयेसद्राजयोगोद्भवः ॥ ५ ॥ प्राव्राजिकोर्कादिबलक्रमेणवैखानसःखर्परधृक्चलिंगी ॥ दंडीयतिश्चक्रधरश्चनग्नस्तत्प्रच्युतो
जन्मपतौजितेस्यात् ॥ ६ ॥ एकस्थानस्थितैःखेटैःसर्वैश्चबलसंयुतैः ॥ निरंबरानिराहारायोगमार्गपरायणाः ॥ ७ ॥ एकस्थानेखेचराणांचतुर्णां
योगश्चेत्स्यान्मानवानांप्रसूतौ ॥ तेस्युर्भूमीपालवंशेपिजाताकांतारांतर्वासिनःसर्वथैव ॥ ८ ॥ पंचखेचरपतिर्यदिसूतौभूपतेरपिसुतःसचनिस्वम् ॥ कंदमू
लफलभक्षणचित्तोऽत्यंतशांतिविजितेंद्रियशत्रुः ॥ ९ ॥ एकत्रषण्णांगगनेचराणांप्रसूतिकालेमिलनंयदिस्यात् ॥ तेकेवलंशैलशिलातलेषुतिष्ठंतिभूपा
लकुलेषुजाताः ॥ १० ॥ प्राव्राजितानामथभूपतीनांयोगद्वयंचेत्प्रबलंप्रसूतौ ॥ फलंविरुद्धंत्वनुभूयपूर्वंततोव्रजेद्राजपदाधिकारम् ॥ ११ ॥ इ
तिश्रीजातकाभरणेप्रव्रज्यायोगः ॥ ॥ अथरिष्टाध्यायः ॥ ॥ रिष्टाध्यायाधीनमायुर्नराणांयस्मात्तस्माद्रिष्टमत्रप्रवच्मि ॥ यस्याभावेसाधितायुःप्र
माणेप्रामाण्यंस्यात्संभवेसर्वथैव ॥ १ ॥ भौमालयेऽर्कारशनींदुदृष्टेगृहेऽष्टमेचित्रशिखंडिसूनु. ॥ अदृष्टमूर्तिर्भृगुणात्रयोगेप्राणैर्वियोगंलभतेमनुष्यः ॥ २ ॥

षष्ठेऽष्टमेवाऽपिचतुष्टयेवाविलोमगामीकुजमंदिरस्थः ॥ बलान्वितेनाऽवनिजेनदृष्टोवर्षैस्त्रिभीरिष्टकरःशनिःस्यात् ॥ ३ ॥ चंद्रार्कयुक्जन्मनिभानुसूनुः
करोतिनूनंनिधनंनवाब्दैः ॥ मासेनमंदावनिसूनुसूर्याश्छिद्रेऽरिगेहाश्रिततासमेताः ॥ ४ ॥ एकोपिपापोऽष्टमगोरिगेहेपापेक्षितोऽब्देनशिशुंनिहन्यात्॥
सुधारसोयद्यपियेनपीतःकिमत्रचित्रंनहियेनपीतः ॥ ५ ॥ सूर्येंदुगेहेदनुजेंद्रमंत्रीव्ययाष्टमारिस्थितसौम्यखेटैः ॥ सर्वैःप्रदृष्टःखलुषड्भिरब्दैर्जातस्य
जंतोर्वितनोतिरिष्टम्. ॥ ६ ॥ सोमस्यसूनुर्यदिकर्कटस्थःषष्ठेऽष्टमेवाभवनेविलग्नात् ॥ चंद्रेणदृष्टोऽब्दचतुष्टयेनजातस्यजंतोःप्रकरोतिरिष्टम् ॥ ७ ॥
केतूदयेभेप्रभवेच्चयस्मिन्तस्मिन्प्रसूतिर्यदियस्यजंतोः ॥ स्यात्तस्यमासद्वितयेननाशोविनिश्चयेनेतिवदंतिपूर्वे ॥ ८ ॥ मेषूरणेकौधरणीसुतस्यगेहेऽथवाऽ
र्कात्मजधामसंस्थः ॥ पापैरनेकैश्चनिरीक्ष्यमाणःप्राणैर्वियोगंसतुयातितूर्णम् ॥ ९ ॥ लग्नेभवंतिद्रेक्काणाःशृंखलापाशपक्षिणाम् ॥ सपापामरणंकुर्युः
सप्तवर्षैर्नसंशयः॥१०॥ राहुर्भवेज्जन्मनिकेंद्रवर्त्तीक्रूरग्रहैश्चाऽपिनिरीक्षितश्चेत् ॥करोतिवर्षैर्दशभिर्विनाशंवदंतिवाषोडशभिश्चकेचित् ॥११॥ षष्ठाष्ट
मस्थाःशुभखेचरेंद्राःपापास्त्रिकोणेयदिजन्मलग्नात् ॥ क्रूरेक्षितास्तेनिधनंविदध्युर्वर्षाष्टकेनैवखलप्रदृष्टाः ॥ १२ ॥ सूतिकालेभवेच्चंद्रःषष्ठोवाऽष्टम
संस्थितः॥बालस्यकुरुतेसद्योमृत्युंपापविलोकितः ॥ १३ ॥ शुभाशुभालोकनतुल्यतायांवर्षैश्चतुर्भिर्निधनंतदानीम् ॥ न्यूनाधिकत्वेसुधियाविधेयास्त्रैरा
शिकैर्नैवविनिश्चयोऽयम् ॥ १४ ॥ धनांत्यगैर्वाऽरिमूर्तिस्थितैर्वाधर्माष्टमस्थैर्व्ययशत्रुगैर्वा ॥ क्रूरग्रहैर्योजननंप्रपन्नःषष्ठेऽष्टमेमासिमृतिंप्रयाति ॥१५॥
षष्ठाष्टमस्थाःशुभखेचरेंद्राविलोमगैःपापखगैःप्रदृष्टाः ॥ शुभैरदृष्टायदितेभवंतिमासेननूनंनिधनंतदानीम् ॥ १६ ॥ विलग्नजन्माधिपतीभवेतामस्तंग
तावष्टरिपुव्ययस्थौ ॥ जातस्यजंतोर्मरणप्रदौतौवदंतिराशिप्रमितैर्हिवर्षैः ॥ १७ ॥ होराधिपःपापखगैःप्रदृष्टश्चतुर्थमासेमृतिकृन्मृतिस्थः ॥ जन्मेश्व
रस्तन्निधनेदिनेशःशुक्रेक्षितोऽब्दैर्भवनप्रमाणैः ॥१८॥होराधिपःपापयुतःस्मरस्थःकरोतिनाशंखलुजीवितस्य॥मासेनजन्माधिपतिस्त्वरूतद्वत्पापान्वितो

रंध्रगृहाश्रितश्च ॥ १९ ॥ युक्तोभवेदारदिवाकराभ्यांनिशाकरश्चारुखगैर्नदृष्टः ॥ स्वसूनुगेहोपगतोविनाशंकरोतिवर्षेनवमेऽर्भकस्य ॥ २० ॥ लग्नास्तरंध्रां
स्यगतेशशांकेपापान्वितेसौम्यखगैरदृष्टे ॥ केंद्रेषुसौम्यग्रहवर्जितेषुकीनाशदेशंहिशिशुःप्रयाति ॥ २१ ॥ रंध्रालयेवाऽथचतुष्टयेषुखलग्रहाणांमिलनंयदि
स्यात् ॥ कलानिधौक्षीणकलाकलापेलग्नस्थितेनश्यतियःप्रसूतः ॥ २२ ॥ लग्नेकुलीरेप्यथवाऽलिसंज्ञेखलग्रहाःपूर्वदलेयदिस्युः ॥ सौम्याःपरार्धेखलुव
ज्रमुष्टियोगोऽयमुक्तःप्रकरोतिरिष्टम् ॥ २३ ॥ व्ययारिरंध्रेषुशुभाभिधानास्त्रिकोणकेंद्रेषुभवंतिपापाः ॥ सरोजबंधोरुदयेप्रसूतिर्यस्यान्यलोकंत्वर
यासयाति ॥ २४ ॥ सौरस्यालयसंस्थोदेवगुरुर्निधनभावगोलग्नात् ॥ पापग्रहदृष्टतनुर्निधनायैकादशोहितुल्यःस्यात् ॥ २५ ॥ रंध्रांबुजायाभवनेषुखेटा
विधौचपापद्वयमध्ययाते ॥ यस्यप्रसूतिःसतुयातिकासंयमस्यधामप्रवदंतिपूर्वे ॥ २६ ॥ संध्याद्वयेभांत्यगताश्चपापाश्चंद्रस्यहोरायदिजन्मकाले ॥ च
तुर्षुकेंद्रेषुशशांकपापाःसयातिबालःकिलकालगेहम् ॥ २७ ॥ स्मराष्टमस्थायदिपापखेटाःपापेक्षिताःसाधुखगैर्नदृष्टाः ॥ करोतिरिष्टंत्वरयाऽर्भकस्य
साकंजनन्याऽभिमतंबहूनाम् ॥ २८ ॥ निजोपरागेत्वशुभान्वितेंदुर्लग्नस्थितोभूमिसुतोऽष्टमस्थः ॥ ततोजनन्यासहबालकस्यमृत्युस्तथाऽर्केसतिश
स्त्रघातः ॥ २९ ॥ भूमीसुतेवाऽर्कसुतेविलग्नेभानौस्मरस्थानगतेऽन्यथावा ॥ युक्तेतयोरन्यतमेनचंद्रेचिरेणमृत्युःपरिवेदितव्यः ॥ ३० ॥ पापै
र्विलग्नाष्टमधामसंस्थैःक्षीणेविधौद्वादशभावयाते ॥ केंद्रेषुसौम्यानभवंतिनूनंशिशोस्तदानींनिधनंप्रकल्प्यम् ॥ ३१ ॥ त्रिकोणकेंद्रेषुभवंतिपापाःशुभ
ग्रहालोकनवर्जिताश्चेत् ॥ लग्नोपयातेसतिभास्करेवानिशाकरेरिष्टसमुद्भवःस्यात् ॥ ३२ ॥ भानुभानुतनयोशनसःस्युश्चेत्प्रसूतिसमयेखलयुक्ताः ॥
यद्यपींद्रगुरुणापरिदृष्टारिष्टदातनुभृतांनवमेऽब्दे ॥ ३३ ॥ कामिनीभवनगस्तुहिमांशुर्लग्नगोमृतिपतिःशनिदृष्टः ॥ रिष्टदोनवसमाभिरीरितोजानकज्ञमुनि
भिःपुरातनैः ॥ ३४ ॥ दृष्टेरिष्टेनाप्रदृष्टेऽस्यकालेप्रालेयांशौस्वालयेवाविलग्नम् ॥ वीर्योपेतंसंगतेपापदृष्टेशत्रयायुक्तेमृत्युकालोऽब्दमध्ये ॥ ३५ ॥

लग्नत्रिकोणांतिमसत्तरंध्रेचंद्रेसपापेपचयंप्रयाते ॥ शुभैर्नयुक्तेयदिनप्रदृष्टेरिष्टंभवेदत्रकिमत्रचित्रम् ॥ ३६ ॥ सूर्यज्ञजीवाःशनिशुक्रभौमाःसूर्यारमं
दाश्चयदींदुयुक्ताः ॥ प्रसूतिकालेमिलितायदिस्युर्नाशःशिशोरब्दकपंचकेन ॥ ३७ ॥ विलग्ननाथोभवनप्रमाणैर्वर्षैर्विनाशंकुरुतेरिपुस्थः ॥ मासैर्द्द
काणाधिपतिर्लवेशोदिनैर्मुनींद्राःप्रवदंतिसर्वे ॥ ३८ ॥ लग्नेशनिःक्रूरनिरीक्षितश्चेत्शिशोर्विनाशंखलुषोडशाहात् ॥ करोतिमासेनचपापयुक्तःपापै
र्विमुक्तःखलुवत्सरेण ॥ ३९ ॥ रवींदुयुक्पापनिरीक्षितोज्ञश्चैकादशाब्दैःकुरुतेविनाशम् ॥ लग्नेर्कमंदोऽवनिजाःकृशेंदुःस्मरेषडब्दैरथसप्तभिर्वा
॥ ४० ॥ कृशःशशांकःस्मरगोविलग्नेमंदारशुक्रागुरुदृष्टिहीनाः ॥ विनाशनंतेऽब्दकसप्तकेनकुर्वंतिजातस्यविनिश्चयेन ॥ ४१ ॥ चंद्रःसचांद्रिर्य
दिकेंद्रसंस्थःसूर्यांशुलुप्तःकुजमंददृष्टः ॥ वर्षद्वयेनप्रकरोतिरिष्टंस्पष्टंवसिष्ठादयएवमूचुः ॥ ४२ ॥ निशापतिर्लग्नपतेःसकाशात्चेदष्टमस्थःकृशतां
प्रयातः ॥ क्रूरैश्चदृष्टश्चशुभैर्नदृष्टोवर्षद्वयांतेसकरोतिरिष्टम् ॥ ४३ ॥ लग्नाधिपःपापखगोनवांशेचंद्रस्यचेद्द्वादशगःशशांकात् ॥ पापेक्षितोमारय
तिप्रसूतौशिशुंनवाब्दैःखलुकीर्तयंति ॥ ४४ ॥ लग्नेश्वरःसूर्यमयूखलुप्तोऽष्टमेश्वरेणप्रविलोक्यमानः ॥ रिष्टंकरोराशिसमानवर्षैःप्राज्ञैरुदाहारिनर
स्यजन्म ॥ ४५ ॥ अदृश्यभागेयदिपापखेटादृश्येविभागेशुभदाभवंति ॥ स्वर्भानुनामातनुभावगामीजीवेत्प्रसूतोऽब्दकसप्तकंहि ॥ ४६ ॥ सिंही
सुतःसप्तमभावसंस्थोशनैश्चरादित्यनिरीक्षितश्चेत् ॥ नालोकितःसौम्यखगैस्तुजीवेद्वर्षाणिहिद्वादशयःप्रसूतः ॥ ४७ ॥ सिंहालिकुंभस्थितसैं
हिकेयोविलोकितःक्रूरखगैर्यदिस्यात् ॥ वर्षाणिसप्तैवतदीयमायुःप्रकीर्तितंजातकशास्त्रविद्भिः ॥ ४८ ॥ केतूदयःस्यात्प्रथमंततश्चेन्निर्वातवाता
शनयोभवंति ॥ योरौद्रसार्पाख्यमुहूर्तजन्माप्राप्नोतिकामंयममंदिरंसः ॥ ४९ ॥ चंद्रंक्रूरयुतंक्षीणंपश्येद्राहुर्यदातदा ॥ दिनैःस्वल्पतरैर्बा
लःकालस्यालयमाव्रजेत् ॥ ५० ॥ मातंगै८र्नवभि९श्चरामनयनै२३र्नेत्राश्विभिः२२सायकै५रेकेनां१बुधिभि४स्त्रिलोचन२३मितैर्भूसार१८चविंश

भः सितेचंद्रदशेतिकेचित् ॥ ३ ॥ पित्ताक्षताद्रक्तविकारतोवावैकल्यमंगेप्रभवेन्नराणाम् ॥ उत्साहहीनत्वमतीवयातेभूमीसुतेदैत्यगुरोर्दशायाम्
॥ ४ ॥ सन्माननानाविधवस्तुसौख्यंभूमीपतेःस्यात्खलुभूमिलाभः ॥ अंगारकेभार्गवपाकसंस्थेकेषांचिदेवंमतमस्तिशस्तम् ॥ ५ ॥ वृक्षैः
फलैश्चाऽपिचतुष्पदाद्यैर्वित्तंभवेत्सख्यविधिर्नृपेण ॥ दुरंतकार्याभिरतिर्नितांतंभृगोर्दशायांचरतींदुसूनौ ॥ ६ ॥ यज्ञादिसत्कर्मणिसादरत्वंगतार्थसि
द्धिःसुतदारसौख्यम् ॥ महापदानेकविभूषणाप्तिर्भृगोर्दशायांचरतींद्रवंद्ये ॥ ७ ॥ मित्रोन्नतिर्ग्रामपुराधिपत्यंवृद्धांगनाकेलिरतीवनित्यम् ॥ स्या
द्वैरिनाशोऽत्युशनोदशायांशनैश्चरस्यांतरजादशाचेत् ॥ ८ इतिशुक्रांतर्दशाफलानि ॥ ॥ अथमंदांतर्दशाफलम् ॥ ॥ धनांगना
नंदनबंधुपीडागाढापिबाधात्मकलेवरेस्यात् ॥ रिपूद्गमःसंचलनंनलिन्याःपत्यौस्थितेमंददशांतराले ॥ १ ॥ नित्यंकलिर्बंधुजनैर्वियोगोत्त्वातिर्मृतिर्वापि
भवेद्गृहिण्याः ॥ उत्साहसौख्योपहतिर्नितांतंशीतद्युतौमंददशांतराले ॥ २ ॥ स्वस्थानयानंविकलत्वमंगेधनांगनासूनुवियोजनंस्यात् ॥ सन्मान
हानिर्ननुसूर्यसुनोर्दशांतरेभूमिसुतप्रचारे ॥ ३ ॥ धनांगनासूनुसुखोपपन्नःसद्राजमानेनविराजमानः ॥ विद्वज्जनानंदकरःकफार्तोमर्त्योभवेज्ज्ञेश
निपाकसंस्थे ॥ ४ ॥ कलाकलापेकुशलोविलासीपद्मालयालंकृतचारुशीलः ॥ भूपालभूलाभयुतोनरःस्याद्बृहस्पतौमंददशांप्रयाते ॥ ५ ॥
योषाविभूषासुतसौख्यलब्धिःश्रीग्रामदेशाधिकृतत्वमुच्चैः ॥ यशःप्रकाशोऽरिकुलस्यनाशःशनेर्दशायामुशनःप्रवेशे ॥ ६ ॥ अंतर्दशाचेन्नलिनी
शसूनोर्दशांतरालेकिलमंगलस्य ॥ भवेत्तदानींनिधनंनराणांयद्यप्यहोदीर्घमवाप्तमायुः ॥ ७ ॥ लग्ननाथरिपुर्लग्नदशायांप्रविशेद्यदि ॥ अकस्मान्मर
णंकुर्यात्प्राणिनांसत्यसंमतम् ॥ ८ ॥ इतिशन्यंतर्दशाफलानि ॥ ॥ इतिश्रीजातकाभरणेअंतर्दशाध्यायः ॥
॥ अथदानाध्यायः ॥ ॥ येखेचरागोचरतोऽष्टवर्गाद्दशाक्रमाद्वाप्यशुभाभवंति ॥ दानादिनातेसुतरांप्रसन्नास्तेनाऽधुनादानविधिंप्रवच्मि ॥ १ ॥

०भ० माणिक्यगोधूमसवत्सधेनुःकौसुंभवासोगुडहेमताम्रम् ॥ आरक्तकंचंदनमंबुजंचवदंतिदानंहिविरोचनाय॥ २ ॥ सद्वंशपात्रस्थिततंडुलांश्चकर्पूर
४७ मुक्ताफलशुभ्रवस्त्रम् ॥ युगोपयुक्तंवृषभंचरौप्यंचंद्रायदद्यात्घृतपूर्णकुंभम् ॥ ३ ॥ प्रवालगोधूममसूरिकाश्चवृषोऽरुणश्चापिगुडःसुवर्णम् ॥ आर
क्तवस्त्रंकरवीरपुष्पंताम्रंहिभौमायवदंतिदानम् ॥ ४ ॥ चैलंचनीलंकलधौतकांस्यंमुद्गाज्यगारुत्मकसर्वपुष्पम् ॥ दासीचदंतोद्विरदस्यनूनंवदंतिदानं
विधुनंदनाय ॥ ५ ॥ शर्कराचरजनीतुरंगमः पीतधान्यमपिपीतमंबरम्॥ पुष्परागलवणेचकांचनंप्रीतयेसुरगुरोःप्रदीयताम् ॥ ६ ॥ ।चित्रांबरंशु
भ्रतरस्तुरंगोधेनुश्चवज्रंरजतंसुवर्णं ॥ सुतंडुलाज्योत्तमगंधयुक्तंवदंतिदानंभृगुनंदनाय ॥ ७ ॥ माषांश्चतैलंविमलेंद्रनीलास्तिलाःकुलित्थामहिषीच
लोहम् ॥ सदक्षिणंचेतिवदंतिनूनंदुष्टायदानंरविनंदनाय ॥ ८ ॥ गोमेदरत्नंचतुरंगमश्चसुनीलचैलानिचकंबलश्च ॥ तिलाश्चतैलंखलुलोहमिश्रंस्व
र्भानवेदानमिदंवदंति ॥ ९ ॥ वैडूर्यरत्नंसतिलंचतैलंसुकंबलश्चापिमदोमृगस्य ॥ शस्त्रंचकेतोःपरितोषहेतोरुदीरितंदानमिदंमुनींद्रैः ॥ १० ॥
इतिश्रीजातकाभरणेदानाध्यायः ॥ ॥ अथनष्टजातकाध्यायः ॥ ॥ आधानकालोऽप्यथजन्मकालोनज्ञायतेयस्यनरस्यनूनं ॥ प्रसूतिकालं
प्रवदंतितस्यनष्टाभिधानादपिजातकाच्च ॥ १ ॥ तज्जातकंयेनशुभाशुभातिर्जातस्यजंतोर्जननोपकालात् ॥ तस्मिन्प्रनष्टेसतिजन्मकालेयेनोच्यतेनष्ट
कजातकंतत् ॥ २ ॥ मेषादितःप्रश्नविलग्नलिप्ताःकार्याःक्रमात्तामुनिभिःखचंद्रैः ॥ गजैश्चवेदैर्दशभिश्चबाणैःशैलैर्भुजंगैःखचरैःशरैश्च ॥ ३ ॥
शिवैःपतंगै ७।१०।८।४।१०।५।७।८।९।५।११।१२। र्निहताःपुनस्ताविलग्नगाश्चेद्गुभौमजीवाः ॥ तदातुरंगैः ७ करिभिः ८ खचंद्रै १० र्गु
ण्याःशरैरन्यखगायादिस्युः॥ ४ ॥ ग्रहद्वयंवाबहवोविलग्नेतदातदीयैर्गुणकैश्चगुण्याः ॥ एवंकृतेकर्मविधाययोग्योराशिःपृथक्स्थःपरिरक्षणीयः ॥
५ ॥ पृथक्स्थराशिर्मुनिभिर्विनिघ्नस्त्वाद्यद्रेकाणनवयुक्द्वितीये ॥ यथास्थितोऽयंनववर्जितोऽत्येभसंज्ञयातोह्यवशेषमृक्षम् ॥ ६ ॥ स्त्रीपुत्रमित्रादिनि

मित्तकंचेत्पृच्छाविलग्नंकृतुभिश्चवेदैः ।। त्रिभिःशरैर्युक्तमनुक्रमेणततोविलग्नस्यकलाविधेयाः ।। ७ ।। लग्नस्यराशेर्गुणकेनगुण्याश्चेत्संभवोलग्नगतग्रह
स्य ।। पुनस्तदीयेनगुणेनगुण्याःप्रागुक्तवद्धूंपरिवेदितव्यम् ।। ८ ।। दशाहतेकर्मविधानराशौप्राग्वन्नवोनेप्यथवाधिकेस्मिन् ।। खार्कैर्हतेशेषमिताष्टसंख्य
मायुर्गतंतत्खलुपृच्छकस्य ।। ९ ।। षड्भिर्विभक्तेऋतवोभवंतिशेषांकतुल्याःशिशिरादयःस्युः ।। द्विभाजितेशेषकमेकमभ्रंपूर्वापरौतद्दतुजौचमासौ ।।
।। १० ।। अष्टाहतेकर्मविधानराशौप्राग्वन्नवोनेऽप्यथवाधिकेस्मिन् ।। द्विभाजितेशेषकमेकमभ्रतुल्येस्तिपूर्वापरपक्षकौस्तः ।। ११ ।। पंचेंदुभक्तेसति
शेषतुल्याःपक्षेचतस्मिंस्तिथयोभवंति ।। नक्षत्रातिथ्यानयनाययोग्यादहर्गणाद्वाराविचारणाऽत्र ।। १२ ।। सप्ताहतेकर्मविधानराशौप्राग्वन्नवोनेप्यथवाधि
केस्मिन् ।। द्विभाजितेशेषकमेकमात्रंदिवाचरात्रौजननंतदानीम् ।। १३ पंचाहतेकर्मविधानराशौप्राग्वन्नवोनेप्यथवाधिकेस्मिन् ।। दिनस्यरात्रेरथवाप्रामि
त्याभक्तेवशिष्टंदिनरात्रिनाड्यः ।। १४ ।। इतिजातकाभरणेनष्टजातकाध्यायः ॥ ।। अथनिर्याणाध्यायः।। ।। दिनकरप्रमुखैर्निधनस्थितै
र्भवतिमृत्युरितिप्रवदेत्क्रमात् ।। अनलतोजलतःकरवालतोज्वरभवोगदतःक्षुधयातृषा ।। १ ।। स्थिरचरोद्व्यंगसमाव्हयश्चराशिर्यदाजन्मनिचाष्टमस्थः
।। स्वकीयदेशेविषयांतरेचमार्गेप्रकुर्यान्मरणंक्रमेण ।। २ ।। आयुर्गृहंखेटविवर्जितंचेद्विलोकयेद्वाबलवान्ग्रहेंद्रः ।। तद्धेतुजातंप्रवदंतिमृत्युंबहुप्रकारं
बहवोबलिष्ठाः ।। ३ ।। पित्तंकफःपित्तमथात्रिदोषःश्लेष्मानिलौवाप्यनिलःक्रमेण ।। सूर्यादिकेभ्योमरणस्यहेतुःप्रकाशितःप्राक्तनजातकज्ञैः ।। ४ ।।
युक्तंनैवालोकितंखेचरेंद्रैर्मृत्युस्थानंयोविलग्नेद्दकाणः ।। द्वाविंशोऽस्मात्सोऽपितस्याऽपिभर्ताकुर्यान्मृत्युंहेतुनास्वेननूनम् ।। ५ ।। अनलतोजलतोयदुदीरि
तंभवतितत्रिलवाधिपहेतुकम् ।। अथद्दकाणफलानिसविस्तरंमुनिवरैरुदितानिवदाम्यहम् ।। ६ ।। मेषस्यपूर्वत्रिलवेनदृष्टेशुभग्रहैःपापनिरीक्ष्यमाणे ।।
प्लीहोद्भवोवाविषपित्तजोवामृत्युस्तदानींपरिवेदितव्यः ।। ७ ।। मेषेद्वितीयेजलजोवनांतेतृतीयकेकूपतडागजातः ।। वृषस्यपूर्वत्रिलवेखरा

श्वक्रमेलकादिप्रभवोहिमृत्युः ॥ ८ ॥ द्वितीयकेपित्तहुताशचौरैरुच्चस्थलाश्वादिभवस्तृतीये ॥ आद्येदृकाणेमिथुनेचवातश्वासैर्द्वितीयेवृषगोत्रिदोषैः ॥ ९ ॥ गजादितःपर्वतपाततोवाभवेदरण्येमिथुनांतदृक्के ॥ अपेयपानादपिकंटकाच्चस्वप्राच्यकर्कप्रथमेदृकाणे ॥ १० ॥ विषादिदोषादतिसारतोवा कर्कस्यमध्यत्रिलवेमृतिःस्यात् ॥ महाश्रमप्लीहकगुल्मदोषैःकर्कांत्यदृक्केनिधनंनिरुक्तम् ॥ ११ ॥ विषांबुरोगैःश्वसनांबुरोगैरपानपीडाविषशस्त्रकैश्च ॥ क्रमेणसिंहस्यदृकाणकेषुनूनंमुनींद्रैर्मरणंप्रदिष्टम् ॥ १२ ॥ कन्याद्यदृक्केऽनिलमौलिरुग्जोदुर्गाद्रिपाताच्चनृपैर्द्वितीये ॥ खरोष्ट्रशस्त्रांबुनिपातकांतानिमित्तजातंनिधनंतृतीये ॥ १३ ॥ तुलादृकाणेप्रथमेनिपातात्कलत्रतोवापशुतोऽपिमृत्युः ॥ नूनंद्वितीयेजठरामयैश्चव्यालाज्जलाच्चापिभवेत्तृतीये ॥ १४ ॥ पूर्वेदृकाणेखलुवृश्चिकस्यमृत्युर्विषान्नास्त्रभवोऽवगम्यः ॥भारश्रमाद्वाकटिबस्तिरोगैर्भवेद्द्वितीयेत्रिलवेतुमार्गे ॥ १५ ॥ जंघास्थिभंगाश्मकलोष्टकाष्ठैर्भवेत्तृतीयेत्रिलवेऽलिराशेः॥ आद्येदृकाणेधनुषोमृतिःस्यात्गुदामयैश्चाऽपिमरुद्विकारैः ॥ १६ ॥ विदाहतोवाविषतःशराद्वानाशोदृकाणेधनुषोद्वितीये॥ भवेज्जलाद्वाजलचारिणोवाक्रोडामयाद्वाधनुषस्तृतीये ॥ १७ ॥ पूर्वेदृकाणेमकरस्यसिंहाद्व्याघ्राद्वराहाद्वृकतोद्वितीये ॥ यादोभुजंगैश्चतथातृतीयेचोराग्निशस्त्रज्वरतोहिमृत्युः ॥ १८ ॥ कुंभस्यपूर्वत्रिलवेंबुपत्नीसुतोदरव्याधिकृतोद्वितीये ॥ गुह्यामयात्पर्वतघातनाद्वाविषात्तृतीयेमुखरुक्पशुभ्यः ॥१९ ॥ मीनाद्यदृक्केग्रहणीप्रमेहगुल्मांगनाभ्यश्चभवेद्द्वितीये ॥ जलोदराद्यैश्चगजग्रहैर्वाजलस्यमध्येऽपिचनौप्रभेदात् ॥ २० ॥ प्रांत्येदृकाणेपृथुरोमसंस्थेमृत्युःकुरोगैःपरिवेदितव्यः॥ एवंतदानींनिधनंनियुक्तंनैवग्रहंदृष्टगगनेचरेंद्रैः ॥ २१ ॥ पापांतरेशीतकरेकुमार्याशोपान्मृतिर्वारुधिरप्रकोपात् ॥ शुभांतरेशीतकरेऽष्टमस्थेपातेनपाशेनहुताशनेन ॥ २२ ॥ पापेक्षितौपापखगौत्रिकोणेयद्वाऽष्टमेबंधभुजंगपाशात् ॥ दृकाणकाःस्युर्जननेहियस्यकारागृहेस्यान्मरणंहितस्य ॥ २३ मीनोदयोऽर्केस्तगतेमृगांकेसपापकचास्फुजितिक्रियस्थे ॥ भार्याकृतंस्यान्मरणंस्वगेहेव

पीडितश्च ॥ पित्राजनन्यागताचित्तशुद्धिःस्याद्वृश्चिकस्थस्यरवेर्दशायाम् ॥ १४ ॥ कलत्रपुत्रद्राविणादिसौख्यंस्याद्वीरवंराजकुलाद्‌द्विजे
भ्यः ॥ संगीतशास्त्रागमसौख्यमुच्चैश्चापोपयातस्यरवेर्दशायाम् ॥ १५ ॥ जायात्मजद्रव्यसुखाल्पतास्यादनल्पपीडामयतोनितांतम् ॥
भवेत्पराधीनतयातिचिंतानक्रोपयातस्यरवेर्दशायां ॥ १६ ॥ हृद्रोगबाधासुतवित्तकांताचिंतापरान्नादिसुखंनकिंचित् ॥ शत्रूद्गमश्चाऽप्यतिदीनता
स्याद्‌घटादिरूढस्यरवेर्दशायाम् ॥ १७ ॥ स्त्रीवित्तसौख्योपचयःप्रतिष्ठाज्वरादिपीडाचसुतादिकानाम् ॥ वृथाटनत्वंननुमानवानांमीनेदिनेशस्यदशा
प्रवेशे ॥ १८ ॥ स्वोच्चस्थितस्याष्टमभावगस्यदशादिनेशस्यचदोषदास्यात् ॥ षष्ठस्थितस्यव्रणजातपीडांकरोतिबाधांचपितुर्जनन्याः ॥ १९ ॥
पूर्वंभवेत्सूर्यदशाप्रवेशःपित्रोश्चबाधाविविधातदानीम् ॥ लग्नाद्दशात्क्लेशाविशेषदात्रीनक्षत्रनाथस्यदशातिशस्ता ॥ २० ॥ इतिसूर्यदशाफलविचारः ॥ ॥
अथचंद्रदशाफलानि ॥ ॥ आरोहिणीचंद्रदशानराणांसर्वार्थसिद्ध्यैकथिताविशेषात् ॥ तथावरोहाकुरुतेविलंबंसर्वेषुकार्येषुचबुद्धिमांद्यम् ॥ १ ॥
नक्षत्रनाथस्यदशाप्रवेशेभवेन्नराणांमहतीप्रतिष्ठा ॥ मंत्रित्वमुच्चैर्नृपतेःप्रसादोभूदेवदेवार्चनताप्रवृद्धिः ॥ २ ॥ सन्मंत्रविद्याविविधाधनाप्तिर्नानाकलाकौश
लशालिताच ॥ गंधैस्तिलैश्चाऽपिफलैःप्रसूनैर्वृक्षैरलंबाद्द्रविणोपलब्धिः ॥ ३ ॥ ख्यातिःसुकीर्तिर्विनयाधिकत्वंपरोपकारायमतिर्यशश्च ॥ इतस्ततः
संचलनप्रियत्वंकन्याप्रजासंजननंमृदुत्वम् ॥ ४ ॥ जलस्यकर्मण्यतिसादरत्वमालस्यनिद्राकुलताक्षमाच ॥ कृष्यादिकर्माभिरुचिःशुचित्वंकफानिला
धिक्यमतीवसत्वम् ॥ ५ ॥ भवेद्विरोधःस्वजनेननूनंकलिप्रसंगोबहुजल्पताच ॥ चित्तस्थितिर्नैवचसाधुकार्येसामान्यतःकीर्तितमेतदत्र ॥ ६ ॥ मे
षेशशांकस्यदशाप्रवेशेयोषात्मजानंदभरोजनानाम् ॥ विदेशकर्माभिरतिर्व्ययःस्यात्क्रौर्यंशिरोरुक्सहजारिबाधा ॥ ७ ॥ उच्चाधिरूढस्यदशाज
डांशोःकुलानुसारंहिददातिराज्यं ॥ योषाविभूषात्मजगोतुरंगगजाप्तिसौख्योपचयंजयंच ॥ ८ ॥ मूलत्रिकोणाश्रितशीतरश्मेर्दशाविदेशाभिगमं

भ०

करोति ॥ कृषेःक्रयाद्विक्रयतोधनाप्तिःकफानिलाप्तिःस्वजनैर्विरोधम् ॥ ९ ॥ वृषस्यपूर्वार्द्धगतोहिमांशुःपापान्वितःसंजनयेज्जनन्याः ॥ मृत्युंपरार्द्धेज नकस्यसौम्यसंगंक्षणान्मृत्युसमानरोगम् ॥ १० ॥ द्वंद्वाधिसंस्थेंदुदशाप्रवेशेदेवद्विजार्चाधनभोगसौख्यम् ॥ स्थलांतरेसंचलनंकिलस्यात्सुखेनस म्यङ्मतिवैभवंच ॥ ११ ॥ कुलीरसंस्थस्यकलानिधेःस्यात्पाकेपशुद्रव्यकृषिप्रवृद्धिः ॥ कलाकलापाकलनंचशैलेवनेरुचिर्गुल्मगदप्रकोपः॥१२॥ कंठीरवस्थस्यनिशाकरस्यपाकेनरोऽर्थंलभतेचनित्यम् ॥ श्रेष्ठांप्रतिष्ठांविकलत्वमंगेऽनंगेऽपिहीनत्वमनुप्रयाति ॥ १३ ॥ कन्याश्रितेंदोश्चदशा प्रवेशेविदेशयानंवनितोपलब्धिः ॥ कलाकलापामलबुद्धिवृद्धिःस्वल्पार्थसिद्धिश्चभवेन्नराणाम् ॥ १४ ॥ कलानिधेस्तौलिगतस्यपाकेलोलंमनः स्याद्वनिताविषादः ॥ वादश्चकैश्चिद्धनहीनताचप्रोत्साहभंगःखलुनीचसंगः ॥ १५ ॥ नीचोपयातस्यविधोर्दशायांस्याद्व्याधिवृधिर्बहुधा नराणाम् ॥ वियोजनंवैस्वजनेननूनंमानाल्पताऽनल्पविकल्पचिंता ॥ १६ ॥ विमुक्तनीचोडुपतेर्दशायांभवेदवाप्तिःक्रयविक्रयाभ्याम् ॥ मर्म व्यथाधर्मविधानमल्पमल्पंचसख्यंजनमित्रवर्गैः ॥ १७ ॥ चापोपयातस्यचशीतरश्मेर्दशाप्रवेशेगजवाजिवृद्धिः पूर्वार्जितार्थोपहतिर्नितांतमन्यत्रसौ भाग्यसुखानिनूनं ॥ १८ ॥ हिमकरस्यदशामकरस्थितेःसुतसुखानिधनागमनानिच ॥ वितनुतेतनुतामनिलात्तनोरनुदिनंगमनागमनानिवै ॥ १९ ॥ क्रीडाचपीडाव्यसनानिनूनंस्युर्मानवानांतनुताशरीरे ॥ ऋणोपलब्धिश्चलतानितांतंदशाप्रवेशेकलशास्थितेंदोः ॥ २० ॥ वर्गो त्तमस्थस्यघटेहिमांशोर्दशाप्रवेशेबलिभिर्विरोधः ॥ कलत्रमित्रद्रविणात्मजाद्यैर्भवेद्वियोगोदशनास्यपीडा ॥ २१ ॥ मीनोपयातस्यचशीतभा नोर्दशाप्रवेशेहिजलोद्भवार्थः ॥ कलत्रपुत्रादिसुखानिनूनंशत्रुक्षयोबुद्धिविवृद्धिरुच्चैः ॥ २२ ॥ वर्गोत्तमस्थस्यझषेहिमांशोर्दशाप्रवेशेमहिषीगजाश्वा न्॥पुत्रादितोषंरिपुनाशमुच्चैर्लभेन्मनुष्योहियशोमनीषाम् ॥ २३ ॥ दशाप्रवेशेव्ययभावगेंदोःपापार्जितद्रव्यसमुद्गमःस्यात् ॥ क्षीणेरिपुस्थानगतोहिमां

शौसम्यक्फलंप्राग्गदितंवृथैव ।। २४ ।। नीचस्थितस्याऽष्टमभावगेंदोर्दशाप्रवेशेहिगदोद्गमः स्यात् ।। चेत्पापयुक्तोनिधनंतदानींजातिच्युतिंवालभतेमनु
ष्यः ।।२५।।इतिचंद्रदशाफलानि ।। अथभौमदशाफलानि ।। ।। ताराग्रहाःस्वोच्चगृहादिसंस्थावक्रास्तमानानुगतायदिस्युः ।। मिश्रंफलंतेनिजपाक
कालेयच्छंतिनूनंसुधियाविचिंत्यम् ।।१।।स्यात्पाकेक्षितिनंदनस्यचधनंशस्त्राच्चधात्रीपतेर्भैषज्याच्चचतुष्पदादपितथानानाविधैरुद्यमैः ।। पित्तासृक्ज्वरपी
डनंक्षितिपतेर्भीतिंचनीतिच्युतिंमुर्च्छाद्यंचनिजालयेकलिरितिप्रोक्तंफलंसूरिभिः ।।२।।मूलत्रिकोणोपगतस्यपाकेक्षोणीसुतस्यात्मजदारसौख्यम् ।।अर्थो
पलब्धिःखलुसाहसेनरणांगणेचारुयशोविशेषात्।। ३ ।।मेषोपयातस्यचभूसुतस्यस्युःपाककालेकिलमंगलानि।।स्यात्संततिःसाहसमाग्निबाधानानाविधारा
तिसमुद्भवःस्यात्।।४।।वृषस्थितस्याऽवनिनंदनस्यपाकप्रवेशेपुरुषःसहर्षः ।। अनल्पजल्पोगुरुदेवभक्तःपरोपकारादरतासमेतः।। ५ ।। युग्मस्थितेवीतनय
स्यपाकेप्रवासशीलोऽनिलपित्तकोपः।। बहुव्ययःस्यात्स्वजनैर्विरोधीनरःकलाज्ञोनितरांविधिज्ञः ।। ६ ।। कर्कस्थभौमस्यभवेद्दशायामुद्यानवन्हिप्रभवार्थं
युक्तः।। नरोहिदारासुतदूरवर्तीक्लेशोपलब्धेर्बलहीनमूर्तिः ।। ७ ।। संत्यक्तनीचांशकुजस्यपाकेख्यातःपुमान्सर्वगुणोपपन्नः ।। चतुष्पदाढ्योबलवा
नकस्मात्प्रजायतेगुह्यरुजाभिभूतः ।। ८ ।। सिंहाश्रितक्ष्मातनयस्यपाकेनूनंभवेन्नायकतावहूनाम् ।। कांतासुताद्यैश्चवियोगताचबाधातथाहितहुताशजा
ता।। ९ ।। कन्यानुयातावनिनंदनस्यपाकेसदाचारपरोनरःस्यात् ।। यज्ञक्रियायामपिसादरश्चदारात्मजार्वैधनधान्यसौख्यः ।। १० ।।तुलागतेलासु
तपाककालेस्याद्द्रव्यभार्यावियुतोहिमर्त्यः ।। चतुष्पदाभावकलिप्रसंगैर्हतोत्सवोवैविकलांगयष्टिः । ११ ।। पुमान्भवेद्वृश्चिकराशिगस्यभौमस्यपाके
कृषिकर्मकर्ता ।। सुसंग्रहेजातमनःप्रवृत्तिर्द्वेषीबहूनामतिजल्पकश्च ।। १२ ।। धनुर्धरस्थस्यधरासुतस्यपाकप्रवेशेद्विजदेवभक्तः ।। नरोनरेंद्राप्तमनो
रथः स्यात्कलिप्रसंगोपहतोत्सवश्च ।। १३ ।। वक्रस्यनक्रोपगतस्यपाकेराज्योपलब्धिःस्वकुलानुमानात् ।। युद्धेविवादेविजयोनितांतसद्रत्नचामीक

भ० रवाजिसौख्यम् ॥ १४ ॥ उच्चांशमुक्तस्यमहीसुतस्यपाके प्रयत्नात्खलुकार्यसिद्धिः ॥ शस्त्राद्दुर्वेच्छापदतोऽपिभीतिसंतोषजाल्पत्वमहाप्रयासाः ॥
० ॥ १५ ॥ आचारहीनाश्वसुतादिचिंताबहुव्ययोद्वेगसमाकुलत्वम् ॥ कुंभोपयातस्यचमंगलस्यस्यात्पाककालेफलमेतदेव ॥ १६ ॥ मीनो
पयातावनिनंदनस्यदशाप्रवेशेहिसुतादिचिंता ॥ व्ययामयत्वंचऋणोपलब्धिर्विचर्चिकाद्रद्रुविदेशवासाः ॥ १७ ॥ संग्रामसंप्राप्तजयाधिशा
लीबलान्वितोऽत्यंतगुणाभिरामः ॥वर्गोत्तमांशस्थितभूसुतस्यपाकेचनानाविधवस्तुलब्धिः ॥ १८ ॥ नीचांशसंस्थस्यकुजस्यपाकेवृथाऽटनत्वंम
नसोविषादः ॥ फलोन्मुखंकार्यमतीवदूरेनीचत्वमुच्चैर्विगताधिकत्वम् ॥ १९ मूलत्रिकोणोच्चगृहस्थितस्यकुजस्यकर्माधिगतस्यपाके ॥ राज्योपल
ब्धिर्विजयोरिपुभ्यःसद्वाहनालंकरणानिनूनम् ॥ २० ॥ इतिभौमदशाफलानि ॥ अथबुधदशाफलानि ॥ विद्याविवेकप्रभुतासमेतःकृषिक्रियायज्ञ
विधानाचित्तः ॥ महोद्यमादात्तधनश्चनूनंभवेन्मनुष्यःशशिजस्यपाके ॥ १ ॥ शिल्पादिकर्मण्यतिकौशलंस्यान्नित्योत्सवोत्कर्षविशेषएव ॥ सद्वा
द्यगीताभिरुचिर्नवीनसद्भांडभूषागृहनिर्मितत्वम् ॥ २ ॥ कुतूहलैर्भाषणहास्यहर्षैःकालक्रमत्वंविनयोपलब्धिः ॥ आचार्यविद्वद्गुरुसंमतत्वंकलत्रपुत्रा
दिसुखोपलब्धिः ॥ ३ ॥ पीडाऽपिगाढाकफवातपित्तैरसंचयोऽर्थस्यचसौम्यपाके ॥ बलाबलत्वंप्रविचार्यसर्वंशुभाशुभत्वंसुधियाविचिंत्यम् ॥ ४
॥ मेषस्थशीतद्युतिसूनुपाकेनैकत्रसंस्थानकरोनरःस्यात् ॥ स्तेयानृतद्यूतशठत्वयुक्तोविमुक्तसौजन्यविधिस्तुनिःस्वः ॥ ५ ॥ वृषाधिरूढस्यजडां
शुसूनोर्दशाप्रवेशेव्ययकृन्मनुष्यः॥ मातुस्त्वनिष्टश्चकलत्रपुत्रमित्रादिचिंतागलरुग्भयार्त्तः ॥६ ॥ द्वंद्वाधिसंस्थस्यबुधस्यपाकेत्वनेकवार्ताबहुजल्पक
र्त्ता ॥ दारात्मजज्ञातिसुखोपपन्नोनूनंजनन्याश्चसुखेनहीनः ॥ ७ ॥ कर्काश्रितस्येंदुसुतस्यपाकेविदेशवासाल्पसुखोविरोधी ॥ मित्रैश्चसत्काव्य
कलार्जितार्थोऽत्यर्थमनुष्योव्यवसाययुक्तः ॥८ सिंहस्थितस्येंदुसुतस्यपाकेलोलंभवेद्वैभवमेवधैर्यम् ॥ स्वमित्रदारात्मजसौख्यहानिःस्यान्मानवानांमति

हीनताच ॥ ९॥ उच्चांश्रितस्यैंदुसुतस्यपाकेस्यान्मानवोवैबहुवैभवाढ्यः ॥ लेखक्रियाकाव्यकलानुरक्तोजितारिपक्षश्चसुनीतियुक्तः ॥ १० ॥ मूलत्रि
कोणोपगतस्यपाकेविवेकविख्यातिगुणैःप्रपूर्णः ॥ विदेशयानानुरतोनरःस्यात्पराक्रमादाप्तधनोविधिज्ञः ॥ ११ । तुंगात्त्रिकोणक्रमणप्रकर्त्तुर्बुधस्य
पाकेपशुसौख्यहानिःस्वबंधुवैरंविकलत्वमंगेकलिप्रसंगेऽतिविहीनतास्यात्॥ १२ ॥ तुलागतस्यैंदुसुतस्यपाकेस्यात्क्षीणताहृङ्मतिवाग्विलासे ॥ शि
ल्पादिकर्मण्यतिनैपुणंचावाणिज्यतोऽर्थःपशुपीडनंच ॥ १३ ॥ पाकेभवेद्वृश्चिकसंस्थितस्यमृगांकसूनोर्मनुजोऽल्पतुष्टः ॥ आचारकर्मक्रमणानुरक्तो
व्ययेनयुक्तःस्वजनैर्वियुक्तः ॥ १४ ॥ शरासनाध्यासनतांगतस्यबुधस्यपाकेबहुनायकःस्यात् ॥ मंत्रीचनामद्वयतासमेतःकृषिक्रियावित्तयुतोमनुष्यः
॥ १५ ॥ मृगांकसूनोर्हिमृगस्थितस्यपाकेभवेद्भूरिऋणंनराणाम् ॥ बव्हाटनंवैकपटत्वमुच्चैर्नीचेश्चसख्यंमतिहीनताच ॥ १६ ॥ सौम्यस्यकुंभो
पगतस्यपाकेविहीनतेजामनुजोऽतिनिःस्वः ॥ मित्रादिपीडापरिपीडितात्माविदेशयानव्यसनानुरक्तः ॥ १७ ॥ नीचांशसंस्थस्यबुधस्यपाकेविवेक
सत्योपहितोहिमर्त्यः ॥ स्थानांतरस्थोव्यवसायशीलःस्यादल्पलाभःकृशकायकांतिः ॥ १८ ॥ इतिबुधदशाफलानि ॥ ॥ अथगुरुदशाफला
नि ॥ ॥ दशाप्रवेशेत्रिदशार्चितस्यभूपप्रधानाप्तमनोरथःस्यात् ॥ सत्कर्मधर्मागमशास्त्रवेत्ताभवेन्मनुष्यःसततंविनीतः ॥ १ ॥ यज्ञादिकर्मण्य
तिसादरत्वंभवेत्प्रवृत्तिर्द्विजदेवभक्तौ ॥ अत्यर्थमर्थोविभुताविशेषःपुत्रादितोषःपुरुषस्यनूनं ॥ २ ॥ भूम्यंबराश्वादिसुखोपलब्धिर्बलोपपन्नःकुलधूर्य
ताच ॥ गतागतागामिविचारणोच्चैःसत्संगतिश्चारुमतिर्धृतिश्च ॥ ३ ॥ दाहादिपीडापिगलेकदाचिद्विरुद्धभावस्थिततोविचिंत्यम् ॥ सामान्यमेतत्फ
लमुक्तमार्यैर्वक्ष्येऽधुनायत्प्रतिराशिसूक्तं ॥ ४ ॥ दशाप्रवेशेत्रिदशार्चितस्यमेषोपयातस्यभवेन्नराणाम् ॥ धनंधनेशाद्बहुनायकत्वंकलत्रपुत्रादिसुखो
पलब्धिः ॥ ५ ॥ वृषोपयातस्यचगीष्पतेःस्याद्दशाप्रवेशेपुरुषोऽतिदुःखी ॥ विदेशवासीबहसाहसश्चवित्ताल्पतावित्तगतोत्सवश्च ॥ ६ ॥ युग्मे

पयातस्यबृहस्पतेश्चदशाप्रवेशेपुरुषोशुचिःस्यात् ॥ मात्राचगोत्रप्रभवैर्विरोधीकलत्रवादातिविषादततः ॥ ७ ॥ वाचस्पतेरुच्चसमाश्रितस्यस्यात्पाक
कालेकुलराज्यलब्धिः ॥ विशिष्टनाम्नाप्रथितत्वमुच्चैरुच्चैश्चसख्यंबहुवैभवंच ॥ ८ ॥ वाचांपतेरुच्चसमुत्थितस्यपाकप्रवेशेपितृमातृदुःखी ॥ पूर्वार्जि
तद्रव्यपरिक्षयेनतप्तश्चनानाव्यसनाभिभूतः ॥ ९ ॥ सिंहस्थितस्याऽमरपूजितस्यपाकप्रवेशेधनवान्वदान्यः ॥ नृपाप्तमानोननुमानवःस्याज्जायातनूजा
नुजजातहर्षः ॥ १० ॥ कन्याधिरूढस्यगुरोर्दशायांभवेन्मनुष्योनृपलब्धमानः ॥ कांतासुतावाप्तसुखःकदाचिच्छूद्रादिनीचैःकलहप्रसक्तः॥११॥
तुलास्थदंभोलिभृदीड्यपाकेविवेकहीनःप्रमितान्नभोक्ता ॥ कलत्रपुत्रैःकृतशत्रुभावश्चोत्साहहीनोननुमानवःस्यात् ॥ १२ ॥ बृहस्पतेर्वृश्चिकराशिगस्य
दशाप्रवेशेमतिमान्समर्थः ॥ प्राज्ञःसुतोत्साहयुतोविनीतोऽनृणीभवेन्नानियमेनहीनः ॥ १३ ॥ मूलत्रिकोणांशगतस्यपाकेगुरोर्दशायांमतिमान्मनुष्यः॥
स्यान्मांडलीकोयदिवाप्रधानःपित्रान्वितःस्त्रीवचनानुसक्तः ॥ १४ ॥ नखांशकेभ्यःपरतश्चचापेसंस्थस्यदेवेंद्रगुरोर्दशायाम् ॥ कृषिक्रियायज्ञच
तुष्पदेषुभवेन्मनुष्यस्यमनःप्रवृत्तिः ॥ १५ ॥ नीचांशसंस्थस्यमृगान्वितस्यगुरोर्दशायांपरकर्मकर्त्ता ॥ मर्त्योभवेज्जाठरगुल्मरोगीसार्द्धवियोगीधनबं
धुभिश्च ॥ १६ ॥ वाचस्पतेर्नीचलवोर्जितस्यपाकेनिषादात्कृषितोधनातिः ॥ भूमीरुहेभ्योजनवंचनाद्वाक्लेशोपलब्धिर्ननुमानवस्य ॥ १७ ॥
पाकप्रवेशेकलशास्थितस्यवाचामधीशस्यनरःकलाज्ञः ॥ विद्याप्रसादार्थमहामतिःस्यात्कांताविलासानुरतोनितांतम् ॥ १८ ॥ झषोपयातस्य
चगीष्पतेस्याद्दशाप्रवेशेपुरुषोमनीषी ॥ सन्मानसूनुप्रमदादिसंपद्राज्ञान्वयोपात्तमहासुखश्च ॥ १९ ॥ इतिगुरुदशफलानि ॥
अथशुक्रदशाफलानि ॥ ॥दैत्यामात्यःस्वीयपाकप्रवेशेयोषाभूषारत्नवस्त्रोपलब्धिम् ॥ नानामानंमानवनांप्रकुर्यात्कंदर्पस्याभ्युद्गमात्सौख्यमुच्चैः
॥ १ ॥ गीतेनृत्येऽत्यंतसंजातहर्षोविद्याभ्यासप्रीतिकृच्चारुशीलः ॥ बुद्ध्याधिक्यश्चान्नदानप्रवृत्तिर्दक्षोमर्त्योविक्रयेवाक्रयेवा ॥ २ ॥ गोवाह

नेभ्योननुनंदनेभ्यःसौख्यंभवेन्नंदननंदनेभ्यः ॥ पूर्वार्जितस्यद्रविणस्यलब्धिःकालिःकुलेस्यात्चलनात्स्थलाद्य ॥ ३ ॥ कफानिलाभ्यांकिलानि
बलंस्यात्कलेवरंनीचतरैश्चवैरम् ॥ मित्रादिचिंतापरितप्तमेवचित्तंचसख्यंकुजनैःकदाचित् ॥ ४ ॥ सामान्यतःप्रोक्तमिदंसितस्यदशाफलंपूर्वं
मुनिप्रणीतं ॥ अथोच्यतेऽत्रप्रतिराशिजातंफलंप्रयोज्यंबलतारतम्यात् ॥ ५ ॥ शुक्रस्यपाकेक्रियसंस्थितस्यस्त्रीवित्तसौख्यापचयोनराणांम् ॥
सदाऽटनत्वंव्यसनानिनूनमुद्वेगताचंचलचित्तवृत्तिः ॥ ६ ॥ वृषोपयातोशनसोदशायांकृषिक्रियासत्पशुसौख्यवृद्धिः ॥ शास्त्रेमतिःस्यात्सुत
रांविचित्रादात्त्वकन्याजननप्रसादाः ॥ ७ ॥ युग्मगामिभृगुजस्यदशायांमानुषोभवतिकाव्यकलाज्ञः ॥ हास्यविस्मयकथारुचिरुच्चैरन्यदेश
गमनोत्सुकचित्तः ॥ ८ ॥ कर्कोपयातस्यसितस्यपाकेभवेन्मनुष्योनिजकार्यदक्षः ॥ भार्यातारवाप्तिसमुत्सुकोऽपिनानाप्रकारोद्यमकृत्कृतज्ञः
॥ ९ ॥ दैत्येंद्रवंद्यस्यमृगेंद्रगस्यपाकप्रवेशोवनितप्तवित्तः ॥ नूनंभवेदन्यधनोपजीवीपश्चादिपुत्राल्पसुखोमनुष्यः ॥ १० ॥ पाकेभवेद्दानदवं
दितस्यकन्यास्थितस्याऽपचयःसुखानाम् ॥ वित्ताल्पताभग्नमनोरथत्वंलोलंमनःस्वस्थलतश्चलत्वम् ॥ ११ ॥ तुलाधरस्थासुरपूजितस्यदशा
प्रवेशेकृषिकृन्मनुष्यः ॥ विशिष्टमानोधनवाहनाढ्यःस्वज्ञातिसंप्राप्तमहासुखःस्यात् ॥ १२ ॥ भवेद्भृगोर्वृश्चिकराशिगस्यदशाप्रवेशेपुरुषःप्रवा
सी ॥ परस्यकार्येनिरतःप्रतापीऋणार्थयुक्तःकलहानुरक्तः ॥ १३ ॥ चापोपयातासुरपूजितस्यपाकेप्रकामंनृपतेःप्रतिष्ठा ॥ कलाकलापाकल
नंकिलस्यात्क्लेशाधिकत्वंद्विषतांप्रवृद्धिः ॥ १४ ॥ नक्रस्थशुक्रस्यदशाप्रवेशेस्यात्पूरुषःशत्रुविनाशदक्षः ॥ श्लेष्मानिलाभ्यांविबलःकदाचि
त्कुटुंबचिंतासहितःसहिष्णुः ॥ १५ ॥ उशनसःकलशस्थितिकारिणोयदिदशापुरुषोव्यसनाकुलः ॥ गदयुतोवियुतःशुभकर्मणाव्रतहतोप्य
नृतोक्तिरतोभवेत् ॥ १६ ॥ दशाप्रवेशेभृगुनंदनस्यमीनाधिसंस्थस्यनृपप्रधानः ॥ स्यान्मानवाऽत्यंतधनप्रसन्नःकृषिक्रियाभोगभरोपपन्नः ॥ १७

स्वोच्चांशभाजोभृगुजस्यपाकेविलग्नकर्मोपगतस्यमर्त्यः ॥ क्षोणीहिरण्योत्तमवारणाद्यैर्युतोभवेद्वैनिजवंशनाथः ॥ १८ ॥ इतिशुक्रदशाफलानी ॥
अथशनिदशाफलानि ॥ ॥ भवेद्दशायांहिशनैश्चरस्यनरःपुरग्रामकृताधिकारः ॥ धीमांश्चदानाधिकताधिशालीनानाकलाकौशलसंयुतश्च ॥ १
तुरंगहेमांबरकुंजराद्यैःसंपन्नतांयातिविनीततांच ॥ देवद्विजार्चाभिरतोविशेषात्पुरातनस्थानकलब्धसौख्यः ॥ २ ॥ देवद्विजेंद्रालयकृत्सुशीलो
विशालकीर्त्तिःस्वकुलावतंसः ॥ आलस्यनिद्राकफवातपित्तज्वरांगनाद्रद्रुविचर्चिकार्तः ॥ ३ ॥ सामान्यमेतत्फलमुक्तमत्रशनेर्दशायांगदितंहिपूर्वैः
॥ अथाभिधास्येप्रतिराशिजातंफलंसुधीभिर्बलतोविचिंत्यम् ॥४ ॥ मेषोपयातस्यशनैश्चरस्यदशाप्रवेशेपुरुषोविशेषात् ॥ क्लेशाभिभूतःपतनाप्तदुःखोविच
र्चिकाद्यामयतःकृशांगः ॥ ५ ॥ वृषोपयातस्यदिनेशसूनोःपाकप्रवेशेमतिमान्मनुष्यः ॥ नरेंद्रसन्मानविराजमानःसंग्रामसंप्राप्तयशोविशेषः ॥६॥
शनेर्दशायांमिथुनाश्रितस्यनरोभवेच्चारुविलासशीलः ॥ चौराच्चदारादिजनाद्धनाप्तिरणप्रसंगाच्चपरोपकारी ॥ ७ ॥ कर्कस्थितार्कात्मजपाकका
लेलोलंमनःपुत्रकलत्रमित्रैः ॥ श्रोत्रेचनेत्रेपरिपीडनंस्यात्कलेवरंनिर्बलतांप्रयाति ॥ ८ ॥ पंचाननस्थस्यशनेर्दशायांबाधाभवेद्वैविविधानराणाम् ॥
दारात्मजाद्यैःकलहप्रसंगस्तुरंगगोदासजनेष्वसौख्यम् ॥ ९ ॥ कन्योपयातस्यशनेर्दशायांभवेत्क्रमेणद्रविणोपलब्धिः ॥ जलाच्चभूमीरुहतस्तथो
चप्रदेशतश्चापिमहाप्रमोदः ॥ १० ॥ कालेदशायांनलिनीशसूनोस्तुलागतस्योत्तमराज्यलक्ष्मीः ॥ गजाश्वहेमांबररत्नपूर्णाभवेन्नराणांकरुणाधिकत्व
म् ॥ ११ ॥ सरीसृपस्थस्यशनैश्चरस्यपाकेनरःसाहसकर्मयुक्तः ॥ वृथाटनोवैकृपणोऽनृतश्चनीचानुरक्तश्चदयाविहीनः ॥ १२ ॥ धनुर्धरस्थस्य
शनैश्चरस्यपाकेनरःस्यात्सचिवोनृपाणाम् ॥ संग्रामधीरश्चतुरंघ्रियुक्तःकांतासुतानंदविनोदयुक्तः ॥ १३ ॥ शनेर्दशायांमकराश्रितस्यबहुश्रमोत्पन्न
धनंनराणाम् ॥ नपुंसकस्त्रीजनसेवनत्वंविश्वासघातेनधनक्षतिश्च ॥ १४ ॥ शनेर्दशायांकलशाश्रितस्यसुखानिनूनंमहतीप्रतिष्ठा ॥ श्रेष्ठत्वमुच्चैःस्व

कुलैर्नरस्यकृषिक्रियापुत्रधनादिलब्धिः ॥ १५ ॥ भवेद्दशायांननुभानुसूनोर्मीनोपयातस्यचमानवस्य ॥ नानापुरग्रामधनांगनाभ्यःसुखंतथो
त्साहविहीनताच ॥ १६ ॥ इतिश्रीजातकाभरणेशनिदशाफलानि ॥ ॥ अथमहादशाफलानि ॥ दशाद्दकाणैश्चतनोःक्रमेणस्या
दुत्तमामध्यमताऽधमाच ॥ स्थिरेचकष्टाशुभदाचमध्यामिश्रेऽधमामध्यतमोत्तमाच ॥ १ ॥ शुभानिमध्यानिचनिंदितानिफलानिलग्नेशदशोदि
तानि ॥ तान्येवकल्प्यानिसुधीभिरत्रबलानुमानात्तनुनायकस्य ॥ २ ॥ संशालतेयःकिलदिग्बलेनखेटःस्वकाष्ठांपुरुषंचनीत्वा ॥ महाप्रति
ष्ठांकुरुतेदशायांनानाधनाभ्यागमनानिनूनं ॥ ३ ॥विलोमगामिग्रहपाककालेस्थानार्थसौख्यान्यतिचंचलानि ॥ प्रवासशीलत्वमतीवजंतोर्लोकेम
हत्वापचयात्वमेव ॥ ४ ॥ ऋजुप्रयातस्युचरस्यपाकेसन्मानसौख्यार्थयशःप्रवृद्धिः ॥ षष्ठाष्टमद्वादशवर्जितस्यग्रहस्यपाकेऽभिमतार्थसिद्धिः ॥ ५
नीचारिभस्थस्यचवक्रिणोवापाकेकुकर्माभिरातिर्मनुष्यः ॥ विदेशवासीनिजबंधुवर्गैस्त्यक्तोभवेदाग्रहताभियुक्तः ॥ ६ ॥ स्वर्भानुयुक्तस्यचखेच
रस्यदशावरिष्ठाप्यतिरिष्टदास्यात् ॥ पाकावसानेननुमानवानांदुःखानिहानिश्चविदेशयानम् ॥ ७ ॥ जननराशिजनुस्तनुनाथयोरिपुदशासमयेमति
विभ्रमः ॥ भयमरेरपिराज्यपरिच्युतिःखलजनैःकलहोबलहीनता ॥ ८ ॥ लग्नेश्वरस्याऽष्टमभावगस्यभवेद्दशायामतिपीडनंहि ॥ दशाव
सानेऽपिचमानवानांभवेत्समाप्तिःखलुजीवितस्य ॥ ९ ॥ क्रूराख्यखेटस्यदशांतरालेक्रूरग्रहस्यांतरजादशाचेत् ॥ शत्रुद्रुमोऽर्थस्यपरिक्षयःस्या
दायुःक्षयोवेतिवदेन्नराणाम् ॥ १० ॥ दशाप्रवेशेऽपिखगाःसलग्नाःकार्याःस्फुटास्तत्रदशापतिश्चेत् ॥ लग्न१त्रि३खा१०या११रि६गतोऽथल
ग्नेतान्मित्रवर्गःशुभदादशासा ॥ ११ ॥ श्रेष्ठापदिष्टेष्टफलाधिकस्यदुष्टादशाकष्टफलाधिकस्य ॥ यस्येष्टकष्टेभवतःसमानेफलंविमिश्रंकिलतस्य
पाके ॥ १२ ॥ दशाप्रवेशेखचरःस्वतुंगेमूलत्रिकोणेयदिवास्वगेहे ॥ शुभेष्टवर्गास्थितिकृच्छुभैष्टैरिष्टदशारिष्टहरोभवेत्सः ॥ १३ ॥ इ

तिश्रीजातकाभरणेमहादशाफलानि ॥ ॥ अथांतर्दशाफलम् ॥ ॥ अथप्रवक्ष्येखलुखेचराणामंतर्दशाःसूक्ष्मफलप्रसिद्ध्यै ॥ विचा
रपूर्वंसदसत्प्रकल्प्यंफलंसुधीभिर्विधिनोदितेन ॥ १ ॥ अंतर्दशाचेदशुभग्रहाणामेकर्क्षगानांकुरुतेसदैव ॥ गदंविवादंरिपुभूपभीतिंदैन्यंधनस्यापच
यंविशेषात् ॥ २ ॥ अंतर्दशायांमदनस्थितस्यखेचारिणःस्यान्मरणंगृहिण्याः ॥ रोगःकुभोगःकलहादिभंगःसंगश्चनिंद्यैर्हरणंधनस्य ॥ ३ ॥ खे
चारिणामष्टमभावगानामंतर्दशासंजनयेदरिष्टम् ॥ धनस्यनाशंव्यसनानिपुंसांषष्ठोपगस्याऽपिगदप्रवृद्धिं ॥ ४ ॥ त्रिकोणमेषूरणवेश्मगानामंतर्दशासौ
ख्यमतीवनित्यम् ॥ करोतिलाभंविविधंनराणामारोग्यतांमानसमुन्नतिंच ॥ ५ ॥ ॥ अथसूर्यांतर्दशाफलानि ॥ ॥ करोतिचंद्रस्त
रणेर्दशायांसुवर्णभूषांबरविद्रुमाप्तिं ॥ समुन्नतिंमानसुखाभिवृद्धिंविरोधिवर्गाग्रचयंजयंच ॥ १ ॥ पंकेरुहेशस्यचरन्विपाकेकुर्यान्मृगांकोयदिलाभमु
च्चैः ॥ प्रमादमदभ्योग्रहणींचपांडुकेषांचिदेतन्मतमत्रचोक्तम् ॥ २ ॥ सत्प्रवालकलधौतसुचैलंमंगलानिविजयंचविधत्ते ॥ मंगलःकमलिनीश
दशायांभूमिपालकुलतःकिलमानम् ॥ ३ ॥ विचर्चिकादद्रुविकारपूर्वैःपामामयैर्देहानिपीडनंस्यात् ॥ धनव्ययश्चाऽपिहतोत्सवश्चविधोःसुतेभानुदशां
प्रयाते ॥ ४ ॥ सद्वस्त्रधान्यादिषुसंग्रहेच्छास्वच्छामतिर्विप्रसुरार्चनेषु ॥ भूषाप्तसन्मानधनानिनूनंभानोर्दशायांचरतींद्रवंद्ये ॥ ५ ॥ विदेशयानंकल
हाकुलत्वंशूलंचमौलिस्थलकर्णपीडाम् ॥ गाढज्वरंचापिकरोतिनित्यंदैत्यार्चितोभानुदशांप्रयातः ॥ ६ ॥ नीचारिभूमीपतिभीतिरुच्चैःकंडूयनाद्याम
यसंभवःस्यात् ॥ मित्राण्यमित्राणिभवंतिनूनंशनैश्चरेभानुदशांतरस्थे ॥ ७ ॥ इतिसूर्यांतर्दशाफलानि ॥ ॥ अथचंद्रांतर्दशाफलानि
नरेश्वराद्गौरवमर्थलाभंक्षयामयार्तिंप्रकृतेर्विकारम् ॥ चौराग्निवैरिप्रभवंचभीतिंशीतांशुपाकेकुरुतेदिनेशः ॥ १ ॥ कोशभ्रंशंरक्तपित्तादिदोषं
रोपोत्पत्तिंस्थानतःप्रच्युतिंच ॥ कुर्यात्पीडांमातृपित्रादिवर्गेभूमीसूनुर्यामिनीनाथपाके ॥ २ ॥ उदारनामांतरलब्धिमुच्चैर्ललामगोभूमिगजाश्ववृद्धिं ॥

विद्याधनैश्वर्यसमुन्नतत्वंकुर्यादबुधश्चंद्रदशांतराले ॥ ३ ॥ विशिष्टधर्मोधनधान्यभोगानंदाभिवृद्धिर्गजवाजिसंपत् ॥ पुत्रोत्सवश्चापिभवेन्नराणांगुरोसुराणांशशिपाकसंस्थे ॥ ४ ॥ नानांगनाकेलिविलासशीलोजलोद्भवैर्धान्यधनैश्चयुक्तः ॥ मुक्ताफलाद्याभरणैरपिस्यादिंदोर्दशायांहिसितेमनुष्यः ॥ ५ ॥ नरेंद्रचौराहितवन्हिभीतिंकलत्रपुत्रासुखरुक्प्रवृद्धिम् ॥ करोतिनानाव्यसनानिपुंसांशनिर्निशानाथदशांप्रविष्टः ॥ ६ ॥ इतिचंद्रांतर्दशाफलं ॥ अथभौमांतर्दशाफलानि ॥ ॥ नानाधनाभ्यागमनानिनूनंसन्मानवृद्धिंमनुजाधिराजात् ॥ चंडत्वमाजौविजयंविदध्यात्भानुर्धरासूनुदशांतरस्थः ॥ १ ॥ दुर्गशैलवनसंचलनेच्छोबंधुतातजनितातिविरोधः ॥ मानवोभवतिभूतनयांतर्भास्करेचरतिकेपिवदंति ॥ २ ॥ नित्योत्सवानंदमहापदानिमुक्ताफलद्रव्यविभूषणानि ॥ मित्रोद्गमंश्लेष्मविकारमिंदुर्भौमस्यपाकेविचरन्करोति ॥ ३ ॥ अरातिभूपामयतस्करेभ्यःपीडांवियोगंसुतदारमित्रैः ॥ स्वल्पोत्सवंयच्छतिचंद्रसूनुर्भौमस्यपाकेयदिसंप्रविष्टः ॥ ४ ॥ कलाधिकत्वंनृपतेर्धनाप्तिंकलत्रमित्रात्मजवाहसौख्यम् ॥ सत्कर्मधर्मानुरतत्वमुच्चैर्बृहस्पतिर्भौमदशांप्रविष्टः ॥ ५ ॥ विदेशयानव्यसनामयाद्यैःकुटुंबवादद्रविणव्ययैश्च ॥ नानाप्रवासैश्चलचित्तवृत्तिर्भौमांतरेदानवराजपूज्ये ॥ ६ ॥ कलत्रपुत्रात्मजनेषुबाधाप्राणप्रयाणांतशरीरपीडा ॥ स्वस्थानयानंयदिभानुसूनोरंतर्दशाभौमदशांतराले ॥ ७ ॥ इतिभौमांतर्दशाफलम् ॥

॥ अथबुधांतर्दशाफलम् ॥ तुरंगहेम्नांचसुविद्रुमाणांसदंबराणामपिवारणानाम् ॥ भवेदवाप्तिर्बहुवैभवानांसौम्यस्यपाकेतपनेप्रपन्ने ॥ १ ॥ स्वस्थानतःसंचलनंकदाचिद्रुद्रप्रकोपात्प्रजजन्मवित्तम् ॥ धर्मप्रवृत्तिंकुरुतेज्ञपाकेपंकेरुहेशःप्रवदंतिकेचित् ॥ २ ॥ पामादिनानामयसंभवःस्यान्मृतप्रजासंजननंविवादः ॥ पित्तप्रकोपःखलुयानपीडायदाज्ञडांशुर्ज्ञदशांप्रपन्नः ॥ ३ ॥ गुह्यामयार्थव्ययसंयुतःस्यात्कांतासुतप्रीतिविमुक्तचित्तः ॥ विलुप्तधर्मोमनुजःप्रविष्टेबुधस्यमध्येवसुधातनूजे ॥ ४ ॥ कांतासुतानंदयुतोऽरिहंतासत्कर्मकृच्चारुमातिर्विनीतः ॥ मंत्रीनरःस्यात्पितृमातृदुःखीबृहस्पतौसौम्यदशां

प्रयाते ।। ५ ।। विबुधसाधुजनातिथिसादरः सुकृतकर्मसमुत्सुकमानसः ।। विविधवस्त्रविभूषणभाङ्नरोबुधदशांतरगेसतिभार्गवे ।। ६ ।। नानाप्र
यासैश्चनिरोधनैर्वाशिरोरुजावापिशरीरभाजाम् ।। करोतिबाधांविबुधांतरालेसितःप्रयातःप्रवदंतिकेचित् ।। ७ ।। सत्कर्मधर्मद्रविणानुकंपाकंदर्पहीनो
मनुजःप्रलापी ।। वातामयार्तोऽतिमृदुस्वभावःसौम्यांतरालेनलिनीशसूनौ ।। ८ ।। इतिबुधांतर्दशाफलम् ॥ ।। अथगुर्वंतर्दशाफलानि ।। ।। सु
तार्थनानाविधवस्तुलाभंविशिष्टनामांतरमाधिपत्यम् ।। मानंनरेशात्कुरुतेदिनेशोवाचामधीशस्यदशांप्रपन्नः ।। १ ।। नानांगनाक्रीडनजाताचित्तःश्री
राजाचिन्हैश्चविराजमानः ।। विद्यानविद्यार्थयुतोनरःस्यात्जीवांतरेशीतकरप्रचारे ।। २ ।। रणांगणप्राप्तयशोविशेषःसद्भोगसौख्यार्थसमन्वितश्च ।।
प्रौढप्रतापोऽतितरांनरः स्यात्धरासुतेजीवदशांप्रयाते ।। ३ ।। शीर्षेगुदेवापिभवेत्कदाचित्पीडानराणामरिभीतिरुक्ता ।। बलक्षयःसंचलनंकुजस्य
जीवांतरालेप्रवदंतिकेचित् ।। ४ ।। सद्बुद्धिकौशल्यसुरार्चनानिसदिंदिरामंदिरवाहनानि ।। कलत्रपुत्रादिसुखानिनूनंकुर्याद्बुधेजीवदशांप्रपन्नः
५।। विदेशयानंचलचित्तवृत्तिर्जलात्प्रमादःशिरसिप्रपीडा ।। गुरोर्दशायांचरतींदुपुत्रेकेषांचिदेवात्रमतंनिरुक्तम् ।। ६ ।। निर्जीवियोगोऽर्थविनाशनंच
श्लेष्मानिलश्चाऽपिकलिप्रसंगः ।। स्यान्मानवानांव्यसनोपलब्धिर्भृगौःसुतेजीवदशांप्रयाते ।। ७ ।।धर्मक्रियायांनिरतत्वमुच्चैर्विद्यांबरान्नादिकसंग्रहश्च
।। द्विजाश्रयःस्याद्गुरुपाकयातेसितेवदंतीतिफलंतुकेचित् ।। ८ ।। वेश्यासवद्यूतकृषिक्रियाद्यैर्विलुप्तधर्मार्थयशाःकृशांगः ।। खरक्रमेलादियुतोनरः
स्याद्गुरोर्दशायांचलितेऽर्कसूनौ ।। ९ ।। इतिगुर्वंतर्दशाफलानि ।। ।। अथशुक्रांतर्दशाफलानि ।। ।। भूपभीतिरपिबंधुनिर्मितंवित्त
नाशनमरात्युदयःस्यात् ।। क्रोडगंडनयनेष्वपिपीडाभार्गवेयदिरवेर्विनिवेषः ।। १ ।। शीर्षदंतनखपीडनमुच्चैःकामलप्रबलताकिलपित्तम् ।।
श्वापदादपिभयंचनराणांभार्गवांतरगतेहिमरश्मौ ।। २ ।। भूदेवदेवाग्निमनःप्रवृत्तिरणांगणेस्याद्विजयोनराणाम ।। मातंगकार्याद्वनिताश्रयाद्वाला

भः सितेचंद्रदशेतिकेचित् ॥ ३ ॥ पित्ताक्षताद्रक्तविकारतोवावैकल्यमंगेप्रभवेन्नराणाम् ॥ उत्साहहीनत्वमतीवयातेभूमीसुतेदैत्यगुरोर्दशायाम्
॥ ४ ॥ सन्माननानाविधवस्तुसौख्यंभूमीपतेःस्यात्खलुभूमिलाभः ॥ अंगारकेभार्गवपाकसंस्थेकेषांचिदेवंमतमस्तिशस्तम् ॥ ५ ॥ वृक्षैः
फलैश्चाऽपिचतुष्पदाद्यैर्वित्तंभवेत्सख्यविधिर्नृपेण ॥ दुरंतकार्याभिरतिर्नितांतंभृगोर्दशायांचरतींदुसूनौ ॥ ६ ॥ यज्ञादिसत्कर्मणिसादरत्वंगतार्थसि
द्धिःसुतदारसौख्यम् ॥ महापदानेकविभूषणाप्तिर्भृगोर्दशायांचरतींद्रवंद्ये ॥ ७ ॥ मित्रोन्नतिर्ग्रामपुराधिपत्यंवृद्धांगनाकेलिरतीवनित्यम् ॥ स्या
द्वैरिनाशोत्युशनोदशायांशनैश्चरस्यांतरजादशाचेत् ॥ ८ इतिशुक्रांतर्दशाफलानि ॥ ॥ अथमंदांतर्दशाफलम् ॥ ॥ धनांगना
नंदनबंधुपीडागाढापिबाधात्मकलेवरेस्यात् ॥ रिपूद्गमःसंचलनंनलिन्याःपत्यौस्थितेमंददशांतराले ॥ १ ॥ नित्यंकलिर्बंधुजनैर्वियोगोल्हातिर्मृतिर्वापि
भवेद्गृहिण्याः ॥ उत्साहसौख्योपहतिर्नितांतंशीतद्युतौमंददशांतराले ॥ २ ॥ स्वस्थानयानंविकलत्वमंगेधनांगनासूनुवियोजनंस्यात् ॥ सन्मान
हानिर्नुसूर्यसुनोर्दशांतरेभूमिसुतप्रचारे ॥ ३ ॥ धनांगनासूनुसुखोपपन्नःसद्राजमानेनविराजमानः ॥ विद्वज्जनानंदकरःकफार्तोमर्त्योभवेज्ज्ञेश
निराकसंस्थे ॥ ४ ॥ कलाकलापेकुशलोविलासीपद्मालयालंकृतचारुशीलः ॥ भूपालभूलाभयुतोनरःस्याद्बृहस्पतौमंददशांप्रयाते ॥ ५ ॥
योषाविभूषासुतसौख्यलब्धिःश्रीग्रामदेशाधिकृतत्वमुच्चैः ॥ यशःप्रकाशोऽरिकुलस्यनाशःशनेर्दशायामुशनःप्रवेशे ॥ ६ ॥ अंतर्दशाचेन्नलिनी
शसूनोर्दशांतरालेकिलमंगलस्य ॥ भवेत्तदानींनिधनंनराणांयद्यप्यहोदीर्घमवाप्तमायुः ॥ ७ ॥ लग्ननाथरिपुर्लग्नदशायांप्रविशेद्यदि ॥ अकस्मान्मर
णंकुर्यात्प्राणिनांसत्यसंमतम् ॥ ८ ॥ इतिशन्यंतर्दशाफलानि ॥ ॥ इतिश्रीजातकाभरणेअंतर्दशाध्यायः ॥

॥ अथदानाध्यायः ॥ ॥ येखेचरागोचरतोऽष्टवर्गाद्दशाक्रमाद्वाप्यशुभाभवंति ॥ दानादिनातेसुतरांप्रसन्नास्तेनाऽधुनादानविधिंप्रवच्मि ॥१॥

माणिक्यगोधूमसवत्सधेनुःकौसुंभवासोगुडहेमताम्रम् ।। आरक्तकंचंदनमंबुजंचवदंतिदानंहिविरोचनाय ।। २ ।। सद्वंशपात्रस्थिततंडुलांश्चकर्पूर
मुक्ताफलशुभ्रवस्त्रम् ।। युगोपयुक्तंवृषभंचरौप्यंचंद्रायदद्याद्घृतपूर्णकुंभम् ।। ३ ।। प्रवालगोधूममसूरिकाश्चवृषोऽरुणश्चापिगुडःसुवर्णम् ।। आर
क्तवस्त्रंकरवीरपुष्पंताम्रंहिभौमायवदंतिदानम् ।। ४ ।। चैलंचनीलंकलधौतकांस्यंमुद्गाज्यगारुत्मकसर्वपुष्पम् ।। दासीचदंतोद्विरदस्यनूनंवदंतिदानं
विधुनंदनाय ।। ५ ।। शर्कराचरजनीतुरंगमःपीतधान्यमपिपीतमंबरम् ।। पुष्परागलवणेचकांचनंप्रीतयेसुरगुरोःप्रदीयताम् ।। ६ ।। चित्रांबरंशु
भ्रतरस्तुरंगोधेनुश्चवज्रंरजतंसुवर्णं ।। सुतंडुलाज्योत्तमगंधयुक्तंवदंतिदानंभृगुनंदनाय ।। ७ ।। माषांश्चतैलंविमलेंद्रनीलास्तिलाःकुलित्थामहिषीच
लोहम् ।। सदक्षिणंचेतिवदंतिनूनंदुष्टायदानंरविनंदनाय ।। ८ ।। गोमेदरत्नंचतुरंगमश्चसुनीलचैलानिचकंबलश्च ।। तिलाश्चतैलंखलुलोहमिश्रंस्व
र्भानवेदानमिदंवदंति ।। ९ ।। वैडूर्यरत्नंसतिलंचतैलंसुकंबलश्चापिमदोमृगस्य ।। शस्त्रंचकेतोःपरितोषहेतोरुदीरितंदानमिदंमुनींद्रैः ।। १० ।।
इतिश्रीजातकाभरणेदानाध्यायः ।। ।। अथनष्टजातकाध्यायः ।। ।। आधानकालोऽप्यथजन्मकालोनज्ञायतेयस्यनरस्यनूनं ।। प्रसूतिकालं
प्रवदंतितस्यनष्टाभिधानादपिजातकाच्च ।। १ ।। तज्जातकंयेनशुभाशुभाप्तिर्जातस्यजंतोर्जननोपकालात् ।। तस्मिन्प्रनष्टेसतिजन्मकालेयेनोच्यतेनष्ट
कजातकंतत् ।। २ ।। मेषादितःप्रश्नविलग्नलिप्ताःकार्याःक्रमात्तामुनिभिःखचंद्रैः ।। गजैश्चवेदैर्दशभिश्चबाणैःशैलैर्भुजंगैःखचरैःशरैश्च ।। ३ ।।
शिवैःपतंगैः ७।१०।८।४।१०।५।७।८।९।५।११।१२। निहताःपुनस्ताविलग्नगाश्चेद्गुरुभौमजीवाः ।। तदातुरंगैः ७ करिभिः ८ खचंद्रैः १० गु
ण्याःशरैरन्यखगायदिस्युः ।। ४ ।। ग्रहद्वयंवाबहवोविलग्नेतदातदीयैर्गुणकैश्चगुण्याः ।। एवंकृतेकर्मविधाययोग्योराशिःपृथक्स्थःपरिरक्षणीयः ।।
५ ।। पृथक्स्थराशिर्मुनिभिर्विनिघ्नस्त्वाद्यद्रेष्काणेनवयुक्द्वितीये ।। यथास्थितोऽथनववर्जितोऽन्त्येभसंज्ञयाप्तोह्यवशेषमृक्षम् ।। ६ ।। स्त्रीपुत्रमित्रादिनि

मित्तकं चेत्पृच्छाविलग्नंकतुभिश्चवेदैः ।। त्रिभिःशरैर्युक्तमनुक्रमेणंततोविलग्नस्यकलाविधेयाः ।। ७ ।। लग्नस्यराशेर्गुणकेनगुण्याश्चेत्संभवोलग्नगतग्रह
स्य ।। पुनस्तदीयेनगुणेनगुण्याःप्रागुक्तवद्रूपंपरिवेदितव्यम् ।। ८ ।। दशाहतेकर्मविधानराशौप्राग्वन्नवोनेप्यथवाधिकेस्मिन् ।। खार्कैर्हतेशेषमिताष्टसंख्य
मायुर्गतंतत्खलुपृच्छकस्य ।। ९ ।। षड्भिर्विभक्तेऋतवोभवंतिशेषांकतुल्याःशिशिरादयःस्युः ।। द्विभाजितेशेषकमेकमभ्रंपूर्वापरौतद्दतुजौचमासौ ।।
।। १० ।। अष्टाहतेकर्मविधानराशौप्राग्वन्नवोनेऽप्यथवाधिकेस्मिन् ।। द्विभाजितेशेषकमेकमभ्रंतुल्येस्तिपूर्वापरपक्षकौस्तः ।। ११ ।। पंचेंदुभक्तेसति
शेषतुल्याःपक्षेचतस्मिंस्तिथयोभवंति ।। नक्षत्रातिथ्यानयनाययोग्यादहर्गणाद्वाराविचारणाऽत्र ।। १२ ।। सप्ताहतेकर्मविधानराशौप्राग्वन्नवोनेप्यथवाऽधि
केस्मिन् ।। द्विभाजितेशेषकमेकमात्रंदिवाचरात्रौजननंतदानीम् ।। १३ पंचाहतेकर्मविधानराशौप्राग्वन्नवोनेप्यथवाधिकेस्मिन् ।। दिनस्यरात्रेरथवाप्रमि
त्याभक्तेऽवशिष्टंदिनरात्रिनाड्यः ।। १४ ।। इतिजातकाभरणेनष्टजातकाध्यायः ।। ।। अथनिर्याणाध्यायः ।। ।। दिनकरप्रमुखैर्निधनस्थिते
र्भवतिमृत्युरितिप्रवदेत्क्रमात् ।। अनलतोजलतःकरवालतोज्वरभवोगदतःक्षुधयातृषा ।। १ ।। स्थिरश्चरोद्व्यंगसमाह्वयश्चराशिर्यदाजन्मनिचाष्टमस्थः
।। स्वकीयदेशेविषयांतरेचमार्गेप्रकुर्यान्मरणंक्रमेण ।। २ ।। आयुर्गृहंखेटविवर्जितंचेद्विलोकयेद्वाबलवान्ग्रहेंद्रः ।। तद्धेतुजातंप्रवदंतिमृत्युंबहुप्रकारं
बहवोबलिष्ठाः ।। ३ ।। पित्तंकफःपित्तमथात्रिदोषःश्लेष्मानिलौवाप्यनिलःक्रमेण ।। सूर्यादिकेभ्योमरणस्यहेतुःप्रकाशितःप्राक्तनजातकज्ञैः ।। ४ ।।
युक्तंनैवालोकितंखेचरेंद्रैर्मृत्युस्थानंयोविलग्नेद्दकाणः ।। द्वाविंशोऽस्मात्सोऽपितस्याऽपिभर्ताकुर्यान्मृत्युंहेतुनास्वेननूनम् ।। ५ ।। अनलतोजलतोयदुदीरि
तंभवतितत्रिलवाधिपहेतुकम् ।। अथद्दकाणफलानिसविस्तरंमुनिवरैरुदितानिवदाम्यहम् ।। ६ ।। मेषस्यपूर्वत्रिलवेनदृष्टेशुभग्रहैःपापनिरीक्ष्यमाणे ।।
प्लीहोद्भवोवाविषपित्तजोवामृत्युस्तदानींपरिवेदितव्यः ।। ७ ।। मेषेद्वितीयेजलजोवनांतेतृतीयकेकूपतडागजातः ।। वृषस्यपूर्वत्रिलवेखरा

श्वक्रमेलकादिप्रभवोहिमृत्युः ॥ ८ ॥ द्वितीयकेपित्तहुताशचौरैरुच्चस्थलाश्वादिभवस्तृतीये ॥ आद्येदृकाणेमिथुनेचवातश्वासैर्द्वितीयेवृषगोत्रिदोषैः
॥ ९ ॥ गजादितःपर्वतपाततोवाभवेदरण्येमिथुनांतदृक्के ॥ अपेयपानादपिकंटकाच्चस्वप्नाच्चकर्कप्रथमेदृकाणे ॥ १० ॥ विषादिदोषादतिसारतोवा
कर्कस्यमध्यत्रिलवेमृतिःस्यात् ॥ महाभ्रमप्लीहकगुल्मदोषैःकर्कांत्यदृक्केनिधनंनिरुक्तम् ॥ ११ ॥ विषांबुरोगैःश्वसनांबुरोगैरपानपीडाविषशस्त्र
कैश्च ॥ क्रमेणसिंहस्यदृकाणकेषुनूनंमुनींद्रैर्मरणंप्रदिष्टम् ॥ १२ ॥ कन्याद्यदृक्केऽनिलमौलिरुग्जोदुर्गाद्रिपाताच्चनृपैर्द्वितीये ॥ खरोष्ट्रशस्त्रांबुनि
पातकांतानिमित्तजातंनिधनंतृतीये ॥ १३ ॥ तुलादृकाणेप्रथमेनिपातात्कलत्रतोवापशुतोऽपिमृत्युः ॥ नूनंद्वितीयेजठरामयैश्चव्यालाज्जलाच्चापिभवे
त्तृतीये ॥ १४ ॥ पूर्वेदृकाणेखलुवृश्चिकस्यमृत्युर्विषान्नास्त्रभवोऽवगम्यः ॥भारश्रमाद्वाकटिबस्तिरोगैर्भवेद्द्वितीयेत्रिलवेतुमार्गे ॥ १५ ॥ जंघास्थि
भंगाश्मकलोष्टकाष्ठैर्भवेत्तृतीयेत्रिलवेऽलिराशेः॥ आद्येदृकाणेधनुषोमृतिःस्यात्गुदामयैश्चाऽपिमरुद्विकारैः ॥ १६ ॥ विदाहतोवाविषतःशराद्वा
नाशोदृकाणेधनुषोद्वितीये॥ भवेज्जलाद्वाजलचारिणोवाक्रोडामयाद्वाधनुषस्तृतीये ॥ १७ ॥ पूर्वेदृकाणेमकरस्यसिंहाद्व्याघ्राद्वराहाद्वृकतोद्वितीये ॥
यादोभुजंगैश्चतथातृतीयेचोराग्निशस्त्रज्वरतोहिमृत्युः ॥ १८ ॥ कुंभस्यपूर्वत्रिलवेंबुपत्नीसुतोदरव्याधिकृतोद्वितीये ॥ गुह्यामयात्पर्वतघातनाद्वाविषा
त्तृतीयेमुखरुक्पशुभ्यः ॥१९ ॥ मीनाद्यदृक्केग्रहणीप्रमेहगुल्मांगनाभ्यश्चभवेद्द्वितीये ॥ जलोदराद्यैश्चगजग्रहैर्वाजलस्यमध्येऽपिचनौप्रभेदात् ॥
२० ॥ प्रांत्येदृकाणेपृथुरोमसंस्थेमृत्युःकुरोगैःपरिवेदितव्यः॥ एवंतदानींनिधनंनियुक्तंनैवप्रदृष्टगगनेचरेंद्रैः ॥ २१ ॥ पापांतरेशीतकरेकुमार्यांशो
पान्मृतिर्वारुधिरप्रकोपात् ॥ शुभांतरेशीतकरेऽष्टमस्थेपातेनपाशेनहुताशनेन ॥ २२ ॥ पापेक्षितौपापखगौत्रिकोणेयद्वाऽष्टमेबंधभुजंगपाशात् ॥ दृ
काणकाःस्युर्जननेहियस्यकारागृहेस्यान्मरणंहितस्य ॥ २३ मीनोदयेऽर्केस्तगतेमृगांकेसपापकचास्फुजितिक्रियस्थे ॥ भार्याकृतंस्यान्मरणंस्वगेहेव

दंतिसर्वेमुनयःपुराणाः ॥ २४ ॥ क्षीणेंदुमंदौगगनेचतुर्थौदिनाधिराजोऽवनिजोऽथवास्यात् ॥ मूर्तौत्रिकोणोपगताःखलाख्याःशूलस्यमौलौप्रलयंप्र
यांति ॥ २५ ॥ मेषूरणस्थेधरणीतनूजेदिवामणौभूतलभावसंस्थे ॥ क्षीणेंदुमंदप्रविलोक्यमानेकष्टाभिघातेनवदंतिमृत्युम् ॥ २६ ॥ क्षीणेंदुभौमा
र्किदिवाकरैःस्यादायुःखलग्नांबुगतैर्गदादेः ॥ मृत्युःखपुण्योदयपंचमस्थैस्तैरेवनानाविधकुट्टनेन ॥ २७ ॥ भूसूनुसूर्यार्कसुतायदिस्युश्चतुर्थजा
मित्रनभोगृहस्थाः ॥ कुर्वंतितेशस्त्रहुताशभूपप्रकोपजातंनियमेनमृत्युम् ॥२८ ॥ कुजेंदुमंदाःखजलद्युसंस्थाःकृमिक्षतैस्तेमरणंप्रकुर्युः ॥ मेषूरण
स्थैरविभौमसोमैर्भवेत्प्रवासेनलवाहनाद्यैः ॥ २९ ॥ क्षीणेंदुमंदार्कयुतेविलग्नेभूमीसुतेसप्तमभावसंस्थे ॥ विनाशनंयंत्रनिपीडनेनभवेदवश्यंपरिवेदित
व्यम् ॥ ३० ॥ भौमेतुलायांचयमेचकर्कैप्रालेयरश्मौरविजालयस्थे ॥ विण्मूत्रितासंकुलितप्रदेशेऽवश्यंविनाशःपरिवेदितव्यः ॥ ३१ ॥ मेषूर
णास्तांबुगृहैःक्रमेणक्षीणेंदुमंदावनिपुत्रयुक्तैः ॥ दुर्गांतरालेचशिलोच्चयेवावनांतरालेप्रलयःकिलस्यात् ॥ ३२ ॥ बलोपपन्नावनिसूनुदृष्टेक्षीणेविधौ
रंध्रगतेऽर्कपुत्रे ॥ गुह्यामयाद्वाकृमिहेतुतोवाभवेदवश्यंमरणंरणाद्वा ॥ ३३ ॥ मित्रेकलत्रोपगतेत्रभौमेमंदेऽष्टमस्थेचविधौचतुर्थे ॥ विहंगमश्वापदकारणे
ननिर्याणमाहुर्मुनयःपुराणाः ॥ ३४ ॥ लग्नाष्टमत्रिकोणेषुभानुभौमार्कजेंदुषु ॥ पार्वतीयोभवेन्मृत्युर्भित्तिपातभवोऽथवा ॥ ३५ ॥ सौम्येऽष्टमस्थे
शुभदृष्टियुक्तेधर्मेश्वरेवाशुभखेचरेंद्रे ॥ तीर्थेमृतिःस्याद्यदियोगयुग्मंतीर्थेहिविष्णुस्मरणेनमृत्युः ॥ ३६ ॥ धर्मस्वामीधर्मगोधर्मसंस्थौसूर्यक्ष्माजौचेत्त
दाऽग्निप्रवेशम् ॥ कुर्यात्पत्नीलग्नजामित्रनाथौमित्रेस्यातांनाऽन्यथासद्भिरुक्तम् ॥ ३७ ॥ इतिश्रीजातकाभरणेनिर्याणाध्यायः ॥ ॥ अथमेषरा
शिस्थचंद्रकृतनिर्याणम् ॥ ॥ इतिप्रणीतंनिर्याणंप्राचीनमुनिसंमतं ॥ यवनैरुदितंयत्त्रसविस्तरमथोच्यते ॥ १ ॥ धनवान्पुत्रवानुग्रःपरोपकरणेरतः
सर्वकर्मसमायुक्तःसुशीलोराजवल्लभः ॥ २ ॥ गुणाभिरामःसततंदेवब्राह्मणपूजकः ॥ कोष्णशाकाल्पभोक्ताचताम्रविस्तृतलोचनः॥ ३ ॥ शूरः

शीघ्रंप्रमादीचकामीदुर्बलजानुकः ॥ शिरोव्रणयुतोदाताकुनखीसेवकप्रियः॥ ४ ॥ द्विभार्यःसंगरेभीरुश्चपलोऽतितरांभवेत् ॥ प्रथमेसप्तमेवर्षेत्रयो
दशमितेज्वरः ॥ ५ ॥ षोडशेवासप्तदशेवर्षेस्यांत्तुविषूचिका ॥ तृतीयेद्वादशेवापिजलाद्भीतिःप्रजायते ॥ ६ ॥ पंचविंशमितेवर्षेसंतानंचनिशांध
ता ॥ द्वात्रिंशत्प्रमितेवर्षेशस्त्रघातःप्रजायते॥ ७ ॥ कार्यारंभःप्रलापीचविदेशगमनेरतः ॥ कृशांगःशीघ्रगोमानीशुभलक्षणसंयुत ः ॥ ८ ॥
वाताधिक्यःशुभैर्हष्टेचंद्रेनवतिसंमितं ॥ आयुस्तस्यविनिर्देश्यंकार्तिकस्यासितेतरे ॥ ९ ॥ पक्षेबुधेनवम्यांचानिशीथेचाशिरोरुजा ॥ निधनंजायतेनू
नंजन्मनींदावजास्थिते ॥ १० ॥ इतिमेषराशिस्थचंद्रकृतनिर्याणम् ॥ अथवृषभराशिस्थेचंद्रेनिर्याणम् ॥ अल्पतेजानरःस्तब्धःकर्मशुद्धि
विवर्जितः ॥ सत्यवागर्थवान्कामीकामिनीवचनानुगः ॥१ ॥ चिरायुरल्पकेशीचपरोपकरणेरतः ॥ पितुर्मातुर्गुरूणांचभक्तोभूपतिवल्लभः ॥ २ ॥
सभायांचतुरोनित्यंसंतुष्टायेनकेनचित् ॥ पीडास्यात्प्रथमेवर्षेतृतीयेग्निभयंदिशेत् ॥ ३ ॥ विषूचिकाभयंविद्यात्सप्तमेनवमेव्यथा ॥ दशमेरुधिरोद्गारा
दद्वादशेपतनंतरोः ॥ ४ ॥ सर्पाच्चषोडशेभीतिःपीडाचैकोनविंशके ॥ पंचविंशमितेतोयाद्भयंभवतिनिश्चितं ॥ ५ ॥ त्रिंशन्मितेतथापीडाद्वात्रिंशत्प्रमिते
ऽपिच ॥ श्लेष्मलःशांतिभाक्शूरःसहिष्णुर्बुद्धिमान्नरः ॥ ६ ॥ सौम्यग्रहेक्षितेचंद्रेषण्णवत्यष्टसंख्यकं ॥ आयुर्जंतोर्विनिर्देश्यमवश्यंवचनात्सताम् ॥
७ ॥ माघेमासेनवम्यांचशुक्लपक्षेभृगोर्दिने ॥ रोहिण्यांनिधनंविद्याज्जन्मनींदौवृषस्थिते ॥ ८ ॥ इतिवृषभराशिस्थितचंद्रनिर्याणम् ॥ ॥ अथ
मिथुनस्थेचंद्रेनिर्याणम् ॥ ॥ ग्रामण्यांचतुरःप्राज्ञोदृढसौहृदकारकः ॥ मिष्टान्नाशीसुशीलश्चछिन्नवाक्चललोचनः ॥ १ ॥ कुटुंबवत्सलः
कामीकतूहलरतिप्रियः ॥ वयसःपूर्वभागेतुसुखीमध्येतुमध्यमः ॥ २ ॥ चरमेऽतितरांदुःखीद्विभार्योगुरुवत्सलः ॥ स्वल्पापत्योगुणैर्युक्तोनरोभवतिनि
श्चितं ॥३॥ वृक्षाद्भीःपंचमेवर्षेषोडशेऽरिकृतंभयम् ॥ अष्टादशप्रमाणेतुकर्णरुक्परिपीडनम् ॥ ४ ॥ विंशत्याप्रमितेवर्षेपीडाऽत्यंतंप्रजायते ॥ अष्टात्रिं

शन्मितेनूनंपीडास्यान्मृत्युनासमा ॥ ५ ॥ भोगीदानरतोनित्यंसत्यधर्मपरायणः ॥ सुभगोविषयासक्तोगीतनृत्यप्रियःसुधीः ॥६ ॥ शास्त्रज्ञःशुभवाक्जीवेदशीतिःशरदांनरः॥वैशाखेशुक्लपक्षेचद्वादश्यांबुधवासरे॥७॥माध्यान्हेहस्तनक्षत्रेनिर्याणंखलुनिर्दिशेत् ॥ इत्युक्तंमिथुनस्थेतुजन्मकालेकलानिधौ ॥ ८ ॥ इतिमिथुनराशिस्थेचंद्रेनिर्याणम् ॥ ॥ अथकर्कराशिस्थेचंद्रेनिर्याणम् ॥ परोपकृतिकर्ताचसर्वसंग्रहतत्परः ॥ पुत्रवान्गुणवान्साधुर्भक्तःपित्रोःस्त्रियाजितः ॥ १ ॥ अल्पायुःप्रथमेभागेनिःस्वोमध्येसुखीभवेत् ॥ तृतीयेधर्मसंसक्तस्तीर्थयात्रापरायणः॥ २ ॥ रेखातस्यभवेन्नूनंललाटेमध्यगामिनी ॥ वामांगेऽग्निभयंविद्याच्छीर्षरुक्परिपीडितः ॥ ३ ॥ बांधवैर्बहुभिर्युक्तोबहुभार्यःप्रजायते ॥ भयग्रहस्थितिर्वेत्ताचबहुमित्रःप्रियंवदः ॥ ४ ॥ रोगीस्यात्प्रथमेवर्षेतृतीयेलिंगपीडनम् ॥ एकत्रिंशन्मितेवर्षेसर्पतोभयमादिशेत् ॥ ५ ॥ द्वात्रिंशत्प्रमितेवर्षेबहुपीडोद्भवोभवेत् ॥ पंचाशीतिमितंब्रूयादायुःषण्णवतिश्चवा ॥ ६ ॥ माघेमासिसितेपक्षेनवम्यांभृगुवासरे ॥ रोहिणीनामनक्षत्रेव्रजेदायुःप्रपूर्णताम् ॥ ७ ॥ प्रसूतौकर्कराशिस्थेकुमुदानंदनेसति ॥ पुराणैर्मुनिभिःप्रोक्तंनिर्याणमितिनिश्चितं॥ ८ ॥ इतिकर्कराशिस्थचंद्रनिर्याणम् ॥ ॥ धनधान्यसमायुक्तःश्रीमांश्चसमरप्रियः ॥ विद्वान्सर्वकलाभिज्ञोविदेशगमनेरतः ॥ १ ॥ विशालपिंगलाक्षश्चक्रोधीस्वल्पात्मजोनरः ॥ सगर्वःशत्रुहंताचशिरोरुक्निष्ठुरोमहान् ॥२॥ भूताद्बाधादिमेवर्षेपंचमेऽब्देऽग्नितोभयम् ॥ सप्तमेज्वरबाधाचनृणांभवतिनिश्चितम् ॥३॥ विषूचिकोद्भवापीडानृणांभवतिनिश्चितम् ॥ विंशन्मितेभयंसर्पादेकविंशेप्रपीडनं ॥ ४ ॥ अष्टाविंशन्मितेवर्षेचापवादभयान्वितः ॥ द्वात्रिंशत्प्रमितेनूनंवत्सरेपारिपीडनम् ॥ ५ ॥ उदरेसव्यभागेतुवातगुल्मादिसंभवः ॥ सुशीलःकृपणोऽत्यंतंसत्यवादीविचक्षणः ॥६॥ शुभग्रहेक्षितेचंद्रेशतायुर्जायतेनरः ॥ फाल्गुनस्याऽसितेपक्षेपंचम्यांभौमवासरे ॥ ७ ॥ मध्यान्हेजलमध्येचमृत्युर्नूनंनसंशयः ॥ सिंहराशिस्थितेचंद्रेनिर्याणमिदमीरितं ॥ ८ ॥ इतिसिंहराशिस्थितचंद्रेनिर्याणम् ॥ ॥

अथकन्याराशिस्थेचंद्रेनिर्याणम् ॥ : ॥ स्वजनानंदकृन्नित्यंधनवान्बहुसेवकः ॥ प्रवासीचकलाभिज्ञोगुरुभक्तःप्रियंवदः ॥ १ ॥ देवताद्विजवर्याणां
भक्तोतत्परमानसः । धर्मकर्मसमायुक्तोजनानांमतिदुर्लभः ॥ २ ॥ कन्यात्मकत्वमापन्नोभूरिपुत्रोभवेन्नरः ॥ शिश्नेकंठप्रदेशेचलांछनंनिश्चितंभवेत्
॥ ३ ॥ वन्हिपीडातृतीयेऽब्देपंचमेलोचनव्यथा ॥ नवमेद्वारबाधाचत्रयोदशमितेपिच ॥ ४ ॥ तथापंचदशेवर्षेसर्पतोभयमादिशेत् ॥ एकविंशन्मि
तेवर्षेपतनंवृक्षभित्तितः ॥ ५ ॥ अरण्येशस्त्रघातःस्याद्वर्षेत्रिंशन्मितेध्रुवं ॥ अशीत्यब्दंभवेदायुश्चंद्रेसौम्यग्रहेक्षिते ॥ ६ ॥ चैत्रेकृष्णत्रयोदश्यांनिधनं
रविवासरे ॥ शीतद्युतौस्थितेसूतौकन्यायामितिसंस्मृतम् ॥ ७ ॥ इतिकन्याराशिस्थितेचंद्रेनिर्याणम् ॥ ॥ अथतुलाराशिस्थितेचंद्रेनिर्याणम्
॥ मान्यःसर्वजनैर्नूनंवस्तुसंग्रहतत्परः ॥ भोगीधर्मपरःश्रीमान्बहुभृत्योविचक्षणः ॥ १ ॥ वापीकूपतडागादिनिर्मितौसादरःसदा ॥ प्राज्ञःसर्वक
लाभिज्ञोनृपाणामतिवल्लभः ॥ २ ॥ मधुरान्नरसप्रीतिर्द्विभार्यःपितृभक्तिकृत् ॥ स्वल्पापत्योल्पबंधुश्चकृषिकर्मविचक्षणः ॥ ३ ॥ क्रयविक्रयसंप्रा
प्तिर्देवब्राह्मणपूजकः ॥ भार्यावचोनुगामीचसप्तमेऽब्देग्निजंभयम् ॥ ४ ॥ अष्टमेज्वरजापीडाद्वादशेचजलाद्भयम् ॥ तरोस्तुरंगतःपातःसर्पभीर्वा
पिविंशके ॥ ५ ॥ एकविंशन्मितेपीडाचंद्रेसौम्यग्रहेक्षिते ॥ पंचाशीतिर्भवेदायुर्वैशाखस्याद्यपक्षके ॥ ६ ॥ सार्पेऽष्टम्यांभृगोर्वारेनिधनंपूर्व
यामके ॥ तुलाराशिस्थितेचंद्रेनिर्याणमितिसूचितम् ॥ ७ ॥ इतितुलाराशिस्थेचंद्रेनिर्याणम् ॥ ॥ अथवृश्चिकराशिगतचंद्रकृत
निर्याणम् ॥ ॥ परतापकरःक्रोधीविद्वेषीकलहप्रियः ॥ विश्वासघातकश्चापिमित्रद्रोहीविचक्षणः ॥ १ ॥ असंतुष्टोनृपैःपूज्योविघ्नकर्ता
न्यकर्मणि ॥ शुभलक्षणसंयुक्तोगुप्तपापश्चविक्रमी ॥ २ ॥ बहुभृत्यश्चतुर्बंधुर्द्विभार्योजायतेपुमान् ॥ प्रथमेऽब्देज्वरात्पीडातृतीयेभयमग्नितः ॥
॥ ३ ॥ पंचमेऽब्देज्वरात्पीडातथापंचदशेपिच ॥ पंचविंशन्मितेवर्षेपीडास्यान्महतीध्रुवम् ॥ ४ ॥ चंद्रेसौम्यग्रहैर्दृष्टेनवत्यब्दान्सजीवति ॥

ज्येष्ठमासिसितेपक्षेदशम्यांबुधवासरे ॥ ५ ॥ हस्तनक्षत्रसंयुक्तेमध्यरात्रिगतेसति ॥ चंद्रेवृश्चिकराशिस्थेनिर्याणमितिकीर्तितम् ॥ ६ ॥इतिवृश्चिकराशि
स्थचंद्रकृतनिर्याणम् ॥ ॥ अथधनुराशिस्थितचंद्रनिर्याणम् ॥ ॥ प्राज्ञोधर्मीसुपुत्रश्चराजमान्योजनप्रियः ॥ द्विजदेवार्चनप्रीतिर्वस्तुसंग्रहतत्परः ॥ १
सभायांचभवेद्वक्तासुनखीसुमतिःशुचिः ॥ स्थूलदंताधरग्रीवःकाव्यकर्त्ताप्रगल्भकः ॥ २ ॥ कुलशालीवदान्यश्चसभाग्योदृढसौहृदः ॥ नि
म्नपादतलःक्लेशीसाहसीविनयान्वितः ॥ ३ ॥ शांतःक्षिप्रप्रकोपीचतापसःस्वल्पभुक्नरः ॥ स्वल्पापत्यःसुबंधुश्चपूर्ववयसिवित्तवान् ॥ ४ ॥ स
बाधःप्रथमेवर्षेमहापीडात्रयोदशे ॥ अष्टषष्टिमितंप्राहुरायुर्वापंचसप्ततिः ॥ ५ ॥चंद्रेसर्वशुभैर्दृष्टेशतवर्षाणिजीवति ॥ आषाढस्याऽसितेपक्षेपंच
म्यांभृगुवासरे ॥ ६ ॥ निशायांहस्तनक्षत्रेनिधनंसर्वथाभवेत् ॥ निर्याणमितिसंप्रोक्तंचंद्रेसूतौधनुस्थिते ॥७॥ इतिधनूराशिस्थितचंद्रकृतनिर्याण
म् ॥ ॥ अथमकरराशिस्थितचंद्रकृतनिर्याणम् ॥ ॥ धीरोविचक्षणःक्लेशीपुत्रवान्नृपतिप्रियः ॥ कृपालुःसत्यसंपन्नोवदान्यःशु
भगोलसः ॥ १ ॥ कृष्णतालःपुमान्नूनंविस्तीर्णकटिरुद्भवेत् ॥ पंचमेवत्सरेपीडासप्तमेचजलाद्भयम् ॥ २ ॥ दशमेपतनंवृक्षात्द्वादशेशस्त्र
पीडनं ॥ विंशन्मितेज्वराद्बाधाशाखासुपंचाविंशके ॥ ३ ॥ पंचत्रिंशत्समाकालेवामांगेऽग्निभयंदिशेत् ॥ अब्दानांनवतिर्नूनमायुस्तस्यप्रकी
र्तितम् ॥ ४ ॥ श्रावणस्यासितेपक्षेदशम्यांभौमवासरे ॥ ज्येष्ठायांनिधनंनूनंचंद्रेमकरसंस्थिते ॥ ५ ॥ इतिमकरराशिस्थितचंद्रकृतनिर्याणम् ॥
अथकुंभराशिस्थितेचंद्रेनिर्याणम् ॥ ॥ दातामिष्टान्नभोक्ताचधर्मकार्येषुसत्वरः ॥ प्रियवक्तृत्वसंयुक्तोनरःक्षीणकलेवरः ॥ १ ॥ स्वल्पा
पत्योद्विभार्यश्चकामीद्रव्यविवर्जितः ॥ वामहस्तेभवेल्लक्ष्मपीडाप्रथमवत्सरे ॥ २ ॥ पंचमेऽग्निभयंविद्यादथद्वादशवत्सरे ॥ व्यालाद्वाजलतोभीति
रष्टाविंशतिमेक्षतिः ॥ ३ ॥ चौरेभ्यश्चभवेदायुर्वर्षाणांनवतिर्ध्रुवम् ॥ भाद्रेमास्यासितेपक्षेचतुर्थ्यांशनिवासरे ॥ ४ ॥ भरणीनामनक्षत्रेगृणाति

मरणंनृणाम् ॥ एवमुक्तंमुनिश्रेष्ठैश्चंद्रेजन्मनिकुंभगे ॥ ५ ॥ इतिकुंभराशिगतचंद्रकृतनिर्याणम् ॥ ॥ अथमीनराशौचंद्रकृतनिर्याणम् ॥
धनीमानीविनीतश्चभोगीसंत्हृष्टमानसः ॥ पितृमातृसुराचार्यगुरुभक्तिपरोनरः ॥ १ ॥ उदारोरूपवान्श्रेष्ठोगंधमाल्यविभूषणः ॥ पंचमेऽब्देजलाद्भी
तिरष्टमेज्वरपीडनम् ॥ २ ॥द्वाविंशेमहतीपीडाचतुर्विंशन्मितेऽब्दके ॥ पूर्वांशागमनंचायुरब्दानांनवतिःस्मृता ॥ ३ आश्विनस्याऽसितेपक्षेद्वितीयायांगु
रोर्दिने ॥ कृत्तिकानामनक्षत्रेसायंमृत्युर्नसंशयः ॥ ४ ॥ इतीरितंतुनिर्याणंयवनाचार्यसंमतम् ॥ मीनस्थेयामिनीनाथेभवेदत्रनसंशयः ॥ ५ ॥ इति
मीनस्थचंद्रकृतनिर्याणम् ॥ ॥ इतिश्रीदैवज्ञढुंढिराजविरचितेजातकाभरणेनिर्याणाध्यायः ॥ ॥ अथस्त्रीजातकाध्यायः ॥
यज्जन्मकालाद्गदितंनराणांहोराप्रवीणैःफलमेतदेव ॥ स्त्रीणांप्रकल्प्यंखलुचेद्धयोग्यंतन्नायकेतत्परिवेदितव्यम् ॥ १ ॥ लग्नेशशांकेचवपुर्विचिंत्यंतयोः
कलत्रेपतिवैभवानि ॥ सुताख्यभावेप्रसवोऽवगम्योवैधव्यमस्याःकिलकालगेहे ॥ २ ॥लग्नेचचंद्रेसमराशियातेकांतानितांतप्रकृतिस्थितास्यात् ॥ स
द्रत्नभूषासहिताऽथसौम्यैर्निरीक्षितौतौयदिचारुशीला ॥ ३ ॥ तयोःस्थितिश्चेद्विषमाख्यराशौनारीनराकारधराकुरूपा ॥ पापैस्तुलोकनयोगया
तौतौचेत्कुशीलागुणवर्जितालम् ॥ ४ ॥ लग्नेंद्वोर्बलवान्कुजस्यभवनेशुक्रस्यखांशकेकन्यास्यादतिनिंदितासुरगुरोःसाध्वीनितांतंभवेत् ॥ दु
ष्टाभूतनयस्यनूनमुदितासौम्यस्यमायाविनीदासीतिग्ममरीचिसूनुगगनांशेफलानिक्रमात् ॥ ५ ॥ तारानायकपुत्रभेऽवनिसुतत्रिंशलवेकापटाशौ
क्रेहीनमनोभवाशशिसुतस्याऽतीवयुक्तागुणैः ॥ देवाधीशपुरोहितस्यहिभवेत्साध्वीनितांतंतथाखाग्न्यंशेऽर्कसुतस्यसानिगदिताक्लीबस्यभार्याबुधैः ॥ ६ ॥
देवाचार्यगृहेऽमृतांशुरथवालग्नंखवन्ह्यंशकेभूसूनोर्गुणशालिनीसुरगुरोःख्यातागुणानांगणैः ॥ तारास्वामिसुतस्यचारुविभवाशुक्रस्यसाध्वीभवेन्नूनंभा
नुसतस्यचाऽल्पसुरताकांताबुधैःकीर्तिता ॥ ७ ॥ दैत्याचार्यगृहेत्विंदुर्सांचवस्याकाशवन्ह्यंशकेलग्नंवाप्युडुनायकोगुणवतीभौमस्यदोष्याधिका ॥ स्वै

म्यैस्यातिकलाकलापकुशलाशुक्रस्यचंचद्गुणैर्युक्ताद्यैर्निपुणैर्दिवाभणिसुतस्यांशेपुनर्भूरिति ॥ ८ ॥ मंदालयेखांशेलवेकुजस्यदासीचसौम्यस्यखल
बाला ॥ बृहस्पतेःस्यात्पतिदैवतासावंध्याभृगोर्नीचरताऽर्कसूनोः ॥ ९ ॥ लग्नंवाविधुरर्कमंदिरगतोभौमस्यखांग्न्यंशकेस्वच्छासंचरणोद्यतादिशिशु
स्याऽतीवदुष्टाशया ॥ देवाधीशपुरोधसोनिगदितासाराजपत्नीभृगोःपौंश्चल्याभिरताशनेरातितरांपुंवत्प्रगल्भांगना ॥ १० ॥ चंद्रागारेखांशभागे
कुजस्यस्वेच्छावृत्तिर्ज्ञस्यशिल्पेप्रवीणा ॥ वाचांपत्युःसद्गुणाभार्गवस्यसाध्वीमंदस्यप्रियप्राणहंत्री ॥ ११ ॥ अन्योन्यभागेक्षणगौसितार्कीयद्वासितर्क्षे
तनुगेघटांशे ॥ कंदर्पशांतिंकुरुतेनितांतंनारीनराकारकरांगनाभिः ॥ १२ ॥ शून्येमन्मथमंदिरेशुभखगैर्नालोकितेनिर्बलेबालायाःकिलनाय
कोमुनिवरैःकापूरुषःकीर्त्तितः ॥ जामित्रबुधमंदयोर्यदिगृहंषंढोभवेन्निश्चितंराशौतत्रचरेविदेशनिरतोद्यंगेचमिश्रास्थितिः ॥ १३ ॥ सप्तमेदिनपतौ
पतिमुक्ताक्षोणिजेचविधवाखलुबाल्ये ॥ पापखेचरविलोकनयातंमंदगेचयुवतिर्जरतीस्यात् ॥ १४ ॥ खलैःकलत्रेचगतालकास्यात्कांताविमिश्रैश्चभ
वेत्पुनर्भूः ॥ कालत्रसंस्थेविबलेखलाख्येसौम्यैरदृष्टेविभुनाविमुक्ता ॥ १५ ॥ अन्योन्यांशावस्थितौभौमशुक्रौस्यातांकांतासंगतान्येननूनम् ॥ चंद्रो
पेतौशुक्रवक्रौस्मरस्थावाज्ञैवास्यात्स्वामिनश्चामनंति ॥ १६ ॥ लग्नेसितेंदूकुजमंदभस्थौक्रूरेक्षितौसान्यरताजवन्या ॥ स्मरेकुजेसाऽर्कसुतेनदृष्टेविनष्ट
योनिश्चशुभाशुभांशे ॥ १७ ॥ भानोर्भेयदिवालवःस्मरगृहेसंभोगमंदःपतिश्चंद्रस्याऽतिमदोमृदुःक्षितिसुतस्यस्त्रीप्रियःक्रोधयुक् ॥ विद्वान्ज्ञस्यगुरोर्व
शीगुणयुतःशुक्रस्यभाग्यान्वितोमंदस्यप्रवयास्तुगूढमतिरित्युक्तोबुधैर्होरिकैः ॥१८॥ शुक्रेंदूस्मरगौस्त्रियंप्रकुरुतःसेर्ष्यंसुखेनान्वितांसौम्येंदूचकलासु
खोत्तमगुणंशुक्रेंदुपुत्रावथ ॥ चंचद्भाग्यकलान्वितांभिरुचिरांसौम्यग्रहेंद्रास्तनौनानाभूषणसद्गुणांबरसुखांपापग्रहैस्त्वन्यथा ॥ १९ ॥ वैधव्यंस्यात्पाप
खेटेऽष्टमस्थेरंध्रस्वामीसंस्थितोयस्यचांशे ॥ मृत्युःपाकेतस्यवाच्योंगनायाःसौम्यैरर्थःस्थानगैःस्यात्स्वयंहि ॥ २० ॥ सूर्यारौखजलाश्रितौहिमवतः

शैलाग्रपातान्मृतिर्भौमेंद्वर्कसुताः स्वसप्तबलगाः स्यात्कूपवाप्यादितः ॥ सूर्याचंद्रमसौखलेक्षितयुतौकन्यास्थितौबंधनात्तौचेद्व्यंगविलग्नसंस्थितिकरौतो येनिमग्नाःस्वैः ॥ २१ ॥ रविसुतोयदिकर्कमुपागतोहिमकरोमकरोपगतोभवेत् ॥ किलजलोदरसंजनितातदानिधनतावनितासुचकीर्तिता ॥ २२ ॥ निशाकरःपापखगांतरस्थःशस्त्राग्निमृत्युंकुजभेकरोति ॥ पापेस्मरस्थेऽन्यखगेचधर्मेकिलांगनाप्रव्रजितत्वमेति ॥ २३ ॥ कन्यालिगोसिंहगतेशशांकेपंकेरुहाक्षीखलुसाऽल्पपुत्रा ॥ पुत्रालयंचेच्छुभखेचरेंद्रैर्दृष्टंयुतंवाबहुताचयेषाम् ॥ २४ ॥ शुक्रेंदुसौम्याविबलाभवेयुःशनैश्चरोमध्यबलो यदिस्यात् ॥ शेषाःसवीर्याविषमेचलग्नेयोषाविशेषात्पुरुषप्रगल्भा ॥ २५ ॥ समेविलग्नेयदिसंस्थिताःस्युर्बलान्विताःशुक्रबुधेंदुजीवाः ॥ स्यात्कामिनीब्रह्मविचारचर्चापरागमज्ञानविराजमाना ॥ २६ ॥ पूर्वैर्यन्मुनिभिःसविस्तरतयास्त्रीजातकेकीर्तितंसम्यक्वाऽप्यशुभंचयन्मतिमतावाच्यंविदित्वाबलम् ॥ योगानांचनियोजयेत्फलमिदंपृच्छाविलग्नेतथापाणिग्रग्रहणेतथाचवरणेसंभूतिकालेऽपिच ॥ २७ ॥ नारीचक्रेमस्तकेत्रीणिभानिवक्त्रेभानांसप्तकंस्थापनीयम् ॥ प्रत्येकंस्युर्वेदताराउरोजेतिस्रस्ताराह्त्प्रदेशेनिवेशयाः ॥ २८ ॥ नाभौदेयंभत्रयंत्रीणिगुह्येभानीर्धिष्ण्यंचंद्रधिष्ण्योवधीत्थम् ॥ सत्संतापःशीर्षभेवक्त्रसंस्थेनित्यंमिष्टान्नानिसौख्योपलब्धिः ॥ २९ ॥ कामंस्वामिप्रेमवृद्धिस्तनस्थेवक्षोदेशावस्थितेऽस्यंतहर्षः ॥ पत्युश्चिंतानंतवृद्धिश्चनाभौगुह्यस्थेस्यान्मन्मथाधिक्यमुच्चैः ॥ ३० ॥ गोदावरीतीरविराजमानंपार्थाभिधानंपुटभेदनंयत् ॥ सद्गोलविद्यामलकीर्तिभाजांमत्पूर्वज्ञानांवसतिस्थलंतत् ॥ ३१ ॥ तत्रत्यदेवज्ञनृसिंहसूनुर्गजाननाराधनजाभिमानः ॥ श्रीढुंढिराजोरचयांबभूवहोरागमेऽनुक्रममादरेण ॥ ३२ ॥ इतिश्रीदैवज्ञढुंढिराजविरचितेजातकाभरणेस्त्रीजातकाध्यायः ॥ ॥ इतिजातकाभरणंसमाप्तिमगमत् ॥ ॥ ॥ ॥ शुभं ॥

0

पत्रांक अथजातकाभरणानुक्रमणिकाप्रारंभः

इतिजातकाभरणानुक्रमणिकासमाप्ता.

॥ अथजातकाभरणानुक्रमणिकाप्रारंभः ॥